——:*:——

अथचतुरशीतिलिङ्गमाहात्म्यारम्भः

प्रथमोऽध्यायः

अगस्त्येश्वरमाहात्म्यवर्णनम्

उमोवाच

पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा ।
कथ्यतां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥ १ ॥

ईश्वर उवाच

अस्ति लोकेषु विख्याता गङ्गा त्रिपथगामिनी ।
सेविता देवगन्धर्वैर्मुनिभिश्च निषेविता ॥ २ ॥

तपनस्य सुता देवी यमुना लोकपावनी । पितॄणां वल्लभा देवि महापातकहारिणी

* एषोऽन्तिमोऽध्यायो मोहमयीस्थवेङ्कटेश्वरप्रकाशितपुस्तके नास्ति लक्ष्मणपुर (लखनऊ) प्रकाशित पुस्तकादुद्धृतोऽयमिति ।

चन्द्रभागा वितस्ता च नर्मदाऽमरकण्टके । कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा
केदारं पुष्करं चैव तथा कायावरोहणम् । तथा पुण्यतमं देवि महाकालवनं शुभम्
यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः । क्षेत्रं योजनपर्यंतं ब्रह्महत्याविनाशनम्
भुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनम् । प्रलयेऽप्यक्षयं देवि दुष्प्राप्यं त्रिदशैरपि

उमोवाच

प्रभावः कथ्यतां देव! क्षेत्रस्यास्य महेश्वर ।
यानि तीर्थानि वन्द्यानि यानि लिङ्गानि सन्ति वै ॥ ८ ॥
तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ ९ ॥

ईश्वर उवाच

श्रृणु देवि प्रयत्नेन प्रभावं पापनाशनम् । क्षेत्रमाद्यं महादेवि ममातीव प्रियं सदा
यत्रास्ति च महापुण्यासर्वपापहरा परा । तथा गन्धवती पुण्या दिव्यानवनदीप्रिया
नीलगङ्गा चतुर्थी तु श्रेष्ठा नद्यः प्रकीर्तिताः ।
आसां तु सङ्गमे स्नात्वा श्राद्धं यः कुरुते नरः ॥ १२ ॥
गङ्गायास्त्रिगुणं देवि! चतुर्वर्गफलप्रदम् । क्षेत्रं योजनपर्यन्तमवन्त्या विद्धि सुव्रते
सिद्धलिङ्गानि तिष्ठन्ति भुक्तिमुक्तिकराणि च ।
ईश्वराश्चतुराशीतिस्तथाष्टौ सन्ति भैरवाः॥ १४ ॥
एकादश तथा रुद्राआदित्या द्वादशस्मृताः। षड्वैविनायकाश्चात्र चतुर्विंशतिमातरः
यदाहं गतवांस्तत्र महाकालवने शुभे । ब्रह्मविष्णवादयः सर्वे तत्राजग्मुर्मुदान्विताः
एभिर्व्याप्तं क्षेत्रमिदं देवियोजनमायतम् । दशस्थानगतो विष्णुःसर्वपापप्रणाशनः
एतन्नामानि योऽधीतेप्रभाते भक्तितःपुमान् । विमुक्तःसर्वपापैस्तुरुद्रलोकंसगच्छति

उमोवाच

चतुराशीतिलिङ्गानि त्वयोक्तानीह यानि तु । तानिविस्तरतोब्रूहिसर्वपापहराणितु

हर उवाच

श्रृणु देवि! प्रवक्ष्यामि तेषां नामानि यानि च ।

ख्यातं पृथिव्यां प्रथममगस्त्येश्वरमुत्तमम् । यस्य दर्शनमात्रेण कृतकृत्योनरो भवेत्

उमोवाच

अगस्त्येश्वरनामेह कथं लब्धमनेन वै । कस्मिन्स्थाने कथं जातंविस्तराद्वक्तुमर्हसि

हर उवाच

श्रृणु देवि! महाभागे कथामस्य पुरातनीम् । सर्वपापप्रशमनीं समीहितफलप्रदाम्
पुरासुरैर्जिता देवानिरुत्साहाश्च ते ततः । भागाश्चैषांहृताःसर्वे निराशाःपितरःकृताः
भ्रष्टैश्वर्यास्तदा देवि!चेरुर्देवा महीतले ॥ २३ ॥
ततः कदाचित्ते दीना दीप्तमादित्यवर्चसम् । ददृशुस्तेजसा युक्तमगस्त्यंविपुलव्रतम्
अभिवाद्य ततो देवा दृष्ट्वा तं तेजसावृतम् । इदमूचुर्महात्मानमगस्त्यंलोकविश्रुतम्
दानवैर्निर्जितायुद्धेसर्वेस्वर्गाच्चपातिताः । ततस्त्वं नोभयात्तीव्रात्त्रायस्वमुनिपुङ्गव!
इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत ।
प्रजज्वाल च तेजस्वी कालाग्निरिव सङ्क्षये ॥ २७ ॥
तदा दीप्तांशुजालेन निर्दग्धा दानवास्तथा । अन्तरिक्षान्महादेवि पतिताश्च सहस्रशः
दह्यमानास्ततो दैत्यास्तस्यागस्त्यस्य तेजसा ।
शेषेश्च दानवाः सर्वे पातालं बव्रजुर्भयात ॥ २९ ॥
ततोऽगस्त्यो महात्मा वै तान्हत्वा शोकमूर्छितः ।
बभूवातिशयं चासौ चिन्तयोद्विग्नमानसः ॥ ३० ॥
कृतं घोरं महत्पापं हता यद्दानवा मया । अहिंसा परमो धर्मो मनुना कथ्यते यतः
किं करोमि क्व गच्छामि कथं शुध्येय चाप्यहम ॥ ३१ ॥
एवं चिन्तयतस्तस्य समागच्छत्पितामहः ।
प्रोवाच स मुनिं तत्र कस्मात्त्वं शोकविह्वलः ॥ ३२ ॥
लक्ष्यसे मुनिशार्दूलकारणंकथ्यतांत्वरम् । सब्रह्माणंनमस्कृत्य कथयामासपृच्छतः
देवदेव जगन्नाथ दाहोऽन्तर्मानसं मम । ब्रह्महत्या समायाता यन्मया दानवा हताः
ममोपायं समाचक्ष्व प्रसादात्सुरसत्तम । बहुकालार्जितं देव गतं मे संक्षयं तपः

प्रोवाचेदं सुरश्रेष्ठः शृणु त्वं यत्नतः परम् । उपायं सर्वपापस्य क्षयो येनभवेद्ध्रुवम्
महाकालवने दिव्ये यक्षगन्धर्वसेविते । उत्तरे वटयक्षिण्या यत्तल्लिङ्गमनुत्तमम् ॥
पिशाचस्यापि तीर्थस्य भागे दक्षिणतः स्थितम् ।
तं समाराध्यतः सर्वं पापं नाशमवाप्नुयात् ॥ ३८ ॥
आराधय शुभं लिङ्गं सर्वपापप्रणाशनम् । बाढं प्रोवाच धर्मात्मा महाकालवनंययौ
तस्मिन्स लिङ्गे देवेशि समाराधनतत्परः । बभूवाहर्निशं भक्त्या तद्ध्यानैकरतोमुनिः
अहं तुष्टस्तदा देवि! मुनेस्तस्य महात्मनः ॥ ४१ ॥
प्रोक्तं मया महाभाग मुने शृणु समाहितः । वरं वरय विप्रेन्द्र! यत्ते मनसि वर्त्तते ॥
तुष्टोऽहमनया भक्त्या तपसा दुष्करेण तु ।
लिङ्गस्यास्य प्रभावेण जातस्त्वं निर्मलोऽधुना ॥ ४३ ॥
प्रणष्टा ब्रह्महत्या ते दानवोत्था मुनीश्वर! । मदीयं वचनं श्रुत्वा तेनोक्तं वरवर्णिनि
यदि देव! प्रसन्नस्त्वं शरणागतवत्सलः । त्वदङ्घ्रियुगले भूयान्मम भक्तिर्महेश्वर ॥
तपस्यथ तथा धर्मे न मे विघ्नोभवेदिति । तस्य तद्वचनं श्रुत्वाकुम्भयोनेर्महात्मनः
मया प्रोक्तं विशालाक्षि! मुने! एवं भविष्यति ॥ ४६ ॥
यस्त्वया पूजितो देवो ब्रह्महत्याविनाशनः ।
त्वन्नाम्ना त्रिषु लोकेषु सोऽयं ख्यातो भविष्यति ॥ ४७ ॥
अगस्त्येश्वरदेवोऽपि विख्यातो भुवनत्रये । एवमुक्तोमया देविसविप्रस्तत्र संस्थितः
कृपया तस्य लिङ्गस्य पञ्चमुद्राविभूषितः ॥ ४८ ॥
ये नरास्तन्महालिङ्गं निरीक्षिष्यन्ति भक्तितः ।
सर्वपापविनिर्मुक्ताः सर्वकामैरलङ्कृताः ॥ ४९ ॥
भविष्यन्ति महात्मानः पुत्रैश्वर्यसमन्विताः ।
अन्तकाले च मां यान्ति विमानैः सर्वकामदैः ॥ ५० ॥
स्तुतागन्धर्वमुख्यैश्च रुद्रलोके च शाश्वते । येऽर्चयन्तिसदादेवमगस्त्येश्वरसञ्ज्ञकम्
कृतपुण्यानरामर्त्यास्तेयान्ति परमं पदम् । संस्मृतेदेवदेवेशेनराणांकोटिजन्मजम्

अशुभं क्षयमाप्नोति कस्तं न प्रणमेच्छिवम् ।
यः प्रणम्य नरो भक्त्या देवं तं च निषेवते ॥ ५३ ॥
मुच्यते ब्रह्महत्यादिपातकैर्नरकप्रदैः ॥ ५४ ॥
राजसूयशतेनैव यत्पुण्यं च भविष्यति । तत्पुण्यमधिकं देवि दर्शनाच्च भविष्यति
किं तीर्थैर्विविधैः स्नानैः किं दानैर्विविधैः कृतैः ।
ते प्राप्स्यन्ति फलं सर्वे मत्प्रसादान्न संशयः ॥ ५६ ॥
अष्टम्यांचचतुर्दश्यांदिनेसोमस्यशक्तितः । यःकरिष्यतिलिङ्गस्यपूजांभक्तिसमन्वितः
कुलानां तारयत्येव मातृकं पितृकं शतम् ॥ ५७ ॥
ये च पश्यन्ति पुरुषा भावहीनाः प्रसङ्गतः । नते पश्यन्ति संसारे नरकं वै कदाचन
एतत्ते कथितं देवि लिङ्गमाहात्म्यमुत्तमम् । प्रथमं कथितं लोके द्वितीयं शृणुयत्नतः

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्येऽगस्त्येश्वरमाहात्म्यवर्णननाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

गुहेश्वरलिङ्गमाहात्म्यवर्णनम्

श्रीरुद्र उवाच

शृणु गुहेश्वरं लिङ्गं द्वितीयं पापनाशनम् । यस्य दर्शनमात्रेण जायतेसिद्धिरुत्तमा
पुरा रथन्तरे कल्पे देवदारुवने शुभे । ऋषिर्मङ्कणकोनाम वेदवेदाङ्गपारगः ।
योगाभ्यासरतो नित्यं शान्तिदान्तिसमास्थितिः ॥ २ ॥
सिद्धिकामस्तपस्तेपे कथं सिद्धो भवाम्यहम् ।
रक्तमयविकारोऽयं कथं यास्यति सङ्क्षयम् ॥ ३ ॥
इति सञ्चिन्त्य हृदये प्रारब्धं तप उत्तमम् । बहून्यब्दसहस्राणि तस्यातीतानिपार्वति

कस्मिंश्चिदथ काले तु विद्धस्य पर्वतात्मजे । कराच्छाकरसोजातःकुशाग्रेणतदैवहि
स च दृष्ट्वातदाश्चर्यं विस्मयं परमं गतः । मेनेसिद्धिं परां प्राप्तांसगर्वोवाक्यमब्रवीत्

अहो तपःप्रभावोऽयं प्राप्ता सिद्धिर्मयाद्य वै ।
मत्तुल्यो नास्ति वै विप्रो येन सिद्धिः समागता ॥ ७ ॥

शरीरं कुत्सितं चेदंमलमूत्रेण संयुतम् । मज्जस्नायुवसापृक्तमांसशोणितपूरितम्

हर्षेण महता युक्तः स ननर्त्त द्विजस्तथा ॥ ८ ॥
एतस्मिन्नृत्यति विप्रे जगत्स्थावरजङ्गमम् ।
अनृत्यद्रागसंयुक्तं प्रभावात्तस्य वै मुनेः ॥ ९ ॥
न स्वाध्यायो वषट्कारः कर्मकाण्डो न च क्वचित् ॥ १० ॥

एतस्मिन्नन्तरे देवा ब्रह्मविष्णुपुरःसराः । मामूचुर्विस्मिताः सर्वे नाथ नृत्यंतदाकुरु
ऋषौ मङ्कणके देव नृत्यति नृत्यति सर्वतः । सदेवासुरमानुष्यं सर्वंलोकत्रयंविभो

चलिताः पर्वताः स्थानात्क्षुभिता मेघपङ्क्तयः ।
शिखराणि विशीर्यन्ते धरणी पीडिता भृशम् ॥ १३ ॥
स्रोतोमात्रा महानद्यो ग्रहा उन्मार्गतः स्थिताः ॥ १४ ॥
त्रैलोक्यं व्याकुलीभूतं यावन्नायाति सङ्क्षयम् ।
तावन्निवारयस्वैनं नान्यः शक्तो विना त्वया ॥ १५ ॥

तेषांतद्वचनंश्रुत्वा त्रिदशानां यशस्विनि । प्रतिज्ञातंमयात्यर्थंगत्वा तस्यसमीपतः

द्विजरूपं समास्थाय मया पृष्टो द्विजोत्तमः ।
किमर्थं नृत्यसि ब्रह्मन्कस्मात्ते हर्ष आगतः ॥ १७ ॥

विरुद्धमृषिधर्माणां कामरागेण नर्त्तनम् । गीतं च नर्त्तनंचैव युवतीजनवल्लभम् ॥
ब्राह्मणस्य तपोभ्रंशः सदाचारस्यसत्तम । इति मत्वा द्विजश्रेष्ठकिमर्थंनृत्यसेभृशम्

ऋषिरुवाच

किं न पश्यसि भो ब्रह्मन्कराच्छाकरसं च्युतम् ।
अत एव हि मे नृत्यं सिद्धोऽहं नात्र संशयः ॥ २० ॥

तस्य तद्वचनं श्रुत्वाहासोऽतीवमयाकृतः ।अङ्गुष्ठताडितःस्वीयोऽङ्गुल्यग्रेणचपार्वती

ततो विनिर्गतं भस्म तत्क्षणाद्धिमपाण्डुरम् ।
हासेनोक्तो विशालाक्षि! सगर्वो ब्राह्मणो मया ॥ २२ ॥

पश्य मेऽङ्गुष्ठतोब्रह्मन्भूरि भस्मविनिर्गतम् । न नृत्येऽहं न मे हर्षस्तथापिमुनिसत्तम
तद्दृष्ट्वा महदाश्चर्यं लज्जितो द्विजसत्तमः । धैर्यञ्च तादृशं दृष्ट्वा विस्मयं परमंगतः ॥

अब्रवीत्प्राञ्जलिर्भूत्वा विस्मितेनान्तरात्मना ।
नान्यं देवमहं मन्ये त्वां मुक्त्वा वृषभध्वजम् ॥ २५ ॥

नान्यस्य विद्यते शक्तिरीदृशी भुवनत्रये । तस्मात्क्षमस्वदेवेशमयाज्ञानादनुष्ठितम्
तपःक्षयकरं कर्म विरुद्धं तत्सनं सताम् । बहुकालार्जितं पुण्यं तपसा दुष्करेण तु ॥

तद्गतं सहसा देव! मदीयं नर्त्तनेन तु ॥ २७ ॥

तस्य तद्वचनं श्रुत्वा मयोक्तो द्विजसत्तमः । वरं वरय भद्रं ते तुष्टोऽहं द्विजसत्तम

ज्ञानेनानेन विप्रेन्द्र!कं ते कामं करोम्यहम् ॥ २९ ॥

ऋषिरुवाच

यदिदेवप्रसन्नस्त्वंशरणागतवत्सल । यथा न स्यात्तपोहानिस्तथानीतिर्विधीयताम्

मया प्रोक्तं प्रसन्नेन तस्य विप्रस्य पार्वति! ।
तपस्ते वर्द्धतां विप्र! महाकालवनं व्रज ॥ ३१ ॥

तत्रास्ते सर्वदा पुण्या सप्तकल्पोद्भवागुहा । पिशाचेश्वरदेवस्य उत्तरेणव्यवस्थिता
तत्र द्रक्ष्यसि यल्लिङ्गं सप्तकल्पोद्भवंशुभम् । तस्य दर्शनमात्रेण तपस्ते वृद्धिमेष्यति
कामक्रोधोद्भवंपापंलोभमोहसमन्वितम् । ईर्ष्यामत्सरजंचैवनाशं यातिचकिल्बिषम्
मदीयंवचनं श्रुत्वा स विप्रो वेदपारगः । श्रुत्वा च नियमं देवि मदुक्तं स ततोद्विजः

निस्सृतो नियतो भूत्वा नमस्कृत्य पुनः पुनः ।
आजगाम गुहा यत्र महाकालवनोत्तमे ॥ ३६ ॥

ददर्श तत्र तल्लिङ्गं तपसो वर्द्धनं परम् । द्वादशादित्यसङ्काशो जातो वै लिङ्गदर्शनात्
एतस्मिन्नन्तरे देवि देवैरुक्तं नभस्तले । गोप्यं लिङ्गं गुहोत्थं तु दृष्टं मङ्कणकेन तु

सिद्धिः प्राप्ता द्विजेनैव दर्शनेन सुदुर्लभा । तस्माद्गुहेश्वरो देविभविष्यति महीतले
भक्त्या परमयोपेता ये द्रक्ष्यन्ति गुहेश्वरम् ।
न तेषां जायते विघ्नो धर्मस्य तपसस्तथा ॥ ४० ॥
अष्टम्यांवाचतुर्दश्यांदर्शनंयः करिष्यति । ब्रह्मलोकं गमिष्यन्ति पितरस्तस्यदेहिनः
अत्रागत्य प्रयत्नेन दर्शनं यः करिष्यति । उद्धरिष्यति मात्मानं पुरुषानेकविंशतिम्
कृत्वा पापसहस्राणि दर्शनं यः करिष्यति ।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ४३ ॥
ब्रह्महत्या सुरापानंस्तेयंगुर्वङ्गनागमः । दर्शनात्तस्य लिङ्गस्यसर्वंयास्यतिसङ्क्षयम्
यत्किञ्चिदशुभं कर्म जन्मकोटिशतार्जितम् ।
क्षयं यास्यति तत्सर्वं स्पर्शमात्रेण नान्यथा ॥ ४५ ॥
महापातकयुक्ता हि देहिनो ये महीतले । तेऽपि लिङ्गंसमासाद्य मुच्यन्तेसर्वपातकैः
इत्युक्त्वा स द्विजो देवि! दिव्यो मङ्कणको मुनिः ।
कृत्वाश्रमपदं पुण्यं तत्रैव तपसि स्थितः ॥ ४७ ॥
एष वै कथितो देवि! प्रभावः पापनाशनः । श्रवणात्कीर्त्तनाद्वापिसर्वपापैःप्रमुच्यते
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये गुहेश्वरमाहात्म्यवर्णनं नाम
द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोध्यायः

ढुण्ढेश्वरमाहात्म्यवर्णनम्

श्रीरुद्र उवाच

ढुण्ढेश्वरं तृतीयं तु सुखस्वर्गफलप्रदम् । सर्वपापहरं लिङ्गं नृणां दुष्कृतनाशनम्
ढुण्ढश्चासीत्पुरा देवि कैलासेगणनायकः । स च कामीदुराचारोव्यसनोपहतेन्द्रियः
गतोऽसौ शक्रलोकं तु कौतुकार्थं यदृच्छया ।
यत्र नृत्यति सा रम्भा शक्रस्याग्रे विवृण्वती ॥ ३ ॥
भावान्बहुविधान्रम्यान्दृष्टिहस्तादिकाञ्छुभान् ।
सूचीविद्धादिकरणान्पताकादिकहस्तकान् ॥
नृत्यं हस्तादिसंयुक्तं लयतालानुगं तथा ॥ ४ ॥
शक्रोऽपि त्रिदशैः सार्द्धं तन्मुखासक्तलोचनः । बभूव हृष्टचेतावै हर्षिताङ्गरुहाननः
एतस्मिन्नन्तरे देवि! ढुण्ढस्तल्ललितेन तु । कामरागवशेनैव भावयर्थेन च मोहितः
तेन रङ्गरता रम्भा पुष्पगुच्छेन ताडिता । स शप्तोवासवेनैव दृष्ट्वाऽन्यायं गणस्य तु
पत त्वं मानुषंलोकं रङ्गभङ्गस्त्वया कृतः । इति शप्तो गणो देवि शक्रेणामिततेजसा
पतितो मानुषे लोके विसञ्ज्ञो विह्वलेन्द्रियः ।
काद्रिग्भूतो हतोत्साहो विललाप पुनः पुनः ॥ ६ ॥
अहोऽन्यायफलं प्राप्तंमयामोहादनुष्ठितम् । तस्मान्नीतिर्विधातव्या पुरुषेणविजानता
न्यायमार्गं समाश्रित्य येन सिद्धिर्भवेन्मम ॥ ११ ॥
इत्युक्त्वा स तपस्तेपे महेन्द्रे पर्वतोत्तमे । श्रीशैले मलये विन्ध्ये पारियात्रेयमालये
नो सिद्धोऽसौ यदा देवि! तदा गङ्गामहत्तटम् ।
यमुनां चन्द्रभागां च वितस्तां नर्मदां नदीम् ॥ १३ ॥
गोदावरीं भीमरथीं कौशिकीं शारदां शिवाम् ।

चर्मण्वतीं समासाद्य स्नात्वा त्यक्तक्रियोऽभवत् ॥ १४ ॥

तीर्थं व्यर्थं तपो व्यर्थं तीर्थयात्राफलं यतः । न प्राप्तश्च मयाभीष्टमटता कर्मभूमिषु

एतस्मिन्नन्तरे देवि वागुवाचाशरीरिणी । आश्वासयन्ती गणपं महाकालायने व्रज

प्रयागाद्यानि तीर्थानि पृथिव्यां यानि सन्ति वै ।

सदा सिद्धिकरं तेषां महाकालं विशिष्यते ॥ १७ ॥

तत्रास्ते सुमहापुण्यं लिङ्गं सर्वार्थसाधकम् ।

पिशाचेश्वरसान्निध्ये तमाराधय सत्वरम् ॥ १८ ॥

प्रसादात्तस्य लिङ्गस्य पुनर्यास्यसि शङ्करम् ।

लोकं तेजस्विनां गम्यं दुर्लभं पापिनां सदा ॥ १९ ॥

इति श्रुत्वा ततो वाणीमाकाशस्थां गणस्तदा ।

आजगाम मुदा युक्तो महाकालवनोत्तमे ॥ २० ॥

ददर्श तत्र तल्लिङ्गं सर्वसम्पत्करं शुभम् । पूजयामास देवेशं भक्त्या परमया युतः

लिङ्गमध्यात्ततो वाणी निःसृता पर्वतात्मजे! ।

अहो तुष्टोऽस्मि ते वत्स! किंकामं प्रददाम्यहम् ॥ २२ ॥

दुण्ढ उवाच

यदि तुष्टोऽसि देवेश! शरणागतवत्सल । त्वत्पादपङ्कजे भूयाद्भक्तिर्मेऽविचला सदा

वरमेनं प्रयच्छाऽऽशु यदि तुष्टो महेश्वरः ॥ २४ ॥

ये च त्वां मानवा देव पश्यन्तिपरमेश्वर । पापात्सद्योविनिर्मुक्तास्ते भवन्तुमहीतले

दुण्ढस्य भाषितं श्रुत्वा लिङ्गेनोक्तं यशस्विनि! ।

ये च मां पूजयिष्यन्ति श्रद्धया परया पुनः ॥

ते भविष्यन्ति सततं सदा पातकवर्जिताः ॥ २६ ॥

लप्स्यन्ति ते परान्कामान्भविष्यन्ति गणोत्तमाः ।

पूज्याः सर्वेषु लोकेषु सर्वालङ्कारभूषिताः ॥ २७ ॥

एवं लब्धवरो दुण्ढः प्राञ्जलिः पुनरब्रवीत् । मन्नाम्नाप्रथितंलिङ्गं सम्भूयाद्भुवनेसदा

एवमस्त्विति लिङ्गेनप्रोक्तं तुष्टेन पार्वति! । तदाप्रभृतिविख्यातोदेवो दुण्ढेश्वरःपरः

यस्य दर्शनमात्रेण सदा सिद्धिर्भवेन्नृणाम् ॥ ३० ॥

भक्त्यायेपूजयिष्यन्तिदेवंदुण्ढेश्वरंपरम् । आजन्मप्रभवंपापं तेषांयास्यतितत्क्षणात्

स एव सुकृती लोके स एव ममवल्लभः । यःपश्यतिनरोभक्त्यालिङ्गं दुण्ढेश्वरंपरम्

राजसूयशतेनैवयत्पुण्यं च भविष्यति । ततोभविष्यत्यधिकं दुण्ढेश्वरनिरीक्षणात्

मानसं वाचिकं वापि कायिकं गुह्यसम्भवम् ।

प्रकाशं वाऽप्रकाशं च प्रसङ्गादपि यत्कृतम् ॥

तत्सर्वं यास्यति क्षिप्रं दुण्ढेश्वरस्य दर्शनात् ॥ ३४ ॥

इत्युक्तस्तुमया देविसदुण्ढोगणनायकः । कृतो लिङ्गस्य माहात्म्याद्गतोलोकेमदीयके

रेजे च गणपः श्राद्धं ममाभीष्टतरोऽभवत् ॥ ३५ ॥

एष ते कथितो देवि प्रभावः पापनाशनः । श्रवणात्कीर्त्तनाद्वापि ममलोके महीयते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे

चतुरशीतिलिङ्गमाहात्म्ये दुण्ढेश्वरमाहात्म्यवर्णनं नाम

तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

डमरुकेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

ख्यातोऽवन्त्यां चतुर्थोऽसौ देवो डमरुकेश्वरः ।

दृष्टे यस्मिञ्जगन्नाथे याति पाप च सङ्क्षयम् ॥ १ ॥

पुरा वैवस्वते कल्पे रुरुर्नाममहासुरः । तस्य पुत्रो महाबाहुर्वज्रोनाम महाबलः ॥

बभूव स महाकायस्तीक्ष्णदंष्ट्रो भयङ्करः ॥ २ ॥

तेन देवाः स्वाधिकाराच्चालितास्त्रिदशालयात् ॥ ३ ॥

ततो नातं धनं तेषां ब्रह्माणं ते ततोययुः । ब्रह्मापिभयसम्विग्नोबभूवाकुलितेन्द्रियः ज्ञात्वावध्यंसुरैः सार्धं सर्वैं सोऽथ महाबलः । तेषुनष्टेषुयेविप्रायज्वानोऽथतपस्विनः

ताञ्जघान स दुष्टात्मा ये चान्ये धर्मचारिणः ॥ ५ ॥

निःस्वाध्यायवषट्कारं तदासीद्धरणीतलम् । नष्टयज्ञोत्सवं देवि हाहाभूतमचेतनम् ततः प्रव्यथिता देवास्तथा सर्वे महर्षयः । समेत्यामन्त्रयन्मन्त्रंवधार्थं तस्य दुर्मतेः ततः कायोऽभवत्सद्यः सर्वेषां पुरतस्तदा । तेषांचिन्तयतांदेवि तेजःपुञ्जेनचावृतः

तस्मात्कृत्या समुत्पन्ना दिव्या कमललोचना ।

द्योतयन्ती दिशः सर्वाः स्वतेजोभिः समन्ततः ॥ ६ ॥

साऽब्रवीत्त्रिदशान्सर्वान्कस्मात्सृष्टा ह्यहं सुराः! ।

यत्कर्त्तव्यं मया कर्म तच्छीघ्रं संनिवेद्यताम् ॥ १० ॥

ततस्तु त्रिदशाः सर्वे श्रुत्वा तस्याः शुभा गिरः ।

आचख्युः सकलं तस्यै तदा वज्रस्य चेष्टितम् ॥ ११ ॥

श्रुत्वाजहाससादेवी साट्टहासं मुहुर्मुहुः । तस्याहसंत्यानिःसस्रुकन्याःकमललोचनाः पाशाङ्कुशधरा रौद्रा ज्वालामालावृताननाः । फेत्कारेणचसंनादैश्चालयंत्यश्चराचरम् गताःसर्वामहादेवि यत्र वज्रो महासुरः । युद्धं तु तुमुलंजातं ताभिस्तस्य भयावहम् शस्त्रास्त्रैर्बहुधामुक्तैर्व्याप्तं चैव दिगन्तरम् । संनद्धाखिलसैन्यास्ते युयुधुः समरेभृशम् ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् । ततो मातृगणंक्रुद्धं मर्दयन्तं महासुरान् ॥

पराङ्मुखं बलं दृष्ट्वा वज्रो मायामथासृजत् ॥ १६ ॥

तामसीं नाम दुःसाध्यां यया मुह्यन्ति कन्यकाः ॥ १७ ॥

तमोभूतेततस्तस्मिन्सादेवीभयविह्वला । ताभिःसार्द्धंसमायाता महाकालवनोत्तमम् कपालवान्हरोयत्र लिङ्गाकारेणसंस्थितः । ज्ञात्वामातृगणंनष्टं ततो मायाप्रभावतः

वज्रोऽपि त्रिदशाञ्ज्ञात्वा देव्या सार्द्धमथोषितान् ।

आजगाम तमुद्देशं स्वसैन्यपरिवारितः ॥ २० ॥

महाकालवने दिव्ये रथकोटिशतैर्वृतः । समन्ताच्च वनं देवि!तत्क्रुद्धो वाक्यमब्रवीत् अद्य देवान्हनिष्यामि तया सार्कं सुदुष्टया । कन्याभिःसह या नष्टा तमोमायाबलेन तु एतस्मिन्नन्तरेकाले नारदोमुनिसत्तमः । सोत्सुकस्तु समायातो मन्दरे चारुकन्दरे

कथयामास देवानां वज्राद्देवपराभवम् ॥ २४ ॥

महाकालवने देव ताडितास्त्रिदशाः प्रभो!। वज्रेण रुरुपुत्रेण तस्माद्याहि महेश्वर ॥ नारदस्य वचः श्रुत्वा ततोऽहं परमेश्वरि । मन्दरादागतस्तूर्णं कृत्वा रूपं सुभैरवम् सर्पैर्लसद्भिरत्युग्रैर्भीषणैर्गणसंवृतः । अग्रे दृष्टं महत्सैन्यं दानवानां भयावहम् ॥ महाकालवनं रुद्धं समन्तादसुरेण तु । वज्रेण रुरुपुत्रेण दुःसहेन यशस्विनि ॥ २८॥

तदागत्य मया ताड्य रौद्रं डमरुकं तथा ।

मोहितं सहसा सैन्यं वज्रस्यैव दुरात्मनः ॥ २६ ॥

डमरुकस्य नादेन ह्युत्थितं लिङ्गमुत्तमम् । विदार्यवसुधांदेवि ज्वालामालाकुलंतदा

तस्य लिङ्गस्य च तदा महाज्वाला विनिर्गता ।

एकदेशाद्वरारोहे ब्रह्माण्डव्यापिनी तथा ॥ ३१ ॥

लिङ्गस्यान्यप्रदेशात्तु वायुः समभवन्महान् ॥ ३२ ॥

तेजोज्वालासमूहेन वातेन प्रेरितेनच । सहचक्रेण तत्सैन्यं दग्धं भस्मत्वमागतम् ॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः । नमश्चक्रुर्हते तस्मिन्रुरुपुत्रे महाबले ॥ ३४॥ अस्य देवस्य माहात्म्याद्दग्धोवज्रो महाबलः। ससैन्योऽभूत्ततस्तस्मादेषडमरुकेश्वरः

ख्यातिं यास्यति लोकेऽस्मिन्सर्वकामफलप्रदः ॥ ३५ ॥

डमरुकस्य तु नादेन जातोयस्मान्महीतले । अतःपूज्यवरोदेवो भविष्यतिनसंशयः दृष्ट्वाये पूजयिष्यन्ति देवं डमरुकेश्वरम् । ते सर्वेदुःखनिर्मुक्ता भविष्यन्तिगतज्वराः

चान्द्रायणानां विधिवच्छतानामथ यत्फलम् ।

तत्फलं समवाप्नोति डमरुकेश्वरपूजनात् ॥ ३८ ॥

अस्मिन्स्थाने स्थितं लिङ्गं भक्त्या डमरुकेश्वरम् ।

प्रसङ्गादपि पश्यन्ति ह्यपि पापपरा नराः ॥ ३६ ॥

तेऽप्यवश्यं तु यास्यन्ति रुद्रलोकं सनातनम् ।
भक्ताः स्तोष्यन्ति ये लिङ्गं ख्यातं डमरुकेश्वरम् ॥ ४० ॥
मानसैः पातकैर्मुक्ता यास्यन्ति परमं पदम् । अश्वमेधसहस्रं तु वाजपेयशतं भवेत् ।
गोसहस्रफलं चात्र दृष्ट्वा प्राप्स्यन्ति मानवाः ॥ ४१ ॥
यो याति सङ्गरे धीरो दृष्ट्वा डमरुकेश्वरम् । जयेद्रिपूनथान्ते स रुद्रलोके महीयते ।
एष ते कथितो देवि प्रभावः पापनाशनः । स्तुतस्तु कीर्तितश्चैव सर्वाभीष्टफलप्रदः ।

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये डमरुकेश्वरमाहात्म्यवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

अनादिकल्पेश्वरमहिमवर्णनम्

श्रीरुद्र उवाच

अनादिकल्पेश्वरं देवं पञ्चमं विद्धि पार्वति! । सर्वपापहरं नित्यमनादिर्गीयतेसदा
कल्पस्यादौपुरादेविलिङ्गमेतद्विनिर्गतम् । यदानाग्निर्नचादित्योनभूमिर्नदिशोनखम्
न वायुर्न जलं चैव न द्यौर्नेन्दुर्ग्रहा न च । न देवासुरगन्धर्वा न पिशाचा न राक्षसाः
अतो लिङ्गात्समुद्भूतं जगत्स्थावरजङ्गमम् ।
कालेन च लयं याति लिङ्गेऽस्मिन्पर्वतात्मजे! ॥ ४ ॥
अस्माल्लिङ्गात्समुद्भूतावंशादेवर्षिपितृकाः । मन्वन्तराणिवंशानिवंश्यानुचरितंचयत्
यावन्तः सृष्टयश्चैव यावन्तः प्रलयास्तथा । समुद्राः पर्वताश्चैव निम्नगाःकाननानिच
भूर्लोकाद्याश्च ये लोकाः पातालाः सप्त ये स्मृताः ।
गतिस्तथार्कसोमादिग्रहर्क्षज्योतिषामपि ॥ ७ ॥
दृश्यादृश्यं च तत्सर्वमतो लिङ्गाद्वरानने! । अनादिकारणं यत्तदव्यक्ताख्यं महर्षयः ॥

यदाहुः पुरुषं सूक्ष्मं नित्यं सदसदात्मकम् ॥ ८ ॥
ध्रुवमक्षयमजरममेयं नान्यसंश्रयम् । गन्धरूपरसैर्हीनं शब्दस्पर्शविवर्जितम् ॥ ९ ॥
अनाद्यन्तं जगद्योनि त्रिगुणप्रभवाव्ययम् । असाद्दृश्यमविज्ञेयंलिङ्गं प्रोक्तं महर्षिभिः
प्रलयस्यान्ते तेनेदं दिव्यमासीदशेषतः ॥ ११ ॥
अहमुर्व्यां प्रबुद्धस्तु जगदादिरनादिमान् । सर्वहेतुरचिन्त्यात्मा परःकोऽप्यपरक्रियः
प्रकृतिं पुरुषं चैव प्रदर्श्याशु जगत्पतिः । क्षोभयामास योगेन परेण परमेश्वरः ॥
यथा संनिधिमात्रेण गन्धः क्षोभाय जायते । मनसो नोपकर्तृत्वात्तथासौ परमेश्वरः
अनादिः कथ्यते देवो जगत्कारणतत्परम् ॥ १४ ॥
प्रधानं क्षोभ्यमाणं तु तेन लिङ्गेन पार्वति । जायतेभुवनाधारोब्रह्माण्डइति विश्रुतः
यस्मिन्नण्डे जगत्सर्वंसदेवासुरमानुषम् । उत्पन्नंचविलीनंचयस्यान्तोऽपिनलभ्यते
स एव क्षोभकः पूर्वं स क्षोभ्यः पृथिवीपतिः ।
स सङ्कोचविकासाभ्यां प्रधानत्वे व्यवस्थितः ॥ १७ ॥
उत्पन्नः स जगन्नाथो निर्गुणोऽपि रजोगुणः ।
भुञ्जन्प्रवर्तते सर्गं ब्रह्मत्वं समुपागतः ॥ १८ ॥
ब्रह्मत्वे सृजते लोकांस्ततःसत्त्वातिरेकतः । विष्णुत्वमेत्यधर्मेणकरोतिपरिपालनम्
ततस्तमोगुणोद्रिक्तोरुद्रत्वेनाखिलंजगत् । उपसंहृत्यवैशेतेत्रैलोक्यंत्रिगुणोऽगुणः
यथा प्राग्वापकः क्षेत्री पालको लावकस्तथा ।
स संज्ञां याति तद्वच्च ब्रह्मविष्णुत्वरुद्रताः ॥ २१ ॥
ब्रह्मत्वे सृजते लोकान्रुद्रत्वे संहरत्यपि ।
विष्णुत्वे पाति तान्सर्वांस्तिस्रोऽवस्थाः स्मृताः सदा ॥ २२ ॥
रजो ब्रह्मा तमो रुद्रः सत्त्वं विष्णुर्जगत्पतिः ।
एत एव त्रयो वेदा एत एव त्रयो नराः ॥ २३ ॥
कल्पे कल्पे ह्यनादिस्तु गीयते त्रिदशैः सदा ।
पितृभिश्च गणैः सिद्धैरतोऽनादिकल्पेश्वरः ॥ २४ ॥

नाम प्राप्तं विशालाक्षि महाकालवनं सदा। यदाजातो विवादस्तु ब्रह्मणःकेशवस्य च

अहं ज्यायानहं ज्यायान्कल्पादौ सृष्टिकारणात्।

दिव्या समुत्थिता वाणी निरालम्बा तदाम्बरात्॥ २६॥

महाकालवने लिङ्गं कल्पेश्वरेतिसञ्ज्ञकम्। तस्यादिमथवान्तं च यःपश्यतिसचप्रभुः

भविष्यति न संदेहो न वादः क्रियतामिति॥ २७॥

ततो देवि! गतो ब्रह्मा ऊर्द्ध्वलोकमनन्तकम्।

अधोलोकं गतो विष्णुस्तेन वाक्येन सत्वरम्॥ २८॥

नादिर्दृष्टो न चान्तश्च ब्रह्मणा केशवेन तु। तदा तौ विस्मयापन्नौतुष्टुवातेपरस्परम्

वेदोक्तसूक्तैर्विविधैरभिन्नयपुरःस्थितौ। नादिरस्तिन चान्तश्च न चकल्पोऽत्रदृश्यते

तस्मादनादिकल्पोऽयमद्यप्रभृतिभूतले।

ख्यातिंयास्यतिनाम्नाचमहाकालवनोत्तमे॥ ३१॥

पञ्चपातकसंयुक्तो योमर्त्यो दुष्टमानसः।

सोऽपिगच्छेच्छिवं दृष्ट्वाऽनादिकल्पेश्वरं शिवम्॥ ३२॥

शिवमस्तु सदा तेषां येषां त्वं दर्शनं गतः। तेधन्या मानुषेलोकेयेत्वांशरणमागताः

सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः। तत्सर्वमधिकं देव लभ्यतेतवदर्शनात्

तावत्पतन्ति संसारे सुखदुःखसमाकुले। तावन्न दृश्यते देव संसारार्णवतारकः॥

यदा पापक्षयः पुंसां तदा त्वद्दर्शनं भवेत्॥ ३६॥

ब्रह्महा वा सुरापो वा स्तेयी च गुरुतल्पगः।

तत्संसर्गी नरो यस्तु महाकिल्बिषकारकः।

सोऽपि याति परं स्थानं पुनरावृत्तिवर्जितम्॥ ३७॥

यत्फलं चाश्वमेधेन राजसूयेन यत्फलम्। तत्फलं समवाप्नोति तव देवसमर्चनात्

ते नराः पशवो लोके तेषां जन्म निरर्थकम्।

यैर्न दृष्टो महादेवोऽनादिकल्पेश्वरः शिवः॥ ३९॥

इत्युक्त्वा केशवो देवो ब्रह्माचैववरानने। वामेदक्षिणभागेचतस्यलिङ्गस्यसंस्थितौ

एष ते कथितो देवि! प्रभावः पापनाशनः। यस्य श्रवणमात्रेण लभ्यते परमं पदम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्येऽनादिकल्पेश्वरमाहात्म्यवर्णनं-
नाम पञ्चमोऽध्यायः॥ ५

षष्ठोऽध्यायः

स्वर्णजालेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

स्वर्णज्वालेश्वरं षष्ठं विद्धि चात्र यशस्विनि!।

यस्य दर्शनमात्रेण धनवानिह जायते॥ १॥

पुरा सार्द्धं त्वया देवि! क्रीडतो मम मन्दिरे। जातं वर्षशतं दिव्यं सुरतैकरसस्य च

देवैः सर्वैस्ततो वह्निः प्रेरितो मम सन्निधौ।

ततो वह्निः समायातस्त्रैलोक्यार्थे यशस्विनि!॥ ३॥

ततो वह्निमुखेक्षिप्तं वीर्यं स्वं क्रीडतामया। दह्यमानस्तदा तेन गङ्गां वह्निर्जगाम ह

तत्र गत्वा प्रचिक्षेपवीर्यमग्निः सुदुर्द्धरम्। तथापि दह्यते वह्निर्वीर्यशेषेण पार्वति॥

जातं रम्यंततो दिव्यं वीर्यशेषेण काञ्चनम्। ज्वलन्तंचातितापेन दुःसहं दुर्द्धरं प्रिये

अग्नेरपत्यं प्रथमं दृष्ट्वोत्पन्नं तु पार्वति!। लोभाभिभूता असुराः सुरा गन्धर्वकिन्नराः

यक्षाः साध्याः पिशाचाश्च मनुष्या राक्षसाः खगाः।

अभ्यधावन्सुसंरब्धास्ते सुवर्णजिघृक्षवः॥ ८॥

सुवर्णार्थे महान्नादोममेदमिति जल्पताम्। अज्ञानात्सङ्गरश्चैव सञ्जातः प्राणहारकः

अथावरणमुख्यानि नानाप्रहरणानि च। प्रगृह्याभ्यनदन्नादैर्देवैः सार्द्धं यशस्विनि॥

असुरा असुरैः सार्द्धं मनुष्या मानुषैःसह।

गन्धर्वाः सह गन्धर्वैः किन्नरैः सह किन्नराः ॥ ११ ॥
भूतैः सार्द्धं च भूतानि राक्षसैः सह राक्षसाः ।
वेतालैः सह वेताला युद्धं चक्रुः सुदारुणम् ॥ १२

पुत्रस्तु पितरं द्वेष्टि पिता पुत्रं तथैवच । हन्तिभार्यास्वभर्त्तारंभर्ताचस्वांप्रियांतथा
मातरंस्वसुतोहन्तिमातापुत्रंहिनस्तिच । ततोवैरविनिर्बन्धःसञ्जातःस्वर्णकारणात्
सुराणामसुराणां च सर्वघोरतरंमहत् । प्रासाश्चविपुलास्तीक्ष्णान्यपतन्तसहस्रशः

तोमराश्चसुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ १५ ॥
सुवर्णार्थे महादेवि! वमन्तो रुधिरं बहु ॥ १६ ॥

असिशक्तिगदाऋष्ट्यो निपेतुर्धरणीतले । छिन्नानिपट्टिशैश्चैव शिरांसियुधिदारुणैः
रुधिरेणावलिप्ताङ्गा निहताश्च परस्परम् । अद्रिणामिवकूटानि धातुयुक्तानि शेरते
हाहाकारः समभवद्भयकृच्च सहस्रशः । अन्योन्यंछिन्दतां शस्त्रैःसुवर्णस्यचकारणात्
परिघैरायसैःपाशैर्वज्रकल्पैश्चमुष्टिभिः । निघ्नतांसमरेऽन्योन्यंशब्दोदिवमिवास्पृशत्
छिन्धिभिन्धिप्रधावत्वंपातयाधिसरेतिच । अश्रूयन्तमहाघोराःशब्दास्तत्रसमन्ततः
एवं तु तुमुले युद्धे वर्त्तमाने महाभये । कम्पिता धरणी देवि! देवास्त्रस्ताःसवासवाः
क्षुभ्यन्ति स्म समुद्राश्च चेलुश्चधरणीधराः । तस्यार्थेपीडितंसर्वंसदेवासुरमानुषम्
ऋषयो बालखिल्याद्यादेवाःशक्रपुरोगमाः । बृहस्पतिंपुरस्कृत्यब्रह्मलोकंगताःस्त्रियः

सोच्छ्वासाःकथयामासुर्जर्जरीकृतमस्तकाः ।
वृत्तान्तं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ २५ ॥
तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ।
चिन्तयित्वा च तैः सार्द्धमाजगाम ममान्तिकम् ॥ २६ ॥

मया पृष्टास्तुतेसर्वेकेनैतेजर्जरीकृताः । शस्त्रास्त्रैःपीडिताःकेनकस्माद्वोभयमागतम्
कश्चासौ दानवोदुष्टोयेनवैपीडिताभृशम् । तत्सर्वं कथितं देवि ममाग्रे भयविह्वलैः

ते मामूचुस्तदा देवा ब्रह्माद्या भयकारणम् ॥ २९ ॥
लोभात्सर्वे विनष्टाः स्म सुवर्णस्य च कारणात् ।

पीडितं च जगत्सर्वं सदेवासुरमानुषम् ॥ ३० ॥

इति तेषां वचः श्रुत्वा मया ज्ञातंवरानने । तस्यार्थेकलहोघोरः सञ्जातोहिपरस्परम्
लोकत्रयविनाशश्च सहसा येन वै कृतः । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम्
ब्रह्महा वह्निपुत्रस्तु यमुदिश्य मृतो जनः । शरीरं शबलं चैव सविकारं भविष्यति
धातवो हि भविष्यन्तितस्य देहेनसंशयः । लक्ष्यते दुःखमतुलं छेददाहादिघर्षणम्
एतस्मिन्नन्तरे वह्निर्दृष्ट्वापुत्रस्यचेष्टितम् । ज्ञात्वाक्रोधंप्रदीयन्तुभीतोवैपुत्रकारणात्
आजगाम सुवर्णेन सार्द्धं देवि ममान्तिकम् । प्रसादितोऽहं पुत्रार्थे वह्निनाहिवरानने
रक्षणीयस्त्वया देव पुत्रोऽयं तव शङ्कर । भाण्डागारे स्वकीये तु क्रियतां परमेश्वर

त्वयि तुष्टे महादेव! प्राप्योऽयं नात्र संशयः ।
इच्छया दीयतां देवि!यस्य कस्य जनस्य च ॥ ३८ ॥

इति तस्य वचः श्रुत्वापितृदेवमुखस्य च । तथेति चप्रतिज्ञातंमयालोभाद्यशस्विनि
स्नेहान्मया वह्निपुत्रउत्सङ्गे च कृतस्तदा । स्नेहाद्वैचुम्बितोमूर्ध्निपरिष्वक्तःपुनःपुनः
ददामि ते महाभाग वरं वरय शोभनम् । परितुष्टोऽस्मि वै कामं यथेष्टंसमवाप्नुहि
अहमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि । ममाभीष्टकरं स्थानं विद्यतेपृथिवीतले
अक्षयं प्रलये पुत्र महाकालवनंशुभम् । तत्रैव विद्यते लिङ्गं कर्कोटकस्य दक्षिणे ॥
महापापहरं पुत्र दर्शनाद्व्याप्तिदायकम् । तस्य दर्शनमात्रेण कृतकृत्यो भविष्यसि ॥
पुण्यश्चैव पवित्रेण दुर्लभश्च भविष्यति । अकुलीनः कुलीनस्तु समलोनिर्मलोनरः
विरूपो रूपवांश्चैवत्वत्प्रसादाद्भविष्यति । दानानिपरिपूर्णानिव्रतानि नियमास्तथा

यज्ञाश्चैवोपवासाश्च तीर्थं पिण्डादिकं त्वया ।
सुसम्पूर्णा भविष्यन्ति तव दानेन सुव्रत! ॥ ४७ ॥

सर्वेषांचैवरत्नानामाधिपत्यंकरिष्यसि । प्रियाभाग्योहिदेवानांलोकानांचभविष्यसि
इत्युक्तोऽसौ महादेवि दिव्यरूपोवरानने! । ज्वालामालावृतःपुण्योनिर्मलोहिबभूवह

लिङ्गेनोक्तः सुवर्णस्तु दिष्ट्यादिष्ट्येति काञ्चनम् ।
अद्यप्रभृति नाम्ना वै ख्यातिं यास्यसि भूतले ॥ ५० ॥

स्थातव्यंमत्समीपेतुवह्निपुत्रत्वयासदा। अक्षया भविता कीर्त्तिस्त्वदीयाभुवनत्रये
इत्युक्तो देविलिङ्गेन वह्निपुत्रोऽतिनिर्मलः। ज्वालावृततनुर्जातः सूर्यकोटिसमप्रभः
दीप्तिर्लब्धा सुवर्णेन ज्वालामालाकुला तदा।
अतो देवि! सुविख्यातः स्वर्णजालेश्वरः शिवः॥ ५३॥
यस्तमर्चयतो भक्त्या स्वर्णजालेश्वरं शिवम्।
तस्य सञ्जायते देवि! विजयो राज्यमूर्जितम्॥
ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनन्तकम्॥ ५४॥
ज्ञानतोऽज्ञानतो वापि यत्पापं कुरुते नरः। तत्क्षालयति देहोत्थं दर्शनान्नात्र संशयः
यत्फलं पिण्डदानेन गयायां लभते नरः। तत्फलं द्विगुणं प्रोक्तं पूजया नात्र संशयः
गायत्र्याः शतसाहस्रैः सम्यग्जप्तैश्च यत्फलम्।
तत्फलं समवाप्नोति स्वर्णज्वालेश्वरस्तुतेः॥ ५७॥
यत्पुण्यं सर्वदानेन दत्तेन विधिपूर्वकम्। तत्फलं समवाप्नोति कीर्त्तनान्नात्रसंशयः
पूजयन्ति चतुर्दश्यां स्वर्णज्वालेश्वरं तु ये।
पूज्यन्ते ते सदा लक्ष्म्या पूरयन्त्या मनोरथान्॥ ५९॥
रक्षितं त्रिदशैर्देवगणैर्नानाविधैस्तथा। लिङ्गं कश्चिन्नजानातिमम मायाविमोहितः
मम प्रसादात्तद्देवि! दृश्यते लिङ्गमुत्तमम्। एतत्ते कथितं सम्यगन्यच्छृणु वरानने
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽ-
चतुरशीतिलिङ्गमाहात्म्ये स्वर्णज्वालेश्वरमाहात्म्यवर्णनं नाम
षष्ठोऽध्यायः॥ ६॥

सप्तमोऽध्यायः

त्रिविष्टपेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

त्रिविष्टपेश्वरं देवि! सप्तमं पर्वतात्मजे। यस्य दर्शनमात्रेण लभ्यते तत्त्रिविष्टपम्॥
पुरा वाराहकल्पे तु देवर्षिर्नारदोऽमलः। त्रिविष्टपं गतो देवि द्रष्टुकामः शतक्रतुम्
तत्रोद्यानवने रम्ये कल्पवृक्षैर्विराजिते। सर्वत्र कुसुमामोदसुखस्पर्शानिलाकुले॥३॥
वीणावेणुरवैर्घुष्टे देवगन्धर्वसेविते। वज्रेन्द्रनीलवैदूर्यचन्द्रकान्तादिदीपिते॥ ४॥
ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणे शुभे। ददर्श तत्र देवेशमुपविष्टं शतक्रतुम्॥
स्तूयमानं मुदा देवैः सिद्धचारणकिन्नरैः॥ ५॥
पृष्टस्तु नारदो देवि वासवेन महामुनिः। कथयामास माहात्म्यं महाकालवनस्यच
महाकालवनं रम्यं सदानन्दकरं शुभम्। सेव्यं पुण्यं पवित्रं च तीर्थनामुत्तमोत्तमम्
पुण्यं पश्यन्ति ये लोका महाकालवनं शुभम्।
ब्रह्महत्यादिकं पापं तेषां नश्यति निश्चितम्॥ ८॥
स्वयं तिष्ठति देवोऽत्र सर्वभूतगणैर्वृतः। तस्मात्तत्तीर्थमुख्यानांप्रवरं कथ्यते बुधैः
पृथिव्यां नैमिषं पुण्यं सर्वपापप्रणाशनम्।
तस्माद्दशगुणं प्रोक्तं पुष्करं तीर्थमुत्तमम्॥ १०॥
ततो दशगुणं प्रोक्तं प्रयागंसर्वकामिकम्। तस्माद्दशगुणं प्रोक्तंविख्यातममरेश्वरम्
प्राची सरस्वती पुण्या तस्माद्दशगुणा स्मृता।
तस्माद्दशगुणं प्रोक्तं गयाकूपं विशिष्यते॥ १२॥
तस्माद्दशगुणं देवि! कुरुक्षेत्रं विशिष्यते। कुरुक्षेत्राद्दशगुणा पुण्या वाराणसी तथा
तस्या दशगुणं श्रेष्ठं महाकालं विशिष्यते। महाकालवनंशक्र! किल त्रैलोक्यभूषणम्
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च।

लिङ्गानि तत्र विद्यन्ते भुक्तिमुक्तिकराणि च ॥ १५ ॥
शक्तयो नवकोट्यस्तु तस्मिन्क्षेत्रे वसन्ति हि ॥ १६ ॥
कृमिकीटतपङ्गाश्च मृता यत्र ततःक्रतौ । यान्ति दिव्यैर्विमानैश्च रुद्रलोकंसनातनम्
माहात्म्यमद्भुतं श्रुत्वा नारदात्सुरसत्तमः ॥ १७ ॥
सर्वदेवगणैः सार्द्धमाजगाम त्वरान्वितः । वासवः श्रीमहाकालवनं हर्षसमन्वितः ॥
दृष्ट्वा तथाविधं रम्यं महाकालवनंशुभम् । त्रिविष्टपादप्यधिकं प्रलयेऽप्यक्षयंस्मृतम्
विचित्राणि च हर्म्याणि काञ्चनानि शुभानि च ।
प्रासादाः शतशो भौममणिविद्रुमभूषिताः ॥ २० ॥
वज्रेन्द्रनीलरचिता शुद्धस्फटिकसन्निभाः ।
तोरणानि विचित्राणि माणिक्यरचितानि च ॥
दृष्ट्वा तथाविधं रम्यं महाकालवनोत्तमम् ॥ २१ ॥
नारदं प्रशशंसुस्ते सर्वे देवा मुदान्विताः । देवर्षीणां महाप्राज्ञा येनेयं कथिताकथा
न कैलासं गमिष्यामो न च मेरुं तथाविधम् ।
न मन्दरं गमिष्यामो न यास्यामस्त्रिविष्टपम् ॥ २३ ॥
एषामरावतीश्रेष्ठा ह्येषा भोगवती शुभा । एष पैतामहोलोको विष्णुलोकस्तथैवच
एतस्मिन्नन्तरेदेवि शून्यंजातंत्रिविष्टपम् । ज्ञात्वा शून्यमथात्मानंचिन्तयित्वापुनःपुनः
गमनाय मतिं चक्रे कृत्वा देहमथात्मनः ॥ २५ ॥
त्यक्त्वा मां त्रिदशाः सर्वे महाकालवनं गताः ।
अहं तत्रैव यास्यामि यत्र ते त्रिदशा गताः ॥ २६ ॥
इत्युक्त्वा तत्क्षणंप्राप्तो महाकालवनोत्तमे । कौतुकात्सोऽथवैश्रेष्ठंतीर्थंतत्रापिभूतले
ददर्श रमणीयं तैर्देवैः परिवृतं तदा ॥ २७ ॥
एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ।
भोभोस्त्रिविष्टपात्रैव स्वनाम्ना स्थापयस्व माम् ॥
कर्कोटकस्य पूर्वे तु महामायाश्च दक्षिणे ॥ २८ ॥

इत्युक्तो देवदेवेन हृष्टस्तद्गतचेतसा । स्वनाम्ना स्थापयामास देवं त्रिविष्टपेश्वरम् ॥
पूजयित्वा शुभैःपुष्पैरुवाचेदं वरानने! । अद्यप्रभृति भूर्लोको नाम्ना ख्यातिं गमिष्यति
ये त्वां पश्यन्ति यत्नेन अपिदुष्कृतकारिणः ।
ते यास्यन्ति परं स्थानं दिव्यालङ्कारभूषिताः ॥ ३१ ॥
अष्टम्यांचचतुर्दश्यांसङ्क्रान्तौवाविशेषतः ।यःकरिष्यतिपूजांत्वभक्तियुक्तोहिमानवः
विमानवरमास्थाय कामगं रत्नभूषितम् । उदितादित्यसङ्काशं मत्समीपेवसिष्यति
किंदानैर्विविधैर्दत्तैःकिंयज्ञैर्विविधैःकृतैः ।तेप्राप्स्यन्तिफलंसर्वंयेत्वांद्रक्ष्यन्तिभक्तितः
यं यं काममभिध्याय पूजयिष्यन्ति मानवाः ।
तत्तन्मनोरथप्राप्तिर्भविष्यति न संशयः ॥ ३५ ॥
त्रिदशैश्च पुनः प्रोक्तं दृष्ट्वा मल्लिङ्गमुत्तमम् । त्रिविष्टपेनधन्येनस्थापितं देवमीश्वरम्
पूजयिष्यन्ति ये धन्या देवं त्रिविष्टपेश्वरम् ।
तेषां वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥ ३७ ॥
इत्युक्त्वा पूजयामास भूयो लिङ्गं त्रिविष्टपम् ।
सार्द्धं त्रिविष्टपेनैव पुनःस्थानं स्वकं गतः ॥ ३८ ॥
एष ते कथितो देवि! प्रभावः पापनाशनः ।
श्रवणात्कीर्त्तनाद्वापि स्वर्गलोकोऽक्षयो भवेत् ॥ ३९ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये त्रिविष्टपेश्वरमाहात्म्यवर्णनंनाम सप्तमोऽध्यायः ७॥

अष्टमोऽध्यायः

कपालेश्वरमाहात्म्यवर्णनम्

श्रीरुद्र उवाच

कपालेश्वरसञ्ज्ञं च ह्यष्टमं विद्धि पार्वति! । यस्य दर्शनमात्रेण ब्रह्महत्या प्रणश्यति
पुरा वैवस्वते कल्पे त्रेताकाले समागते । महाकालवने दिव्ये यज्ञे पैतामहे प्रिये! ॥
उपविष्टेषु विप्रेषु हूयमाने हुताशने । वेषं कापालिकं कृत्वा गतोऽहं तत्र संसदि ॥

जीर्णकन्थावृतो देवि! मुण्डः खट्वाङ्गधारकः ।
चिताभस्मविलिप्ताङ्गो विकृतो विकृताननः ॥
कपालं च करे कृत्वा कपालकृतभूषणः ॥ ४ ॥

ब्राह्मणाश्चततः क्रुद्धाद्दृष्ट्वामां जालमरूपिणम् । कपालधारिणं सर्वेधिक्छब्दैश्चजगर्हिरे
असकृत्पापपापेति गच्छगच्छ विडम्बिताः । कथंचहोमःक्रियते प्राप्ते कापालिकेपुरः
अकपालानि शौचानि इति देवेषु गीयते । यज्ञवेदिर्न तेऽर्हा तु मनुष्यास्थिधरस्यवै

मया प्रोक्तास्तु ते विप्राः श्रूयतां द्विजसत्तमाः! ।
यूयं कारुणिकाः सर्वे परदुःखेन दुःखिताः ॥ ८ ॥

कर्त्तव्या च दया सद्भिः सर्वदा सर्वदेहिनाम् । सर्वेषामेव जन्तूनां मित्रंब्राह्मणउच्यते
अहं कापालिको विप्रोभस्मभूषितविग्रहः । कापालव्रतमास्थाय चरामिपृथिवीतले
आराधयामि सततं महादेवं जगत्पतिम् । ब्रह्महत्याविनाशाय व्रतं द्वादशवार्षिकम्

अवघ्नं निश्रुतं लोके प्रारब्धं हि मया द्विजाः! ।
प्रायश्चित्तनिमित्तं तु शुद्धो यास्यामि सद्गतिम् ॥ १२ ॥

मदीयं वचनं श्रुत्वा तैःप्रोक्तं द्विजसत्तमैः । अतीव पापिष्ठतरो यो ह्येवंभाषसेऽधम!
कपालैर्भूषितो निन्द्यो विशेषेण तु विग्रहः । नाकारितो महादेवो दक्षयज्ञमहोत्सवे

यस्मिन्यज्ञे समायाता आदित्या वसवस्तथा ।

विश्वेदेवाश्च मरुतो गन्धर्वाःकिन्नरास्तथा ॥ १५ ॥

ब्रह्मा विष्णुः सहस्राक्षो वरुणो वायुरेवच । धनदःसागरा नद्यःसरांसिसकलानिच
सुपर्णा गिरयोनागाःसर्वेचाकारिताःक्रतौ । सानुगास्तेसभार्याश्चब्राह्मणावेदपारगाः

ब्रह्मर्षयो महाभागास्तथा देवर्षयोऽमलाः ।
एवमुक्त्वा महादेवं मानुषास्थिविभूषितम् ॥ १८ ॥

अपवित्रमिति ज्ञात्वा कथंत्वं वक्तुमर्हसि । प्रवेशो दीयतांमह्यं विशेषेणासिब्रह्महा

इत्युक्तोऽहं यदा विप्रैर्मया प्रोक्तं वचस्तदा ।
प्रतीक्ष्यतां मुहूर्तं तु भुक्त्वा यास्याम्यहं पुनः ॥ २० ॥

इत्युक्ते वचने देवि! ताडितोऽहं भृशं तदा । लोष्ठैर्लगुडकैः पादैर्मुष्टिभिश्च पुनः पुनः

अथ प्रहस्य तत्क्षिप्त्वा तां वेदिं दर्भसंस्तृताम् ।
कपालदीपवन्नष्टो न ज्ञातोऽहं द्विजोत्तमैः ॥ २२ ॥

मयि नष्टे कपालं तत्क्षिप्तं मण्डपबाह्यतः । अथान्यत्तत्र संजातं तादृग्रूपं यशस्विनि
एवं शतसहस्राणिप्रयुतान्यर्बुदानिच । तत्रक्षिप्तानिजातानितस्तेविस्मयान्विताः
अथाहुर्ज्ञानिनः सर्वे नेदमन्यस्य चेष्टितम् । ऋते देवान्महादेवाद्गङ्गाचन्द्रार्द्धशेखरात्

ततोऽहं विविधैः स्तोत्रैः स्तुतो विप्रैः पृथक्पृथक् ।
होमं चक्रुश्च ते वह्नौ मन्त्रैश्च शतरुद्रियैः ॥ २६ ॥

अहं तुष्टस्तदा देवि द्विजानामनुकम्पया । व्रियतांब्राह्मणाः सर्वे वरंयन्मनसेप्सितम्
तदा ते ब्राह्मणाः प्रोचुर्यदज्ञानाद्वधस्तव । कृतस्तेन कृतास्माभिर्ब्रह्महत्या जगत्प्रभो
ब्रह्महत्याविनाशाय प्रसादं कुरु नः प्रभो । वरयामो वरं ह्येनं नान्यंवरमभीप्सितम्
द्विजानां च तदा तेषामग्रेकथितवानिदम् । यत्रराशिःकपालानां भवद्भिर्विहितोभुवि
अनादिलिङ्गंतत्रासीच्छन्नंकालविपर्यये । पश्यन्तुविप्रास्तल्लिङ्गंब्रह्महत्याविमोचनम्
कृता मयापिविप्रेन्द्रा ब्रह्महत्यास्वयं पुरा । छिन्दताब्रह्मणःशीर्षंपञ्चमंतेजसोत्कटम्
ब्रह्महत्या ततो जाता ममातीव सुदुःसहा । कपालंचकरे लग्नंतथाचातीवदुःसहम्
दह्यमानस्ततश्चाहं व्याप्तो वै ब्रह्महत्यया । नाशाय सत्वरंतस्याःस्वार्थयात्रामहंगतः

गतः सर्वेषु तीर्थेषु नैव मुक्तस्तु हत्यया । ततोदुःखी सुसन्तप्तोनैवलेभेसुखंकचित्

एतस्मिन्नन्तरे देवी वागुवाचाशरीरिणी ।

गच्छावन्तीं स्वयं नाथ! किमर्थं खिद्यते वृथा ॥ ३६ ॥

महाकालवनं पुण्यं त्वया नाथ! विनिर्मितम् । कपालकरसंस्थानं रुद्रमद्भुतदर्शनम्

न जानासि कथं क्षेत्रं महापातकनाशनम् ॥ ३७ ॥

तस्मिन्क्षेत्रे महल्लिङ्गं गजरूपस्य सन्निधौ । विद्यते पश्य देवेश ब्रह्महत्या प्रणश्यति

ततोऽहमागतस्तूर्णं वाक्यं श्रुत्वा तदोत्तमम् ।

महाल्लिङ्गं मया दृष्टं कपालकरसंस्थितम् ॥ ३६ ॥

मम हस्तात्तदा विप्राः कपालमपतद्भुवि । कपालेश्वरदेवोऽयमिति नाममयाकृतम्

पश्यन्तु विप्रास्तं देवंकपालेश्वरसञ्ज्ञकम् । यस्य दर्शनमात्रेणनिष्कलङ्काभविष्यथ

लिङ्गं दृष्टं तदा तस्तु कपालैर्बहुभिर्वृतम् ।

कृतार्थास्ते तदा जातास्तस्य लिङ्गस्य दर्शनात् ॥ ४२ ॥

अतोऽसौ भुवि विख्यातःकपालेश्वरसञ्ज्ञकः ।

येऽर्चयन्ति महादेवि!कपालेश्वरसञ्ज्ञकम् ॥ ४३ ॥

कृतपुण्या नरा देवि तेयान्ति परमं पदम् । कृत्वाऽपि पातकं घोरं ब्रह्महत्यादिकंनरः

तत्पापं विलयं याति लिङ्गस्यास्य च दर्शनात् ।

कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ।

तत्क्षपयति देवोऽयं चतुर्दश्यां समर्चितः ॥ ४५ ॥

प्रसङ्गादपि ये पूजां करिष्यन्ति वरानने! ।

तेऽपि कामानवाप्स्यन्ति यांश्च कांश्चित्सुदुर्लभान् ।

ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ४६ ॥

निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात् । अतीव पापिनो ये च क्रूरकर्मरतानराः

विपाप्मानो भविष्यन्ति गणेशाश्चममप्रिये । नियमेन प्रपश्यन्ति ये देवं वत्सरंप्रिये

ते पश्यन्ति तनुं त्यक्त्वा मदीयं भवनं प्रियम् ॥ ४८ ॥

एष ते कथितो देवि प्रभावः पापनाशनः । कपालेश्वरदेवस्य स्वर्गद्वारेश्वरं शृणु ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये कपालेश्वरमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

स्वर्गद्वारेश्वरमाहात्म्यवर्णनम्

श्रीरुद्र उवाच

स्वर्गद्वारेश्वरं लिङ्गं नवमं विद्धि पार्वति! । सर्वपापहरं देवि! स्वर्गमोक्षफलप्रदम्

यदा देवि समायाताः कैलासे पर्वतोत्तमे ।

अश्विन्याद्या भगिन्यस्तास्त्वां दृष्ट्वा विस्मयान्विताः ॥ २ ॥

निमन्त्रिता वयं यज्ञे सकान्ताः सपरिग्रहाः । स्नेहेनदेवि तातेन बहुमानपुरःसरम्

कच्चित्स्मृता विशालाक्षि! किं वा तातस्य विस्मृतिः ।

कारणं किं समुद्दिश्य तातेन न निमन्त्रिता ॥ ४ ॥

तासां तद्वचनं श्रुत्वा अवमानात्तदा त्वया । प्राणामुक्तास्तुयोगेनपुरतस्तासुपार्वति

अथ ताः शोकसंतप्तागतायत्रप्रजापतिः । आचख्युःसकलं वृत्तं दक्षस्याग्रे यथातथम्

तच्छ्रुत्वा दारुणं वाक्यं दक्षो नोवाच किञ्चन ॥ ७ ॥

मया दृष्ट्वा यदा देवि भूमौ पञ्चत्वमागता । यज्ञप्रध्वंसनार्थाय तदा वै प्रेरिता गणाः

ते गत्वाऽथगणारौद्राःशतशोऽथसहस्रशः । विरूपा भीषणारौद्रानानाशस्त्रामहाबलाः

मुमुचुः शरवर्षाणि कुर्वन्तो भैरवान् रवान् ॥ ६ ॥

ततो देवगणाःसर्वेवसवःसहभास्करैः । विश्वेदेवाश्चसाध्याश्चधनुर्हस्तामहाबलाः

युद्धाय च विनिष्क्रान्ता मुमुचुः सायकान्सितान् ।

ते समेत्याथ युयुधुः प्रमथा विबुधैः सह । मुमुचुः शरवर्षाणि वारिधारा यथाघनाः

तेषां मध्ये गणो नाम वीरभद्रो महाबलः । स शक्रं ताडयामास शूलेन हृदये तथा
स तु तेन प्रहारेण विसंज्ञो निषसाद ह । अथ मुष्ट्या हतःकुम्भेनागऐरावतस्तथा
स हतः सहसा तेन गजेन्द्रो भैरवान्रवान् । विनदन्भयमास्थाय यज्ञवाटमुपाद्रवत्
एतस्मिन्नन्तरेदेवाःकृतास्तेनपराङ्मुखाः । ततस्तेशरणंजग्मुर्विष्णुं विश्वैकनायकम्

ततः कोपसमाविष्टो विष्णुर्दृष्ट्वा दिवालयान् ।
गणैर्विद्रावितान्सर्वान्मुमोचाशु सुदर्शनम् ॥ १६ ॥

तदापतत्तु वेगेन चक्रं विष्णोः सुदर्शनम् । प्रसार्य वक्त्रं सहसाह्युदरस्थं चकार ह
तस्मिंश्चक्रे तदा ग्रस्ते ह्यमोघे दैत्यसूदने । क्रुद्धो नारायणो देवि! वीरभद्रमुपाद्रवत्
गृहीत्वा पादयोर्भूमौ निजघानातिदूरतः । हन्यमानस्याथ भूमौ गदयाचसुदर्शनम्
रुधिरोद्गारसंयुक्तं वक्त्रात्तच्च विनिर्गतम् । मत्तो लब्धवरो देवि वीरभद्रो गणोत्तमः

न तु पञ्चत्वमापन्नो गदया ताडितोऽपि सः ॥ २० ॥

ततस्तु प्रमथाःसर्वेविष्णुवीर्यबलार्दिताः । कृच्छ्रेणसहसाप्राप्तायत्राहंदेविसंस्थितः

मां दृष्ट्वा शूलहस्तं तु विष्णुश्चान्तरधीयत ।
इन्द्रोऽपि त्रिदशैः सार्द्धं पितृभिर्ब्राह्मणैः सह ॥ २२ ॥

मत्तस्त्रासपरीतात्मा ततश्चादर्शनं गतः । एवं विध्वंसिते यज्ञे नष्टो देवगणो यदा ॥
मया निरूपितो देवि स्वर्गद्वारे गणस्तदा । प्रवेशो नैव दातव्यस्त्रिदशानां गणेश्वर
द्वारावरोधः कर्त्तव्यो यत्नतः शासनान्मम । यःकोऽपिदृश्यतेदेवःसहंतव्योन संशयः

उद्वसश्च ततो जातः स्वर्गो देवा विनिर्जिताः ॥ २६ ॥

स्वर्गद्वारे निरुद्धे तु शक्राद्या भयविह्वलाः। ब्रह्मलोकं गता देवा मन्त्रयित्वापुनःपुनः
तस्याग्रे कथितं सर्वं स्वर्गद्वारावरोधनम् । महेश्वरगणैर्व्याप्तं स्वर्गद्वारं पितामह
प्रवेशो दुर्लभो जातःकृतेद्वारावरोधने । केनोपायेन यास्यामःस्वर्गलोकंतथाविधम्

नास्माकं जायते प्रीतिर्विना स्वर्गं पितामह! ॥ ३० ॥

इति तेषां वचः श्रुत्वाप्रोक्तं तुब्रह्मणा तदा । आराध्यः शङ्करोदेवोमहादेवोजगत्पतिः
स्तुत्योवन्द्योनमस्कार्यःसृष्टिसंहारकारकः। दुर्लभस्तुसुराःस्वर्गोविनातस्यप्रसादतः

गोप्तास्रष्टा समर्थश्च स चास्माकं परा गतिः । सएवाराधनीयस्तुसचपूज्यतमो मतः
तस्मात्सर्वप्रयत्नेन गम्यतां शरणं शिवः । उपायंकथयिष्यामिश्रूयतांसावधानतः
त्रिदशैः सहितः शक्र! तूर्णंगच्छममाज्ञया । महाकालवने रम्ये कपालेश्वरपूर्वतः ॥
स्वर्गद्वारपरं लिङ्गं विद्यते तत्तु वासव! । लोकानामनुकम्पार्थं महादेवेन निर्मितम्

तमाराधयत क्षिप्रं स वः कामं प्रदास्यति ॥ ३६

ब्रह्मणो वचनं श्रुत्वा त्रिदशा मुदिता भृशम् । समायाता महादेवि महाकालवनंतदा
स्वर्गद्वारप्रदं पुण्यं ददृशुर्लिङ्गमुत्तमम् । तस्य दर्शनमात्रेण स्वर्गद्वारमपावृतम् ॥
स्वर्गलोकं गताः सर्वे यथापूर्वंयशस्विनि। निःशङ्कांस्त्रिदशान्दृष्ट्वाविज्ञप्तोऽहंगणैस्तदा
मयाज्ञप्ताश्च ते सर्वे निवर्त्तध्वं गणोत्तमाः । स्वयमेवप्रतिज्ञातं कथंमिथ्याभविष्यति
स्वर्गद्वारप्रदो देवो दृष्टो दैवैर्न संशयः । महाकालवने रम्ये कथितो हि विरञ्चिना

स्वर्गद्वारं गताः सद्यः शक्राद्यास्त्रिदशा गणाः ।
अतःप्रभृति विख्यातः स्वर्गद्वारेश्वरः शिवः ॥ ४२ ॥
ख्यातिं यास्यति भूलोके स्वर्गलोकप्रदायकः ॥ ४३ ॥

येपश्यन्तिनरालोकेस्वर्गद्वारेश्वरंशिवम् । तेयान्तिस्वर्गलोकंहिस्वर्गद्वारेश्वरार्चनात्
स्वर्गद्वारेश्वरं देवं ये पश्यन्ति प्रसङ्गतः । न तेषां भयमस्तीति कल्पकोटिशतैरपि
अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् । तत्पुण्यमधिकं देवि!स्वर्गद्वारेश्वरार्चनात्

जन्मान्तरसहस्रेण यत्पापं पूर्वसञ्चितम् ।
य (त) त्पापं विलयं यान्ति (ति) लिङ्गस्यास्य च कीर्त्तनात् ॥ ४७ ॥

अष्टम्यां वाचतुर्दश्यामथवाचन्द्रवासरे । ये पश्यन्तिनराभक्त्यास्वर्गद्वारेश्वरंशिवम्

ते देवि! मे शरीरं तु प्रविष्टास्त्वपुनर्भवाः ॥ ४८ ॥
दशकोटिसहस्राणितस्मिँल्लिङ्गे तु पूजिते ।
पूजितानि भवन्तीह लिङ्गान्यन्तःस्थितानि तु ॥ ४९ ॥
स्पर्शनात्तस्य लिङ्गस्य कीर्त्तनाद्यजनात्तथा ।
सुखेन स्वर्गमायान्ति यथा कामानवाप्नुयात् ॥ ५० ॥

अकामा वा सकामा वा ये पश्यन्ति दिने दिने ।
तेऽपि पुण्या महाभागाः स्वर्गलोकं प्रयान्ति वै ॥ ५१ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये स्वर्गद्वारेश्वरमाहात्म्यवर्णनं नाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

कर्कोटकेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

कर्कोटेश्वरमञ्जश्च दशमं विद्धि पार्वति! । यस्य दर्शनमात्रेण विषैर्नैवाभिभूयते ॥ १
मात्रा च भुजगाः शप्ताःस्ववचोभङ्गकारणात् । मद्वचोनकृतंयस्माद्भवद्भिःपापकर्मणि
वह्निर्हिधक्ष्यनेयष्मान्सत्रेजन्मेजयस्यहि । श्रुत्वाशापनतो मा मृत्युभीताश्चपन्नगाः
गताः सर्वे यथास्थानं जीवनार्थंयशस्विनि!। हिमशलं गतः शेषस्तपःकर्त्तुं ततःप्रिये
सर्पश्च कम्बलोनाम लोकं पैतामहं गतः । शङ्खचूडोऽथ नागेन्द्रो मणिपूरं गतस्ततः
यमुनाम्भसि सँल्लीनः कालियो भयविह्वलः ॥ ६ ॥
एवं ते सर्पराजानो नागाः सुस्मितशोभने । कुरुक्षेत्रे गताःसर्वे तपश्चर्तुं यशस्विनि
धृतराष्ट्रस्तथा नागः प्रयागमगमत् प्रिये! ॥ ७ ॥
एलापत्रस्तु नागेन्द्रो ब्रह्मलोकं जगाम ह । प्रणम्य तमथोवाच मातुरुत्सङ्गसंस्थिताः
मात्रा शप्ता वयं देव क्रुद्धया तव सन्निधौ । सा कथं शापकाले तु भवतानानिवारिता

ब्रह्मोवाच

निषिद्धानैव ते मात्राभाविकर्मबलान्मम । सर्पसत्रो हि भविताराज्ञोजन्मेजयस्यच
त्वं व्रवत्सममादेशान्महाकालवनंव्रज । शान्त्यर्थंसर्वनागानांभक्त्या युक्तस्तुसत्वरम्

समाराधय देवेशं महामायासमीपतः । भविता तत्र ते सिद्धिर्देवदेवप्रसादतः ॥१२॥
तत्र गत्वाथकर्कोटः स्वयं देवि समाहितः । देवमाराधयामासमहामायापुरःस्थितः
तस्य तुष्टोऽथ देवेशो वरं प्रादाद्यशस्विनि! ॥ १३ ॥
ये दन्दशूकाः क्रूराश्च पापाचारा विषोल्बणाः ।
तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १४ ॥
भक्त्यातवाद्यतुष्टोऽस्मित्वमेसायुज्यतांव्रज। देवेतत्रविलीनोऽथनागःकर्कोटकःप्रिये
कर्कोटकेश्वरः ख्यातस्ततोदेवोमहेश्वरः । तस्यदर्शनमात्रेणव्याधयोयान्तिसङ्क्षयम्
यस्तं पूजयते देवं भक्त्यायुक्तोहिमानवः । ऐश्वर्यं जायते तस्य कुलानांतारयेच्छतम्
व्याधिता व्याधितो मुक्तो दुःखी दुःखात्प्रमुच्यते ।
दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ १८ ॥
नियमेन प्रपश्यन्ति ये च कर्कोटकेश्वरम् ।
ते सर्वकामानाप्स्यन्ति वसन्त्यन्ते च मत्पुरे ॥ १९ ॥
पञ्चम्यांच चतुर्द्दश्यां ये पश्यन्तिरवेर्द्दिने । नतेषांतुकुलेसर्पाःपीडांकुर्वन्तिकर्हिचित्
या नारी दुर्भगासापि सौभाग्यं लभते सदा । गुर्विणीलभतेपुत्रमरोगं कुलभूषणम्
शिशुग्रहाश्च नश्यन्ति नापमृत्युभयं भवेत् ॥ २१ ॥
यंयं काममभिध्यायन्मनसा भक्तिमान्नरः । तंतं दुर्ल्लभमाप्नोति कर्कोटेश्वरदर्शनात्
एष ते कथितो देवि! प्रभावःपापनाशनः ।कर्कोटकेश्वरदेवस्यशृणु सिद्धेश्वरं परम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कर्कोटकेश्वरमाहात्म्यवर्णनं नाम
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

सिद्धेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

लिङ्गमेकादशं विद्धि देवि! सिद्धेश्वरं शुभम् । वीरभद्रसमीपे तु सर्वसिद्धिप्रदायकम्
देवदारुवने पूर्वं विप्रायोगसमन्विताः । स्पर्द्धया सिद्धिलब्ध्यर्थं तपोऽकुर्वतसंयताः
शाकाहारा निराहाराः वर्णाहारास्तथापरे । दन्तोलूखलिनः केचिदश्मकुट्टास्तथापरे
केचिद्वीरासनरता धूम्रपानरताः परे । पादैरूर्ध्वैरधोवक्त्रैः केचिदभ्रावकाशिकाः ॥
कृच्छ्रचान्द्रायणादानि कुर्वन्त्यन्ये समाहिताः ।
न चापि परमा प्राप्ता सिद्धिर्वर्षशतैरपि ॥ ५ ॥
दुःखार्त्ताश्चिन्तयामासुः कथं सिद्धिर्भविष्यति ।
तपसा दुष्करेणैव सिद्धिर्नैवात्र लभ्यते ॥ ६ ॥
व्यर्थाश्रुतिस्तथा जाता या गीतामुनिभिःपुरा । तपसालभतेसर्वंतपोमूलमिदञ्जगत्
अञ्जनं गुटिकाचैवपादुकागमनं तथा । खड्गसिद्धिर्बिलेवासश्चिन्तामणिरपेक्षितम्
एवंतेऽवितयन्सिद्धाःपरमामर्षपूरिताः । उत्सार्यतत्तपोधर्मं नास्तिक्यं भावमागताः
एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ।
आश्वासयन्ती तान्सिद्धान्माता पुत्रमिवौरसम् ॥ १० ॥
माऽवमन्यध्वमार्या हि श्रुतिर्व्यर्थामहीतले । तपोननिन्द्यंधर्मोवाश्रूयतामत्रकारणम्
भविता भवतां सिद्धिरत्र नैव तपोधनाः । स्पर्द्धयासिद्धिकामैश्च तपस्तद्धिकृतंवृथा
कामाच्च तपसोहानिरहङ्काराच्चविस्मयः । क्रोधाल्लोभात्तथा मोहाज्जायतेनात्रसंशयः
स्पर्द्धया रहितो यस्तु कामक्रोधविवर्जितः ।
करोति कर्म भावेन स तपःफलमश्नुते ॥ १४ ॥
वासनावासितो यस्तु एकचित्तःसमाहितः । आस्तिकःश्रद्दधानश्चसतपःफलमश्नुते

मातृवत्परदाराणि परद्रव्याणिलोष्ठवत् । यः पश्यति नरोनित्यं स तपः फलमश्नुते
ईदृशे पुरुषे विप्रास्तपःसिद्धिश्च दृश्यते । भवन्तः स्पर्द्धया चैव कृतवन्तश्च दुष्करम्
तस्माद्वर्षसहस्रेण नैव सिद्धिर्भविष्यति ।
यदि मद्वचनं कार्यं निर्विकल्पेन चेतसा ॥ १८ ॥
महाकालवनं गत्वा यूयं सर्वे समाहिताः । आराधयध्वं देवेशं सदासिद्धिप्रदायकम्
दर्शनात्तस्यदेवस्यलभ्यते सिद्धिरुत्तमा । सनकादयोऽपि ये देवमासाद्ययोगतत्पराः
पूजयित्वाऽपि भावेन संसिद्धिं परमां गताः ॥ २० ॥
राज्ञा वसुमता पूर्वं खड्गसिद्धिःसुदुर्लभा । प्राप्ता दर्शनमात्रेण लिङ्गस्यास्य प्रभावतः
पादुकागमनं लब्धं हैहयेन महात्मना । कृतवीरात्मजेनैव वाहानां च सहस्रकम् ॥
अदृश्यकरणं चैव प्राप्तं चानूरुणा पुरा । स्वर्णसिद्धिश्च सिद्धेन पादलेपो रसायनम्
अञ्जनञ्च तथा लब्धं लिङ्गस्यास्य च दर्शनात् ॥ २३ ॥
आकाशवचनं श्रुत्वा ते सिद्धा विस्मयान्विताः ।
समायाता मुदा युक्ता महाकालवनोत्तमे ॥ २४ ॥
सर्वसिद्धिप्रदं चैव ददृशुर्लिंगमुत्तमम् । दर्शनात्तस्य लिङ्गस्य संसिद्धिं परमांगताः
ततः प्रभृति विख्यातो देवैः सिद्धेश्वरः परः ।
ये पश्यन्ति नरा देवि! देवं सिद्धेश्वरं परम् ।
न तेषां दुर्लभा सिद्धिर्भविष्यति महीतले ॥ २६ ॥
सिद्धेश्वरं गमिष्यन्ति भावहीनाः प्रसङ्गतः ।
संसिद्धास्ते भविष्यन्ति नियता नात्र संशयः ॥ २७ ॥
महापातकसंयुक्तो यस्तु सिद्धेश्वरंस्मरेत् । संसिद्धस्तुभवेन्नूनंज्ञानैश्वर्यसमन्वितः
नियमेन तुयःपश्येद्देवंसिद्धेश्वरंपरम् । षण्मासाज्जायतेसिद्धिर्वाञ्छितायाभवेद्धृदि
अष्टम्यां च चतुर्दश्यांकृष्णपक्षेविशेषतः । सिद्धेश्वरंतुयःपश्येत्सपश्येन्मममन्दिरम्
अपुत्रो लभते पुत्रंनिर्धनस्तु धनं लभेत् । विद्यार्थीलभतेविद्यांभार्यार्थीलभतेस्त्रियम्
सङ्क्रान्तौ सोमवारे च ग्रहणे चैव योऽर्चयेत् ।

कुलानां शतमुद्धृत्य पैतृकं स्वाधिकं प्रिये! । मोदते ममलोके च यावदिन्द्राश्चतुर्दश
एष ते कथितो देवि! प्रभावःपापनाशनः । सिद्धेश्वरस्य देवस्यलोकपालेश्वरंशृणु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्येसिद्धेश्वरमाहात्म्यवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

लोकपालेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

द्वादशं विद्धिदेवेशि लोकपालेश्वरं शिवम् । यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते
पुरा दैत्यगणा देवि! प्रादुर्भूताः सहस्रशः । हिरण्यकशिपोर्वक्षःस्थलादतिपराक्रमाः
तैरियं वसुधा व्याप्ता सशैलवनकानना ।
विध्वस्ताः स्वाश्रमाः सर्वे यज्ञा विध्वंसितास्तथा ॥ ३ ॥
ब्राह्मणा भक्षिताश्चैववेदवेदाङ्गपारगाः । पूरितान्यग्निकुण्डानि पांसुना मधुना तथा
विध्वस्ताः कलशाः सर्वे मृद्भाण्डादि च चूर्णितम् ।
निःस्वाध्यायवषट्कारा स्वधास्वाहाविवर्जिता ॥ ५ ॥
कृता च धरणी देवि नष्टयज्ञोत्सवाभवत् । लोकपालास्ततोभीतामाधवंशरणंगताः
ऊचुः प्राञ्जलयः सर्वे क्षुधार्तादुखिताःकृताः । वयं ग्लानिंगता देव यज्ञभागंविनाकृताः
वयं त्रातास्त्वया पूर्वं नमुचेर्वृषपर्वणः । हिरण्यकशिपो रौद्रान्नरकाच्च मुरोस्तथा
तथा रक्ष सुरश्रेष्ठ! भयं नः समुपस्थितम् ॥ ६ ॥
तेषां तद्वचनं श्रुत्वा शङ्खचक्रगदाधरः । जगाम स ततो दैत्याः प्रविष्टा वरुणालयम्
ते निष्क्रम्य ततो रात्रौ निघ्नन्ति द्विजसत्तमान् ।
तापसान्दीक्षितान्देवि! धर्मव्रतपरायणान् ॥ ११ ॥

अथस्वर्गंगताःकान्ते जितःशक्रोमरुत्पतिः । तथैवदक्षिणामाशांधर्मराजोजितस्ततः
गत्वाथ पश्चिमामाशां जलराजो विनिर्जितः । उत्तरेधनदोदेवितदैत्यैःसर्वविनिर्जितः
ततस्तेव्याकुलाजाताविष्णुंशरणमागताः । उपायःकथितोदेविदेवेभ्योविष्णुनातदा
महाकालवनं गत्वा देवा भक्त्या समाहिताः । आराधयत सर्वेशं शङ्करंलोकशङ्करम्
भवतांभवितासिद्धिस्तत्रतस्यप्रसादतः । इतितस्यवचःश्रुत्वाकृष्णस्यामिततेजसः
प्रस्थिता लोकपालास्ते महाकालवने शुभे ॥ १७ ॥
तावत्तत्रैव संरुद्धा दैत्यैः शस्त्रधरैस्तदा ।
भूयो नष्टाश्च सम्प्राप्ता यत्र देवो जनार्दनः ॥ १८ ॥
कथयामासुरत्युग्रं यथा रुद्धं जगत्त्रयम् । नारायणेन ते प्रोक्ता लोकपालाः पुनःपुनः
यूयंव्रतधराभूत्वाकपालैश्च विभूषिताः । खट्वाङ्गधारिणःशान्ताःपञ्चमुद्राविभूषिताः
भस्मभूषितसर्वाङ्गाः क्षुद्रघण्टाविराजिताः । महाव्रतधराभूत्वा महाकालवनोत्तमम्
गच्छध्वं ब्रह्मणा सार्द्धं पादबद्धैश्च नूपुरैः ॥ २१ ॥
अथतेलोकपालाश्चश्रुत्वाकृष्णस्यभाषितम् । समायातामहादेविकृत्वाकापालिकंवपुः
तत्र दृष्टं महालिङ्गं तेजसांराशिमद्भुतम् । स्तुतं च विविधैःस्तोत्रैर्लोकपालैःपुनःपुनः
ततस्तु तस्य लिङ्गस्य वह्निज्वाला विनिःसृता ।
यया ते दानवाः सर्वे दग्धा भस्मत्वमागताः ॥ २४ ॥
ज्ञात्वा लिङ्गस्य माहात्म्यं नाम चक्रुः समाहिताः ।
सेवितं लोकपालैस्तु लिङ्गं तेजोमयं परम ॥ २५ ॥
लोकपालेश्वरोनाम ख्यातिं यास्यति भूतले ।
इत्युक्त्वा त्रिदशाः सर्वे लोकपालैः समावृताः ।
स्वस्वस्थानं गता दिव्यं यथापूर्वं मुदान्विताः ॥ २६ ॥
ये पश्यन्ति नरा देवि लोकपालेश्वरं शिवम् । समृद्धिभिःसुसंपन्नाभवेयुर्जन्मजन्मसु
न दारिद्र्यं न च व्याधिर्नाकालमरणंतथा । ऐश्वर्यं चातुलं तेषांजायतेदर्शनात्सदा
यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति । तस्य तज्जायते सर्वं मृतस्यपरमागतिः

अश्वमेधस्य यज्ञस्यसम्यगिष्टस्य यत्फलम् । तत्फलंलभतेदेविलोकपालेश्वरार्चनात्
प्रसङ्गेनापि यः पश्येल्लोकपालेश्वरं शिवम् । मोदतेस्वर्गलोकेसलोकपालैःसमंसदा
सङ्क्रान्तौ सोमवारे च चतुर्दश्यांविशेषतः । येपश्यन्तिनराभक्त्याह्यष्टम्यामयनद्वये
ते दुर्द्धर्षा भवन्तीहशत्रूणांसङ्गरे तथा । मृता यान्ति विमानेन शक्रलोकंसुदुर्लभम्
क्रमेण वारुणं लोकं धनदस्य यथासुखम् । पुनःपैतामहं यान्ति लोक देवैःसुदुर्लभम्
एष ते कथितो देवि प्रभावः पापनाशनः । दुर्लभः परमो गुह्यं कामेश्वरमथो शृणु

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये लोकपालेश्वरमाहात्म्यवर्णनं नामद्वादशोऽध्यायः ॥ १२॥

त्रयोदशोऽध्यायः

कामेश्वरमाहात्म्यवर्णनम्

हर उवाच

विद्धि कामेश्वरं देवि तत्र लिङ्गंत्रयोदशम् । यस्य दर्शनमात्रेणसौभग्यंजायतेशुभम्
ब्रह्मणोध्यायमानस्यप्रजाकामस्यपार्वति । उत्पन्नोऽर्कप्रभाकारोलावण्यनिचयोमहान्

अलङ्कारावृतः कान्तो दिव्यमण्डनमण्डितः ॥ २ ॥
तं दृष्ट्वा परमं दिव्यं कान्तं सौभाग्यशोभितम् ।
अप्रतर्क्यमविज्ञेयं ब्रह्मा प्रोवाच तं तदा ॥ ३ ॥

कोभवान्किनिमित्तं तु इह वा किमुपागतः ।वद त्वं मन्मथाकार कन्दर्प इव लक्ष्यसे

ब्रह्मणो वचनं श्रुत्वा प्रोक्तं तेनैव सादरम् ।

अहंते सृष्टिकामस्यभावेनविहितोऽशकः । प्रजापतेमहाभागकिंकरोमिदिशस्वमाम्

ब्रह्मोवाच

मया तुसृष्टिकामेन ये प्रजापतयः कृताः । न ते शक्ताःप्रजाःस्रष्टुंकामैतेसुखमाप्नुयुः

त्वमग्रणीः प्रजासर्गेत्वदधीनमिदं जगत् । कुरु सृष्टिं विचित्रांचकंदर्प मम शासनात्
इत्युक्तो ब्रह्मणादेवि जगामादर्शनं स्मरः । क्रुद्धेनब्रह्मणाशप्तोविनाशं यास्यसिध्रुवम्
मद्वचो न कृतं यस्माद्भवनेत्रोद्भवाग्निना । तच्छ्रुत्वा दारुणं शापं कन्दर्पो भयविह्वलः

ब्रह्माणं प्रणतो भूत्वा प्रह्वः प्राञ्जलिरब्रवीत् ॥ ६ ॥

प्रसीद देवदेवेश अनन्यगतिके मयि । नहि निर्भरतां यान्ति प्रभूणामाश्रिते रुषः

ब्रह्मोवाच

यस्मात्ते भक्तिरतुलाममोपरिमहामते । तस्मात्स्थानानिदत्तानितवद्वादशसङ्ख्यया
कामिनीनां कटाक्षेषु केशपाशेषु चैव हि । जघनस्तननाभौ तु दोर्मूलेऽधरपल्लवे

वसन्ते कोकिलालापे ज्योत्स्नायां जलदागमे ।
कामार्थे च मया दत्तौ सबलौ मधुमाधवौ ॥ १३ ॥
स्त्रियोऽमृतमया धन्याः संसारे सारकारणम् ।
रतेश्चैव निधानानि सन्तानार्थं विनिर्मिताः ॥ १४ ॥

एताभिर्वरनारीभिर्जगदेवं वशीकृतम् । स्त्रीभिरासक्तमनसः कुतः पुंसो मनस्विता
कुतश्चापि स्ववशता स्त्रीगौरवगतस्य च । स्त्रिय एव विनाशाय पूर्वेषाममरद्विषाम्
स्त्रिय एव हि देवानामिन्द्रादीनां भयाश्रयाः । नारीभिर्लब्धवृत्तश्चपुरुषस्यापिसर्वतः
पराभवः प्रभवति विवशत्वं च भीषणम् । स्त्रीभिराजितचित्तस्यसुलभोविपदोदयः
इत्युक्तोमन्मथोभद्रे ब्रह्मणाच विसर्जितः । दत्त्वा वै पुष्पकं चाप तथावैबाणपञ्चकम्
रतिप्रीतिसमायुक्तो झषकेतुर्मनोभवः । विडम्बयति लोकांस्त्रीन्ससहायो धनुर्धरः

पण्डितांस्तापसान्वीरान्सुधियश्च जितेन्द्रियान् ।
काले कुशलभावज्ञान्देवान्पितृगणांस्तथा ॥ २१ ॥

भूतप्रेतपिशाचांश्च यक्षगन्धर्वकिन्नरान् । कृमिकीटपतङ्गांश्च भूतग्रामं चतुर्विधम्
ममार्थे च कृतो यत्नश्चिन्तयित्वा पुनः पुनः । दुःसाध्यः शङ्करो देवः श्रूयते भुवनत्रये

तस्य देवस्य कः शक्तः क्षोभणार्थं मया विना ॥ २३ ॥
इत्युक्त्वा तु समायातो यत्राऽहं तपसि स्थितः ।

रत्यायुतः स गर्वेण सख्याऽयं मधुनाश्रितः ॥ २४ ॥
दृष्टवान्मां तदा कामः पिञ्जकूटजटासटम् ।
किञ्चिन्निमित्ततोऽनिद्रं भोगीन्द्रकृतभूषणम् ॥ २५ ॥

प्रेक्षमाणमृजुस्थानं नासावंशाग्रलोचनम् । ततोऽवमरकाकारमालं व्याश्रयमात्रकम् प्रविष्टः कररन्ध्रेण मदनो हृदये मम । रत्यर्थं कामतप्तेन संस्मृता भवती मया ॥ २७ समाधेर्भावना दिव्या लक्ष्यप्रत्यक्षरूपिणी । गता मम विमलता तत्क्षणादेवपार्वति उन्मत्ततां गतोऽहं वै विकृतिमदनात्मिकाम् । निराकृतं मयादेवि धैर्यमालंव्ययत्नतः दृष्टो मयात्महृदये मन्मथोऽपथ्यकारकः । देहस्थं निर्दहिष्यामि प्रत्याहारप्रयोगतः अमानुषींत्रजेद्योनिंयोगिनं प्रविशेद्यदि । बाह्याग्नौधारणांकृत्वा देहसंस्थे विनिर्दहेत्

एतस्मिन्नन्तरे सोऽपि सन्तप्तो मदनो भृशम् ।
इच्छाशरीरो दुर्ज्ञेयो निःसृतो व्यसनात्मकः ॥ ३२ ॥

सहकारतरोर्मूले भूत्वा मधुसखस्तदा । मुमोच मोहनंनाम मार्गणं मकरध्वजः ॥ स चापि हृदयेप्राप्तो मदीयेलीलयाशरः । ततोऽहंकुपितो देवि नेत्रं कृत्वातृतीयकम् तन्नेत्रविस्फुलिङ्गेन क्रोशतांनाकवासिनाम् । गमिताभस्मसात्तूर्णं कंदर्पःकामिदर्पकः तस्मिन्दग्धेततःकामे रतिःशोकपरायणा । विललाप सुदुःखार्त्तापतिभक्तिपरायणा

हा नाथ हा मम प्राण हा स्वामिन्किं जहासि माम् ।
पतिव्रतां पतिप्राणां कस्मान्मां त्यजसि प्रभो! ॥ ३७ ॥

एवं च विलपंतीं तां वागुवाचाशरीरिणी । मा त्वं रुद विशालाक्षिपुनरेष पतिस्तव

प्रसादाद्देवदेवस्य उत्थास्यति शिवस्य च ॥ ३८ ॥

प्रार्थितोऽहं ततो देवि! तस्मिन्नवसरे प्रिये । एष कामस्त्वया दग्धः क्रोधेन परमेश्वर येनानेन प्रभो नष्टा सृष्टिर्वै धरणीतले । कृपां विधेहि देवेश दीनायै देहि मे पतिम् ततोऽहमब्रुवं देवि तां रतिं दीनभाषिणीम् । अनेन मदनेनाद्य कृतं तरलितं मनः ॥ ततो दग्धं मयास्याङ्गं जीवये त्वत्प्रसादतः । अङ्गं दग्धंमयास्याद्य तृतीयनेत्रवह्निना तस्मादनंगएवैष प्रजासुविचरिष्यति । अनङ्गोऽपि यदावंत्यां लिङ्गं संसेवयिष्यति

देवानामनुकम्पार्थमनङ्गोऽसौ कृतो मया । त्रिदशैश्चसमादिष्टःकामोऽवन्त्यांजगामह तत्र गत्वा ह्यनङ्गोऽपि भक्तिभावसमन्वितः । ददर्श परमं लिङ्गं समीहितफलप्रदम्

प्रोक्तं तुष्टेन लिङ्गेन काम काममवाप्स्यसि ।
अनङ्गोऽपि समर्थस्त्वं भविष्यसि न संशयः ॥ ४६ ॥
जन्म प्राप्स्यति रुक्मिण्या गर्भे कृष्णस्य सङ्गमात् ।
भविता विश्रुतो लोके नाम्ना शम्बरसूदनः ॥ ४७ ॥
अनङ्गेन त्वया यस्मान्मनसा तोषितोऽपि सन् ।
तस्मात्ख्यातिं गमिष्यामि त्वन्नाम्ना काम! सर्वदा ॥ ४८ ॥

ये त्वांपश्यन्तिकन्दर्पंभक्त्यापरमयायुताः।प्राप्नुवन्तिगतिंनित्यंतेसदानन्ददायिकाम् दीर्घायुषो भविष्यन्तिरूपं तेषांभविष्यति । कुलंचनिर्मलंतेषांये त्वांपश्यंतिमन्मथ

ऐश्वर्यं परमान्भोगान्स्त्रियो दिव्यकलान्विताः
अरोगा सन्ततिस्तेषां भविष्यति न संशयः ॥ ५१ ॥

चैत्रशुक्लत्रयोदश्यां येमां पश्यन्तिभक्तितः । देवलोकंसमासाद्यमोदिष्यन्तिहितेनराः

यक्षा गणेश्वराः सिद्धाः सिद्धगन्धर्वसेविताः ।
रुद्रलोकं गमिष्यन्ति विमानैः सर्वकामिकैः ॥ ५३ ॥

इत्युक्तःकामदेवोऽपि लिङ्गेन परमेश्वरि! । तत्राश्रमपदं चक्रेतस्य लिङ्गस्य सन्निधौ एष ते कथितो देवि प्रभावः पापनाशनः । कामेश्वरस्य शृण्वग्रे कुटुम्बेश्वरवैभवम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये कामेश्वरमाहात्म्यवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

कुटुम्बेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

कुटुम्बेश्वरसञ्ज्ञं तु देवं विद्धि चतुर्दशम् । यस्य दर्शनमात्रेण गोत्रवृद्धिश्च जायते ॥
यदा देवासुरैः पूर्वं मथितः क्षीरसागरः । तदा च निर्गतं देवि दुर्द्धरं दुःसहं विषम्
कालकूटमयं रौद्रं विषं ज्वालाविभीषणम् । दह्यते च जगत्तेन सदेवासुरमानुषम् ॥
ततो देवगणाः सर्वे सासुरा यक्षराक्षसाः । विषज्वालातिभीताश्च मामेव शरणं गताः
स्तुतोऽहं विविधैः स्तोत्रैरिदमुक्तं वरानने! । अमृतार्थे कृतो यत्नः सम्प्राप्तं मरणं विभो
अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा । अतिमथितुमारब्धे लोभाद्वै क्षीरसागरम्
उत्पन्नं कालकूटं तु येन दग्धं चराचरम् । ततोऽस्माकं भयं जातं कालकूटोद्भवं प्रभो
रक्षां कुरु जगन्नाथ शरणागतवत्सल! । हितार्थं सर्वलोकानां यथा न प्रलयो भवेत्

मया तेषां वचः श्रुत्वा त्रिदशानां यशस्विनि! ।
मायूरं रूपमास्थाय देवानामनुकम्पया ।
कण्ठे धृतं महारौद्रं कालकूटाह्वयं तदा ॥ ६ ॥

त्वं भीता सहसा नष्टा रूपं दृष्ट्वा तु मामकम् । विषवृक्षमसेव्यं तु ततोऽहं दुःखितोऽभवम्
नदीसंघसमायुक्ता गङ्गा दृष्टा च पार्श्वतः । सा च प्रोक्ता मया देवि सादरं स्तुतिपूर्वकम्
कालकूटविषं गङ्गे वेगान्नय महोदधिम् । नान्या शक्ता समानेतुं त्वां विना लोकपावनि

गङ्गोवाच

नास्ति मे भगवञ्छक्तिर्विवोढुं च जगत्पते! । रौद्ररूपी च दुःसेव्यो दहत्येव न संशयः

ततस्तु यमुना प्रोक्ता न समर्था सरस्वती ।
अन्याश्च विविधा नद्यो मयाहूताः पृथक्पृथक् ॥ १४ ॥

अशक्तास्ताः समानेतुं कालकूटाह्वयं विषम् । तदाहूता मया देवि शिप्रा ब्रह्मसमुद्भवा

शिप्रे पुत्रि ममादेशान्महाकालवनं व्रज । गृहीत्वा कालकूटं तु पुरः कामेश्वरस्य हि
विद्यते परमं लिङ्गं तस्मिंल्लिङ्गे नियोजय । मया प्रोक्ता तदा प्राह ब्रह्मणः परमा कला
एवास्मि प्रस्थिता देव तव वाक्यादसंशयम् । दुःस्पर्शः कालकूटोऽयं नूनं मां भक्षयिष्यति
अलेख्याऽहं भविष्यामि दुष्टसंपर्कयोगतः । ततो मया पुनः प्रोक्ता शिप्रा पातकनाशिनी

यानि तीर्थानि भूलोके पाताले यानि सन्ति वै ।
स्वर्गलोके ह्यन्तरिक्षे पुण्यानि चारुहासिनि! ॥ २० ॥

तानि सर्वाणि सेवार्थमागत्य मम वाक्यतः । आज्ञां तव करिष्यन्ति गच्छ पुत्रि ममाज्ञया
एवमुक्ता तदा शिप्रा गृहीत्वा कालकूटकम् । समायाता वरारोहे यत्र लिङ्गमनुत्तमम्
तद्विषं कालकूटाख्यं निक्षिप्तं लिङ्गमूर्द्धनि । विषलिङ्गस्ततो जातो दृष्टो मृत्युप्रदायकः

पशुः पक्षी नरो वापि यो हि पश्यति तं शिवम् ।
म्रियते स तदा देवि! तस्य देवस्य दर्शनात् ॥ २४ ॥

तीर्थयात्रां ततः कर्त्तुं तत्रायातास्तपोधनाः । तं च देवं ततो दृष्ट्वा मृताः सर्वे च तत्क्षणात्
ततो हाहाकृतं देवि त्रैलोक्यं सचराचरम् । हाहाकारं महच्छ्रुत्वा मया ते द्विजसत्तमाः

सञ्जीविताश्च वै सर्वे दृष्टिपातेन पार्वति ! ॥ २६ ॥

तुष्टुवुः प्रणता विप्रा मामतो विविधैः स्तवैः । मया प्रोक्तास्तु ते विप्रा वृणुध्वं वरमुत्तमम्
तैरुक्तं प्रणतैर्देवि लोकानां च हितार्थतः । संम्रियन्ते प्रजा देवा लिङ्गेनानेन शङ्कर
ताः संरक्ष जगन्नाथ ह्येषोऽस्माकं वरः प्रभो । प्रतिज्ञातं मया देवि लोकानामनुकंपया
क्षेमारोग्यकरं लिङ्गं भविष्यति न संशयः । कायावरोहणाद्विप्राः स्वयमत्रागमिष्यति

लकुलीशस्तदा चायं देवः स्पृश्यो भविष्यति ।
वृद्धिकारी कुटुम्बस्य भविष्यति न संशयः ॥ ३१ ॥
कुटुम्बेश्वर इति नाम्ना लोके ख्यातिं गमिष्यति ।
इत्युक्तास्ते मया विप्रास्तत्रैव तपसि स्थिताः ॥ ३२ ॥

लकुलीशोऽथ तल्लिङ्गमारुरोह ममाज्ञया । जनयन्विस्मयं लोके कीर्तिं जनपदे तथा
कुटुम्बेश्वरसञ्ज्ञं तु ये पश्यन्ति यशस्विनि । तेषां कुले तु वृद्धिः स्यात्कुटुम्बस्य न संशयः

आश्विनासितपञ्चम्यां दर्शनं य करिष्यति । बहुपुत्रो बहुधनो भविष्यतिनसंशयः
महतीं श्रियमाप्नोति रोगैश्चापि प्रमुच्यते । सर्वकामसमृद्धोऽसौ ममलोकेसमोदते
दर्शनं ये करिष्यन्ति स्पर्शनं यजनंतथा । ते सर्वकामसम्पूर्णाःप्रयान्तिमममन्दिरम्
समीपे तु सरिच्छिप्रा वापीकूपेनसंयुता । यस्या दर्शनमात्रेण नरः पापात्प्रमुच्यते

सोमवारेऽर्कवारे च स्नात्वा तस्यां समाहितः ।
अष्टम्यां वा चतुर्दश्यां यः पश्येत्कुटुम्बेश्वरम् ॥ ३६ ॥

राजसूयसहस्रस्य वाजपेयशतस्य च । फलं स लभते देवि! सत्यमेतन्मयोदितम्
एष ते कथितो देवि! प्रभावः पापनाशनः । कुटुम्बेश्वरदेवस्य त्विन्द्रद्युम्नेश्वरं शृणु
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्येकुटुम्बेश्वरमाहात्म्यवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४॥

———

पञ्चदशोऽध्यायः

इन्द्रद्युम्नेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

इन्द्रद्युम्नेश्वरं विद्धि शिवं पञ्चदशं प्रिये! । यस्य दर्शनमात्रेण यशः कीर्तिश्चजायते
आसीद्राजा पुरादेवि इन्द्रद्युम्नो महीपतिः । येनेयं रक्षितापृथ्वीपितापुत्रमिवौरसम्
दृष्ट्वा सोऽथ बहून्यज्ञान्भूमौप्रचुरदक्षिणान् । गतः स्वर्गंमहात्मावैसर्वकामफलप्रदम्
स चाथ प्रच्युतः स्वर्गान्नष्टकीर्तिर्यदाक्षितौ । पपातभूमौसहसागतपुण्योनराधिपः

पतितश्चिन्तयामास भृशं शोकपरिप्लुतः ॥ ४ ॥

कृतस्यकर्मणस्त्वत्रभुज्यते यत्फलं दिवि । न चान्यत्क्रियतेतद्यद्भूतलस्थेनभुज्यते
सोऽत्र दोषो मतस्तस्यामतस्तत्पतनं यत् । पतनात्तु महद्दुःखं परितापश्च जायते
स्वर्गभाजोभवन्तीहयावत्कीर्तिश्चजायते । दिवंस्पृशतिभूमिंच शब्दः पुण्यश्चकर्मणः

यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ ७ ॥
अकीर्त्तिः कीर्त्यते यस्य लोके भूतस्य कस्यचित् ।
स पतत्यधमाँल्लोकान्यावच्छब्दोऽस्य कीर्त्तितः ॥ ८ ॥
तस्मात्कल्याणवृत्तः स्यादन्यथा पतनंभुवि ।
विधाय वृत्तं पापिष्ठं कीर्तिमेवाभिवर्द्धयेत ॥ ६ ॥

अत्यन्तंश्लाघयाम्यत्रकीर्त्तिंस्वर्गकरांपराम् । देवैरपिहिसाकीर्तिःकाङ्क्ष्यतेपरमायतः
यावत्कीर्तिर्मनुष्याणांवर्त्ततेभुविचाक्षया । तेजः पुञ्जैनयुक्तानिशरीराणिभवन्तिहि
नस्वेदो न च दौर्गन्ध्यं पुरीषं मूत्रमेववा । तेषांनिर्वचनं राजा विधाताच त्रिविष्टपे

उह्यन्ते ते विमानैश्च नानाभरणभूषिताः ॥ १२ ॥

एवं विमृश्य नृपतिरिन्द्रद्युम्नो वरानने! । स्वर्गकामो जगामाथ हिमवन्तं नगोत्तमम्
यत्र तेपे तपस्तीव्रं मार्कण्डेयो महामुनिः । दृष्ट्वा प्रणम्य शिरसासाष्टाङ्गश्च पुनःपुनः

पप्रच्छ विनयोपेतस्तमृषिं शंसितव्रतम् ॥ १४ ॥

विदितास्तव धर्मज्ञ!देवदानवराक्षसाः । राजवंशाश्चविविधा ऋषिवंशाश्च शाश्वताः

न तेऽस्त्यविदितं किञ्चिदस्मिँल्लोके द्विजोत्तम! ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथ्यतां त्वया ॥
कथं कीर्त्तिर्ध्रुवा लोके जायते किंतपःफलात् ॥ १६ ॥

मार्कण्डेय उवाच

हन्तते कथयिष्यामियतः कीर्तिं समीहसे । यावत्कीर्तिर्भूमिसंस्थातावद्वससुरैःसह

तद्गच्छ शीघ्रं धर्मज्ञ!महाकालवनोत्तमम् ॥ १७ ॥

कलकलेश्वरदेवस्य समीपे वामभागतः । लिङ्गं पापहरं तत्र समाराधय यत्नतः ॥
तस्याभ्यर्चनमात्रेणलप्स्यसेकीर्तिमुत्तमाम् । स्वर्गंसनातनञ्चैवयत्सुरैरपिदुर्ल्लभम्
गत्वासपूजयामासतल्लिङ्गंकीर्तितंत्विदम् । ततोदेवाःसगन्धर्वाःप्रशस्यचमुदान्विताः

अन्तरीक्षे विमानस्थाः प्रोचुर्वाचं नराधिपम् ।
त्वत्कीर्त्तिर्निर्मला जाता लिङ्गस्यास्य समर्चनात् ॥ २१ ॥

अद्यप्रभृति राजेन्द्र! लिङ्गं त्वन्नामनामतः ।
ख्यातिं यास्यति लोकेऽस्मिन्निन्द्रद्युम्नेति निश्चितम् ॥ २२ ॥

इन्द्रद्युम्नेश्वरं देवं पूजयिष्यन्ति ये नराः । सर्वपापविनिर्मुक्ता विमानैः सर्वकामिकैः स्वर्गं यास्यन्ति ते हृष्टाः स्तूयमानाः सुरर्षिभिः । किञ्चिच्च दुर्लभं लोके तेषां नैव भविष्यति दर्शनं ये करिष्यन्ति लोभाद्वापि प्रसङ्गतः । तेषां कीर्तिर्यशः पुण्यं धर्मश्चैव भविष्यति न स्वर्गात्पतनं तेषां यावदिन्द्राश्चतुर्दश । ये च पूजां करिष्यन्ति चतुर्दश्यां विशेषतः

ते कुलं तारयिष्यन्ति मातृकं पैतृकं सदा ॥ २६ ॥
इत्युक्त्वा त्रिदशाः सर्वे लिङ्गं सम्पूज्य यत्नतः ।
इन्द्रद्युम्नेन सहिताः पुनः स्वर्गं गताः प्रिये! ॥ २७ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । इन्द्रद्युम्नेशदेवस्य श्रूयतामपरः प्रिये ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्य इन्द्रद्युम्नेश्वरमाहात्म्यवर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

ईशानेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

ईशानेश्वरसञ्ज्ञं तु षोडशं विद्धि पार्वति । यस्य दर्शनमात्रेण ऐश्वर्यं जायते नृणाम् तुहुण्डेन पुरा देवि सर्वे ह्युपद्रुताः सुराः । ऋषयश्च महाभागा यक्षगन्धर्वकिन्नराः नन्दनाख्यं वनं सर्वं तदधानमभूत्किल । ऐरावणं द्विपेन्द्रश्च जित्वा द्वारि समादधत् उच्चैःश्रवससञ्ज्ञं तु हृतवान्दानवेश्वरः । देवाङ्गनानां सर्वासां विध्वंसं कर्तुमुद्यतः स्वर्गमार्गः खिलीभूतस्तद्भयेन ह्यभूत्सति । हृताधिकारा देवाश्च मन्त्रं समुपचक्रमुः

तस्मिन्काले च कालज्ञो नारदोऽथ महामुनिः ।
आजगाम महातेजा भ्रममाणश्च मन्त्रिभिः ॥ ६ ॥

देवैर्नमस्कृतः सोऽथ पूजितश्च यथाविधि । निवेदितं यथावृत्तं तुहुण्डस्य विचेष्टितम् पप्रच्छुरथ ते मन्त्रं नारदं मुनिसत्तमम् । कथयस्व महाबुद्धे सर्वं जानासि सर्वतः ईदृक्काले समायाते किं कर्त्तव्यं महामुने । नाज्ञातं त्रिषु लोकेषु किञ्चिद्देवर्षिसत्तम

मुहूर्तं ध्यानमालम्ब्य किञ्चिन्मीलय च लोचने ।
उपायं कथयामास सर्वदुःखविनाशनम् ॥ १० ॥
महाकालवने रम्ये शीघ्रं गच्छन्तु विह्वलाः ।
इन्द्रद्युम्नेश्वरस्यैव पश्चाद् भागे व्यवस्थिताः ॥
सेवध्वं परमं लिङ्गमीशानेश्वरसञ्ज्ञकम् ॥ ११ ॥

पुरा चेशानकल्पे तु ईशानेन सुखेन हि । मुनिना श्रोत्रियेणैव वेदाभ्यासरतेन वै ॥

उत्तमाङ्गपदं लब्धं शङ्करस्य च मूर्द्धनि ॥ १२ ॥
तस्याराधनमात्रेण मनोऽभीष्टं हि लभ्यते ॥ १३ ॥

नारदस्य वचः श्रुत्वा देवा मुदितमानसाः । जग्मुर्यत्र महल्लिङ्गं स्तुतिं सर्वेऽप्यकुर्वत ईशानेशान! ईशान! तत्पुरुष नमोऽस्तु ते । नमो वाम! महाघोर! सद्योमुख नमो नमः त्र्यक्ष! भर्ग महादेव! उमाकान्त! नमो नमः । नमः शिव नमो भीम! नमः सर्व नमो नमः नमः शम्भो! नमो रुद्र! विरूपाक्ष! नमो नमः । त्वया देव! प्रजाः सर्वाः सदेवासुरमानुषाः स्थावराणि च भूतानि जङ्गमानि चराणि च । ब्रह्मवेदाश्च वेद्यं च त्वया सृष्टं महेश्वर शिरस्ते गगनं देवा नेत्रे शशिदिवाकरौ । निःश्वासः पवनश्चापि तेजोऽग्निश्च तवाच्युतः

बाहवस्ते दिशः सर्वाः कुक्षिश्चैव महार्णवः ।
ऊरू ते पर्वता देव चरणौ पृथिवी मता ॥ २० ॥

इन्द्रसोमाग्निवरुणा देवासुरमहोरगाः । प्रह्वास्त्वामनुतिष्ठन्ति स्तुवन्तो विविधैः स्तवैः त्वया व्याप्तानि भूतानि सर्वाणि भुवनेश्वर !। त्वयि तुष्टे जगत्तुष्टं त्वयि क्रुद्धे महद्भयम् भयानामपनेतासि त्वमेकः शत्रुसूदनः । असुराणां समर्थानां विनाशश्च त्वया कृतः

न च विक्रमणैर्देव निर्वाणमगमत्परम् । त्वं हि कर्त्ता विकर्त्ताच भूतानामिहसर्वशः

आराधयित्वा सर्वे ते नमस्यन्ति च सर्वशः ।

एतस्मिन्नन्तरे देवि! लिङ्गमध्यात्समुत्थिता ॥ २५ ॥

धूमावृतामहाज्वाला यया दग्धः स दानवः । तुहुण्डोमुण्डपुत्रस्तुससैन्यपरिवारितः

स्वाधिकारांश्च सम्प्रापुर्लिङ्गस्याऽस्य प्रभावतः ।

सुरेश्चाख्या समादिष्टा लिङ्गस्यास्यैव हर्षितैः ॥ २७ ॥

ऐश्वर्यशीलमस्यास्तीत्यस्माकं च विनिश्चितम् ।

ईशान इति विख्यातस्त्रैलोक्ये च भविष्यति ॥ २८ ॥

ईशानेश्वरसञ्ज्ञं तुयेसमाराधयन्तिच । कीर्तिर्लक्ष्मीर्ध्रुवातेषांसिद्धिःप्रीतिर्भविष्यति

पूज्यमानःसदादेवगन्धर्वाप्सरसांगणैः । स्वर्गलोकंगमिष्यन्ति विमानैरुज्ज्वलैर्मुदा

ब्राह्मणाः क्षत्रिया वैश्याःशूद्राः स्त्रियः कुमारिकाः ।

यथाभिलषितान्कामानाप्नुवन्ति न संशयः ॥ ३१ ॥

यःकरोतिनरः सम्यग्दर्शनंनियमस्थितः । न कुत्रतस्यहानिःस्याद्यावज्जन्मशतंभवेत्

सर्वदा सर्वकार्येषु ते समर्था यशस्विनि !। ईशानेश्वरसञ्ज्ञं तु ये पश्यन्ति दिनेदिने

एवं ते कथितो देवि! प्रभावः पापनाशनः । ईशानेश्वरदेवस्य श्रूयतामप्सरेश्वरः ॥३४

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्य ईशानेश्वरमाहात्म्यवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

अप्सरेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

देवं सप्तदशं विद्धि विख्यातमप्सरेश्वरम् ।

यस्य दर्शनमात्रेण लोकोऽभीष्टानवाप्नुयात् ॥ १ ॥

नन्दनाख्ये वनेदेविसर्वकामसमन्विते । सिद्धचारणगन्धर्वकिन्नरोद्गीतनादिते ॥ २ ॥

शुककोकिलचक्राह्वचकोरकुररावृते । दिव्यलोकोपमस्थाने त्रिविष्टपविभूषणे ॥

तत्रोपविष्टो वृत्रारिःसुरज्येष्ठश्च सेवितः । ननर्त्त रम्भातस्याग्रे नृत्यभावान्विवृण्वती

ततोऽन्यचित्ता सञ्जाता किञ्चित्स्मृत्वा प्रमादतः ।

लयतालविहीना च दृष्टा वै वासवेन सा ॥ ५ ॥

चुकोप च सुरश्रेष्ठस्तस्याःशापंददौ किल । विस्मृतिर्मानुषंकर्मन दिव्यंक्वापिदृश्यते

तस्मात्तु मानुषे लोके गच्छ त्वं निष्प्रभा सती ॥ ६ ॥

अथेन्द्रकोपसङ्क्षोभात्पतिताभुवि साप्सराः । निश्चेष्टाविकलीभूतारुदतीविस्वरंबहु

करुणं विलपन्ती च किं मया दुष्कृतं कृतम् । निर्मलं न तपस्तप्तंकथंनाराधितःसुरः

अथाप्सरोगणः सर्वः सखीगणसमन्वितः । रम्भा यत्रैव पतिता समायातो वरानने

तस्याः शोकाग्निदाहेन सन्तप्तोऽप्सरसां गणः ॥ ६ ॥

सुसुप्ता पद्मिनी साभ्रे यथा नैवविराजते । तथाशापेनविध्वस्ता रम्भानोराजतेसदा

सखीगणैः परिवृता रम्भा दृष्टा वरानने !। देवर्षिणानारदेन विस्मितेनान्तरात्मना॥

कस्मादप्सरसः सद्यो दृश्यन्ते शोकविह्वलाः ।

कस्माच्च करुणं रम्भा रोदित्येषा मुहुर्मुहुः ॥ १२ ॥

पप्रच्छ चसमागत्यकस्मादप्सरसो वराः । विषण्णवदना दीनाःकथ्यतांममसादरम्

वृत्तान्तं कथयामासुस्ताश्च तस्मै पुरातनम् ।

श्रुत्वा च नारदस्तत्र ध्यानासक्तोऽभवन्मुनिः ॥ १४ ॥

उपायं कथयामास हितं तासांप्रयत्नतः । गच्छन्त्वप्सरसःसर्वाःमहाकालवनोत्तमे
आराधयध्वंदेवेशं लिङ्गं सर्वार्थसाधकम् । पृच्छादेव्यास्तु पुरतःपुराकल्पेप्रपूजितम्
उर्वश्या ममवाक्येनभर्त्ता प्राप्तःपुरूरवाः । नारदस्य वचः श्रुत्वासमाजग्मुर्गणास्तथा
महाकालवने रम्येलिङ्गाराधनकाम्यया । ततस्तुष्टःस्वयंरुद्रस्तासां भक्त्यावरंददौ

रम्भे प्राप्स्यसि सौभाग्यं स्वर्गलोकं यशस्विनि !।
भविष्यसि महाभागे! जिष्णोस्त्वं वल्लभा ध्रुवम् ॥ १६ ॥
तस्मात्त्रिविष्टपं गच्छ सङ्घेनानेन पूजिता ।
आराधितोऽप्सरोभिश्च पुरा स्वर्गार्थकाम्यया ।
अतोऽप्सरेश्वरः ख्यातो ययौ ख्यातिं जगत्त्रये ॥ २० ॥

येसमाराधयिष्यन्तिभक्त्याचाप्सरसेश्वरम् । तेसर्वकामसंपूर्णाभविष्यन्तियुगेयुगे

प्रेरयिष्यन्ति ये लोके दर्शनार्थं यशस्विनि !।
स्थानभ्रंशो वियोगश्च तेषां स्वप्ने न जायते ॥ २२ ॥

किं दानैः किंतपोभिश्चकिं यज्ञैर्बहुदक्षिणैः । स्पर्शनाल्लभते राज्यंस्वर्गंमोक्षंक्रमेणतु
एष ते कथितो देवि प्रभावः पापनाशनः । अप्सरेश्वरदेवस्य श्रूयतां कलकलेश्वरः ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्येऽप्सरेश्वरमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

कलकलेश्वरमाहात्म्यवर्णनम्

श्रीशिव उवाच

द्विचत्वारिंशकं विद्धि ख्यातं कलकलेश्वरम् । यस्य दर्शनमात्रेण कलहो नैव जायते ॥
सर्वदुःखोपशमनं सर्वपापप्रमोचनम् । व्याधिसर्पाग्निचौराणां शमनंवाञ्छितप्रदम्
पुरा देवि त्वया सार्द्धं कलहः समपद्यत । पुरा विस्तरतो वच्मिश्रृणुवेकाग्रमनाःशुभे
यदा त्वं हिमशैलस्यदुहितावरवर्णिनि । तदा विवाहितं कान्तेयथोक्तविधिनामया
निवृत्ते विवाहे च त्वयासार्द्धंवरानने । महाकालीतिनाम्ना वैवर्णेनापिचतादृशी

नीलोत्पलनिभप्रख्या नीलकुञ्चितमूर्द्धजा ।
अप्येकस्मिंस्तदा त्वं हि मातृणां मण्डपे शुभे ।
मध्ये समुपविष्टाऽसि कृष्णाञ्जनसमप्रभा ॥ ६ ॥

कालि सुन्दरि मत्पार्श्वेवल्लभेत्वमुपाविश । शरीरेममतन्वङ्गिसितेभास्यसितद्युतिः
भुजङ्गीवासिता शुभ्रे संश्लिष्टा चन्दने तरौ । रजनीवासिते पक्षे दृष्टिदोषहरासिमे

इत्युक्तासि मया देवि! गिरिजे! चारुहासिनि !।
तदा प्रोक्तं त्वया वाक्यं मामुद्दिश्य सगद्गदम् ॥ ६ ॥

यदात्वया मदर्थे हि प्रेरितावेदपारगाः । सप्तर्षयो महाभागाः किं कृते न तदात्थमाम्

तदा त्वया मदर्थेऽपि प्रार्थितो जनको मम ।
हिमाद्रिराजो यत्नेन किं काली न तदात्थ माम् ॥ ११ ॥
यदाप्युक्तं त्वया दैन्यान्मदर्थे गच्छ नारद !।
प्रार्थ्यतां पार्वती शीघ्रं किं काला न तदात्थ माम् ॥ १२ ॥

सत्येयं लौकिकी गाथा न वृथा परिजायते । स्वकृतेनजनः सर्वो जाड्येनपरिभूयते

अवश्यमर्थी प्राप्नोति खण्डनां तुण्डमुण्डनाम् ।

तपोतिदीर्घचारैस्तु यस्त्वां प्रार्थितवत्यहम् ॥ १४ ॥

तस्या मे नियतस्त्वेष ह्यवमानः पदेपदे । नैवास्मि कुटिला रौद्रा विषमानचधूर्जटे नाकुलीनावृथाचारानदुष्टा न समत्सरा । सविषस्त्वं यतःख्यातोव्यक्तंदोषाकराश्रयः अकुलीनो वृथाचारो मात्सर्येणाश्रितः सदा । नाहंमुष्णामिनयनेतत्रहन्ता त्वमेव च

आदित्यस्त्वां विजानातु भगवान्द्वादशात्मकः ।

मया नोत्पाटिता दन्ताः कस्यापि निरपत्रप !॥ १८ ॥

पूषादेवो विजानातिद्वादशात्मादिवाकरः । मूर्ध्निशूलं तव यतःस्वैर्दोषैर्मामधिक्षिपः यत्तु मामाह कृष्णेति महाकालेतिविश्रुतः । इत्यथापि प्रवादोऽयं प्रवरःख्यामिते हर निदर्शनार्थं न द्वेषाच्छ्रुत्वा तं क्षन्तुमर्हसि । विरूपोयावदादर्शे नात्मनःपश्यतेमुखम् मन्यते तावदात्मानमन्येभ्यो रूपवत्तमम् । यदा तु मुखमादर्शे विकृतंसोऽभिवीक्षते तदेतरं विजानाति ह्यात्मानं नेतरंजनम् । सत्यधर्मच्युतात्पुंसः क्षुद्रादाशीविषादिव

स नास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः ।

इत्युक्तोऽहं त्वया देवि! मया कोलाहलः कृतः ॥ २४ ॥

अनात्मज्ञासि गिरिजे मृडेपण्डितमानिनि । सत्यं सर्वैरवयवैस्तुतोऽपिसदृशःपितुः

काठिन्यं कष्टमभ्येति धातुभ्यो बहुघातिता ।

कुटिलत्वं च सर्वेभ्योऽसेव्यत्वञ्च हिमादिव ॥ २६ ॥

इत्युक्ताऽसि मया देवि! पुनः प्रोक्तं त्वया वचः ।

तथापि दुष्टसंसर्गात्सङ्क्रान्तं सर्वमेव हि ॥ २७ ॥

व्यालेभ्योऽनेकजिह्वत्वंभस्मतःस्नेहवर्जनम् । हृत्कालुष्यंशशाङ्काद्वै दुर्बोधत्वंवृषादपि

श्मशानवासाद्भीरुत्वं नग्नत्वं च न लज्जया ।

निर्घृणत्वं कपालाच्च दया ते विगता चिरम् ॥ २९ ॥

एवं तदाऽभवद्रौद्रः कलहो भयकृच्छुभे । एवं प्रवृत्ते तु तदा कम्पितं भुवनत्रयम् भीताश्च देवगन्धर्वायक्षगन्धर्वराक्षसाः । तस्मात्कोलाहलोभूमिभित्त्वालिङ्गमभूत्तदा लिङ्गमध्यात्समुत्पन्नावाणीसुखकरीशुभा । आश्वासयन्तीदेवान्वै त्रैलोक्यंसचराचरम्

नामास्यचक्रुर्देवेशास्तदाकलकलेश्वरम् । स्वरनामासौततोऽभूच्छङ्करोभुविविश्रुतः यस्तमर्चयते भक्त्या देवंकलकलेश्वरम् । न राक्षसाःपिशाचाश्चनभूतान विनायकाः

विघ्नं कुर्युर्वरारोहे !कलहो न भवेद् गृहे ॥ ३४ ॥

सुशीला गृहिणी तस्य सुरूपा सुभगा प्रिये । बहुपुत्रा बहुधना जायते दर्शनात्तथा ये पश्यन्ति चतुर्दश्यां देवंकलकलेश्वरम् । न दुःखं न जरा व्याधिर्नाकालमरणंतथा न च शत्रुभयं तेषां जायते गिरिपुत्रिके । लोकोऽक्षयोभवेद्देवि यावदिन्द्राश्चतुर्दश ॥ एष ते कथितो देवि! प्रभावः पापनाशनः । यस्य श्रवणमात्रेण क्षेममत्र परत्र च ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कलकलेश्वरमाहात्म्यवर्णनं
नामाऽष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

नागचण्डेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

एकोनविंशतितमं नागचण्डेश्वरं प्रिये । निर्माल्यलङ्घनात्पापान्मुच्यते यस्य दर्शनात्

तस्य प्रभावं सुभगं कथयाम्यथ विस्तरात् ।

शृणुष्वैकाग्रमना देवि! सर्वपापप्रणाशनम् ॥ २ ॥

पुरादेवर्षिगन्धर्वाश्चारणागुह्यकास्तथा । उपविष्टाः सुधर्मायांकथयन्तःशुभांकथाम् एतस्मिन्नन्तरे शक्रो देवर्षिनारदं मुनिम् । पप्रच्छ सादरं देवि समायातं शुचिव्रतम् दृष्ट्वा विनयसम्पन्नं ब्रह्मचर्यपरायणम् । मेखलाजिनकौपीनं वीणादण्डविभूषितम् त्वया दृष्टमिदं सर्वं त्रैलोक्यंभूर्भुवादिकम् । उत्पाद्यमानमुत्पन्नं प्रलयञ्च सहस्रशः

त्वत्तुल्यो नास्ति लोकेऽस्मिन्मुक्त्वैकं परमेष्ठिनम् ।

जगत्कारणमव्यक्तं नित्यं सदसदात्मकम् ॥ ७ ॥
योगेन तपसा भक्त्या यत्त्वया परितोषितः ।
त्रैलोक्यमभिजानासि तत्सर्वं सर्वतः स्फुटम् ॥ ८ ॥

अतोऽहं प्रष्टुमिच्छामिकथ्यतांममनिश्चयम् । पृथिव्यांप्रवरंक्षेत्रं पावनंभुक्तिमुक्तिदम्
एवंश्रुत्वा तदाध्यात्वाचिन्तयामासनारदः । चिन्तयित्वाचिरंकालमिदंवचनमब्रवीत्
देवराज! स्मृतं पुण्यं क्षेत्रराजमनुत्तमम् । क्षेत्राणामुत्तमंक्षेत्रं प्रयागञ्च प्रशस्यते ॥
तस्माद्दशगुणं क्षेत्रं महाकालस्य कथ्यते । भुक्तिदं मुक्तिदं तच्च दर्शनादपि वासव!

एतच्छ्रुत्वा सहस्राक्षो वर्णयित्वा च तं मुनिम् ।
सर्वैर्देवगणैः सार्द्धं विमानस्थस्त्वरान्वितः ॥ १३ ॥

अन्तरिक्षस्थितोजिष्णुरद्राक्षीच्च सुरैःसह । क्षेत्रंलिङ्गैःसमाकीर्णमङ्गुलस्यान्तरंनहि
षष्टिकोटिसहस्राणि षष्टिकोटिशतानिच । महाकालवनेरम्येनिर्माल्यंलङ्घ्यतेकथम्
निर्माल्यलङ्घनाद्दोषोमहान्भवतिनिश्चितम् । इत्यालोच्यपुनर्देवाजग्मुःस्वर्गमनोरमाः

निर्माल्यदोषभीतास्ते क्षेत्रे न विविशुः सुराः ।
एतस्मिन्नन्तरे देवि! विमानस्था गणोत्तमाः ॥ १७ ॥

गणैर्नानाविधैः सेव्यैर्गीयमानश्चकिन्नरैः । चारणैःस्तूयमानस्तु स्वर्गलोकंव्रजन्सुरैः

प्रफुल्लनयनैर्दृष्टः कोऽयं धन्यो महातपाः ।
तेजसा दीप्यमानोऽयमप्सरोभिश्च सेव्यते ॥ १९ ॥

पप्रच्छुरमराः सर्वे कोऽयं रुद्रनिभोगणः । याति कुत्र महाबाहो हृष्टात्माप्रहसन्मुखः
पृष्टस्तदा सुरैः सर्वैर्विस्मयाविष्टमानसैः । कस्त्वंपुरुषशार्दूल किं त्वया सुकृतंकृतम्
देवानां पुरतो देविनिःशेषंकथितं तदा । महाकालोमहादेवः पूजितोभक्तितःस्तुतः
हृष्टेन तेन मे दत्तं गणत्वं यत्सुदुर्लभम् । नामदत्तं च सुभगं नागचण्ड इति ध्रुवम्
पप्रच्छुरमरास्तच्च सादरं गणसत्तम !। नागचण्ड त्वया तत्र निर्माल्यं पतितं त्वथ
महाकालवने पुण्ये लङ्घितं चरतात्वया । सञ्चारो नास्तितत्रैव लिङ्गसङ्कीर्णतायतः
उपायस्तेन कथितो देवानां पुरतस्तदा । तत्र तिष्ठति देवेशालिङ्गं सर्वफलप्रदम् ॥

ईशानेश्वरदेवस्य तिष्ठतीशानभागतः । तस्य दर्शनमात्रेण न स गच्छति दुष्कृतम्
निर्माल्यलङ्घनोद्भूतंयत्पापंजायते महत् । तत्सर्वंनाशमायातितस्यलिङ्गस्यदर्शनात्
ततो देवगणाः सर्वे महाकालवने पुनः । समायातामहाभागा महाकालश्च पूजितः
यथा लिङ्गं च तद्दृष्टं सर्वदोषक्षयङ्करम । तस्य दर्शनमात्रेण निर्माल्यलङ्घनादिभिः

दोषो नष्टः सुराणां च ततो नामास्य चक्रिरे ॥ ३० ॥

अस्माकं तेनकथितंनागचण्डेनधीमता । नागचण्डेश्वराख्यानमतोलोके भविष्यति

कृत्वास्य नाम ते देवा जग्मुः स्वर्गृहमुत्तमम् ।
पूजयिष्यन्ति ये केचिन्नागचण्डेश्वरं शिवम् ।
निर्माल्यलङ्घनोद्भूतं तेषां नश्यति पातकम् ॥ ३२ ॥

नागचण्डेश्वरं देवं येपश्यन्तिदिनेदिने । अज्ञानाज्ज्ञानतः पापं तेषां नश्यतिनान्यथा

आह्लादं निर्वृतिं स्वास्थ्यमारोग्यं चारुरूपताम् ।
सप्त जन्मान्यवाप्नोति दर्शनेन न संशयः ॥ ३४ ॥
प्राप्नोत्यभिमतान्कामान्देवानामपि दुर्लभान् ।
कीर्त्तनान्नात्र सन्देहो नागचण्डेश्वरस्य च ॥ ३५ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । नागचण्डेश्वरस्यैव प्रतीहारेश्वरं शृणु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्येनागचण्डेश्वरमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः ॥ १९॥

———

विंशोऽध्यायः

प्रतीहारेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

प्रतीहारेश्वरं देवि विद्धि विंशतिमं प्रिये !। यस्य दर्शनमात्रेण धनवानिह जायते ॥
दक्षकोपात्त्वं च देवि!पुराप्राणैर्विसर्जितैः। हिमाचले तथाजाता मयाप्राप्तापुनःप्रिये

प्रारब्धा च मया देवि! त्वया सार्द्धं रतिस्तदा।
दिव्यं वर्षशतं जातं साग्रं देवि प्रमोदतः।
अनुरागवशाच्चैव मन्मथेन प्रपीडिता ॥ ३ ॥

महारतिसमीक्ष्याथदेवाःसंक्षुब्धमानसाः। चक्रुर्मन्त्रंयथाकालंवासवाद्यायथोचितम्
दिव्यं वर्षशतं रुद्रो गौर्या सह सदारतिम्। कुर्वंस्तिष्ठतिदेवोऽसौमन्दरेचारुकन्दरे
अनयोर्बीजसम्पत्योः पुत्रो योहिभवेत्तदा। विनश्येत्तेन त्रैलोक्यमखिलंच न संशयः

तस्य तेजोऽपि नो वोढुं समर्था निश्चितं वयम्।
तस्मात्तत्क्रियतां कर्म रतिर्येनोपशाम्यति ॥ ७ ॥

उपायं दृष्टवांस्तत्र देवानां गुरुरग्रणीः। बृहस्पतिर्महातेजा वेदशास्त्रार्थपारगः ॥

गच्छन्तु त्रिदशाः सर्वे शिवस्य तु समीपतः।
स्वयं विज्ञाप्यतां देवस्तत्कर्म न करिष्यति ॥ ६ ॥
इति निश्चित्य ते देवि! जग्मुः शीघ्रं सुरास्तदा।
मन्दराद्रेः शुभे द्वारि स्थितास्ते विस्मयान्विताः॥ १० ॥

गणानामधिपोनन्दीद्वारितिष्ठतियत्नतः। त्वयासार्द्धमहंदेविकुर्वंस्तिष्ठामितांरतिम्
अथ प्रवेशो देवानां दुष्करो मम पार्श्वतः। तदाचिन्तयमानाश्चतत्रतिष्ठन्तितेसुराः
अग्निनातद्धितंवाक्यमुक्तंतेषांपुरः शुभम्। हंसरूपंसमास्थाययास्यामिशिवसन्निधौ
वञ्चयित्वा प्रतीहारं कृतं तेन तथैव च। हंसरूपेण कथितं कर्णे मम शुचिस्मिते

इन्द्राद्या अमरा देवा द्वारि तिष्ठन्ति संयताः।
श्रुत्वा तस्य च तद्वाक्यं ततोऽहं द्वारमागतः ॥ १५ ॥

ततश्च तैः कृतो मह्यं प्रणामश्चयथाक्रमम्। मयादृष्टाश्च तेदेवा युष्माकंकिंकरोम्यहम्
तैरुक्तं त्यज्यतां चैव सम्भोगस्तु सुदारुणः। तथामयाकृतंदेवि गतास्तेत्रिदिवंपुनः
ततः शप्तोमयानन्दी भूलोकंगच्छसत्वरम्। ततःशापपरिभ्रष्टःपृथिव्यां पतितस्तदा

सोच्छ्वासहृदयो दीनो दुःखव्याकुललोचनः।
विलपंश्च तथा नन्दी विलुठञ्छोकतो भुवि ॥ १६ ॥

वञ्चितश्चाग्निना बाढंवासवेनविशेषतः। किं मया दुष्कृतं कर्म कृतंकिञ्चित्पुरातनम्
स दृष्टो लोकपालैस्तुतामवस्थांगतोगणः। पृष्टश्चतैःकुतोनन्दिन्विलापंकुरुषेमहत्
सर्वं निवेदितं तेन तेषामग्रे च नन्दिना। उपायः कथितस्तैश्च महाकालवनं ततः ॥
ततश्च वचनं श्रुत्वा नन्दी रोमाञ्चकञ्चुकः। महाकालवने देवि!जगाम स तदा गणः

पूजयामास विधिवद्धृत्वा कापालिकीं तनुम् ॥ २३ ॥

अशरीरसमुत्पन्ना वाणी लिङ्गात्तदा प्रिये। सञ्जाता शापमोक्षस्तेप्रतीहार!सुभक्तितः

पूजितोऽसौ महाभक्त्या प्रतीहारेण नन्दिना ॥ २४ ॥

तदाप्रभृति लोकेऽस्मिन्प्रतीहारेश्वरेश्वरः। मया ते कथितोदेवि! प्रतीहारेश्वरस्य च

प्रभावः सर्वलोकानामत्यभीष्टफलप्रदः ॥ २५ ॥
पूजयिष्यन्ति ये भक्त्या प्रतीहारेश्वरं शिवम्।
स्थानभ्रंशो वियोगश्च तेषां स्वप्नेऽपि नो भवेत् ॥ २६ ॥

सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु। तत्सर्वंनाशमायातिप्रतीहारेश्वरार्चनात्
मनसा ये स्मरिष्यन्ति प्रतीहारेश्वरंशिवम्। एवंतस्य कुलंसर्वंयातिस्वर्गंनसंशयः

इति श्रीस्कान्देमाहापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये प्रतीहारेश्वरमाहात्म्यवर्णनंनाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

कुक्कुटेश्वरमहिमवर्णनम्

ईश्वर उवाच

एकविंशतिकं विद्धि कुक्कुटेश्वरसञ्ज्ञकम् । यस्यदर्शनमात्रेणतिर्यग्योनिर्न लभ्यते
कौशिकोनाम राजाऽभूत्कुक्कुटो जायते सदा । दृश्यतेवासरेभागे सर्वाभरणभूषितः

व्याप्ता च पृथिवी तेन सशैलवनकानना ।
पूर्वकर्मप्रभावेण प्राप्तं राज्यमकण्टकम् ॥ ३ ॥
विशालानाम विख्याता भार्या तस्य महीपतेः ।
रूपलावण्यसंयुक्ता चतुःषष्टिकलान्विता ॥ ४ ॥

तया चकारसहितः स राज्यंराजसत्तमः । सा वल्लभापिनृपतेःप्राणेभ्योऽपिगरीयसी
तयासार्द्धं कदाचिच्चसुरतं नास्तिपार्वति !। सन्तप्ता सर्वदा सा चरत्यभावाद्बभूवह
एवं गच्छति काले तु सहराज्ञास्मरातुरा । सर्वसत्त्वरुतज्ञा सा विशालाविपुलेक्षणा

ददर्श कीटमिथुनमनङ्गकलहातुरम् ॥ ७ ॥
प्रसादयंस्तथा कीटः स्वां प्रियां च मुहुर्मुहुः ।
दासोऽस्मि तव कान्तेऽहं रूपसौभाग्यसुन्दरि !॥ ८ ॥

भजस्व मां यथाकाममनङ्गशरपीडितम् । शिरसा प्रणतेनैव रचितस्ते मयाऽञ्जलिः

न त्वया सदृशी लोके कामिनी विद्यते क्वचित् ।
सुवर्णवर्णसदृशी मद्भक्ता चारुहासिनी ॥ १० ॥

कुतो वा मयिदीनेत्वंक्रुद्धेवप्रियवादिनि । किमर्थं वद कल्याणि सरोषवदनास्थिता
सा तमाहप्रकोपाच्चकिमालपसिमांवृथा । त्वयामोदकचूर्णन्तु मां विहायमनोरमाम्

प्रदत्तं कामलुब्धेन अन्यस्यै कीटकाधम !॥ १२ ॥

नाहमेवं करिष्यामि कीटः प्राह पुनः पुनः । स्पृशामि पादौसत्येन प्रणतस्यप्रसीद मे

इति तद्वचनं श्रुत्वा साप्रसन्नाऽभवत्तदा । आत्मानमर्पयामास कामनाय पिपीलिका
दृष्ट्वातन्महदाश्चर्यंसा राज्ञी विललाप ह । धिग्राज्यं धिक्चमे रूपंधिक्चयौवनमद्यमे

न कामिताऽहं कान्तेन मरिष्यामि न संशयः ॥ १० ॥

एवं विलप्य बहुधा विनिःश्वस्य पुनःपुनः । उन्मत्तेवविशालाक्षीगालवस्याश्रमंगता
दृष्ट्वा तमृषिमासीनं तपोयोनिं दृढव्रतम् । उवाच प्रणताङ्गी सा शोकसन्तप्तमानसा
एकोऽयं संशयो ब्रह्मन्हृदयेपरिवर्त्तते । वश्योऽपि हि च मे भर्त्ता रूपलावण्यवानपि

न जाने कारणं किं तु सङ्गमो नोपजायते ॥ १८ ॥

योगत्वाप्रमदाराज्यंजित्वा सर्वाःपुरा रणे । आजहारशुभास्तासांमध्यादष्टौवराङ्गनाः

नैव कामयते तासु किमेतदिति सुव्रत !॥ १६ ॥

वाजिनो वारणाश्चैव धनधान्यमनन्तकम् । वर्त्तते हि जनः सर्वोममाज्ञांपालयन्क्षितौ
केन कर्मविपाकेन ममेदं यौवनं दृढम् । व्यर्थं जातं द्विजश्रेष्ठ! रतिं न कुरुते नृपः ॥
दृश्यते वासरे भागे रात्रौ सैव न दृश्यते । इहजन्मकृतं चैतदाहोस्वित्पारलौकिकम्
दुष्कृतावर्जनं ब्रह्मन्ममेदं वक्तुमर्हसि । तस्यास्तद्वचनं श्रुत्वा गालवोवाक्यमब्रवीत्
शृणुपुत्रि पुरावृत्तं च प्रभावेन यत्कृतम् । अनेन राज्ञा धर्मज्ञे रात्रौ येन न दृश्यते ॥
विदूरथस्य तनयस्तव भर्ता स निश्चितम् । मांसाहारादिदोषरतिर्विषयासक्तमानसः॥

कुक्कुटानां च मांसेन प्रीतिस्तस्य तदाऽभवत् ।
बहवः कुक्कुटास्तेन भक्षिता राजसूनुना ॥ २६ ॥

एवं भक्षयतस्तस्य बहुशो वत्सरा गताः । कालेन महता राज्ञा ताम्रचूडेन मन्त्रिणः

पृष्टाः किं कारणं नात्र समायान्ति हि कुक्कुटाः ॥ २७ ॥
अथ केनापि कथितं कुक्कुटानां च भक्षणम् ।
विदूरथस्य पुत्रेण कौशिकेन दुरात्मना ॥
भक्षिताः कुक्कुटाः सर्वे विना कारणतो नृप !॥ २८ ॥

ताम्रचूडोऽथसङ्क्रुद्धोददौशापंदुरात्मने । कौशिकायक्षयोरोगोभविष्यतिभयावहः

तदा प्रभृत्यभूत्क्षीणो राजपुत्रो दिने दिने ।

औषधैरधिकोऽभ्येति व्याधिना पीडितो भृशम् ॥ ३० ॥

अथ केनापि कामेन वामदेवाश्रमंगतः । क्षयरोगाभिभूतोऽसौ मरणोत्सुकमानसः

पप्रच्छ वामदेवं स नमस्कृत्य पुनःपुनः ॥ ३१ ॥

भगवन्केन पापेन क्षीयतेऽहर्निशं वपुः । मदीयं पोष्यमाणं हि मांसेन विविधेन च

वामदेवोऽथ तं प्राह कुक्कुटा भक्षितास्त्वया ।

ताम्रचूडेन शप्तोऽसि कुक्कुटानां नृपेण हि ॥ ३३ ॥

तमेव शरणं गच्छ स उपायं गदिष्यति ।

ततः स ताम्रचूडस्याभ्यर्णमागान्नृपात्मजः ॥ ३४ ॥

दृष्ट्वा च ताम्रचूडं तं महाभक्त्याकृताञ्जलिः । प्रोवाचरगरोभूत्वापाहिमांशरणागतम्

अज्ञानाद्भक्षितादेव कुक्कुटाःपुष्टिकारणात् । क्षन्तुमर्हसिदेवेश ममागः कृपणस्य च

प्रोवाच ताम्रचूडोऽथयस्मात्प्रार्थयसेनृप । तस्मात्तेवासरेप्राप्ते पुरुषत्वं भविष्यति

शास्ता गोप्ता च लोकानां राजा दण्डधरः प्रभुः ।

कुक्कुटो भविता रात्रौ सर्वरोगविवर्जितः ॥ ३८ ॥

अतो न दृश्यते पुत्रि! तिर्यग्भावं समाश्रितः॥ ३६ ॥

इति तस्य वचःश्रुत्वा गालवस्य महात्मनः ।

सा सम्पूज्य विशालाक्षी गालवं मुनिसत्तमम् ॥

प्रपच्छ परया भक्त्या शापान्तो हि कथं भवेत्॥ ४० ॥

गालवः कथयामास ध्यानेनालोक्य यत्नतः ॥ ४१ ॥

महाकालवनेलिङ्गंपक्षियोनिविमोचनम् । उवालेश्वरस्यदेवस्यपूर्वभागेव्यवस्थितम्

तस्य दर्शनमात्रेण शापस्यान्तो भविष्यति ॥ ४२ ॥

सा प्रणम्य मुनिश्रेष्ठमाजगाम त्वरान्विता ।

यत्रास्ते नृपशार्दूलो विध्यन्बहुविधान्मृगान् ॥ ४२ ॥

प्रफुल्लनयनाभ्यां सा दृष्ट्वा लोकेक्षणाप्रिया । आह्लादिताबहुविधैः कोमलैर्वचनामृतैः

ततस्तेनसदाराज्ञाप्रोक्तासामृगलोचना । इदानींकिमयाकान्ते! कार्यंभवतिकथ्यताम्

तयाप्रोक्तं महाराज गम्यतेऽद्य मया सह । महाकालवने पुण्ये सर्वदुष्कृतनाशने ॥४६

तस्यास्तद्वचनं श्रुत्वा त्वरमाणो मुदान्वितः ।

तया नीतोऽथ नृपतिर्लिङ्गस्यास्य समीपतः ॥ ४७ ॥

पूजयित्वाथतल्लिङ्गं पक्षियोनिविमोचनम् । तत्रैव च स्थितोराजाप्रिययासहपार्वति

तस्यां रात्रौ न सञ्जातःकुक्कुटोयादृशःसदा । शिवप्रसादादभवद्दिव्यरूपीमनोहरः

रूपेण निर्जितः कामस्तेनाप्रतिमतेजसा । ततो विस्मयमापन्नश्चिन्तयामासपार्थिवः

कोऽयं प्रभावो येनाहं शापान्मुक्तः सुदुस्तरात् ॥ ५० ॥

प्रियां पप्रच्छ नृपतिः पूर्णेन्दुवदनां भृशम् । कथंशापाद्विमुक्तोऽहं केनपुण्येन कर्मणा

अथ सा कथयामास वृत्तान्तं विस्तरान्मुदा ।

गालवेन हि यत्प्रोक्तं यत्किञ्चिच्छापमोक्षणम् ॥ ५२ ॥

राजञ्छापाद्विमुक्तोऽसि लिङ्गस्यास्य प्रभावतः ।

पुनः प्रसाद्य तल्लिङ्गं भुक्त्वा भोगांश्चिरं भुवि ॥ ५३ ॥

तयासार्द्धंययौराजा स्वर्गं सुरगणैःस्तुतः । तदाप्रभृति तल्लिङ्गंकुक्कुटेश्वरसञ्ज्ञकम्

विख्यातं देवि! लोकेऽस्मिन्सर्वकामफलप्रदम् ।

तच्च ये पूजयिष्यन्ति कुक्कुटेश्वरसञ्ज्ञकम् ॥

तिर्यग्योनिं न यास्यन्ति न वियोगो भविष्यति ॥ ५५ ॥

न चापिनरकावाप्तिर्न दुःखं न जराभयम् । नाकालेमरणं नृणां न च कष्टं भविष्यति

रूपसौभाग्यसम्पन्ना भविष्यन्ति युगेयुगे । चतुर्दश्यांप्रपश्यन्तिलिङ्गंयेकुक्कुटेश्वरम्

तेषां कुले च ये केचित्पितरो निरयस्थिताः ॥ ५७ ॥

तिर्यग्योनिगतायेचपशुयोर्नितु ये गताः । वृक्षत्वमथवा प्राप्तास्तेषांमोक्षोभविष्यति

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये कुक्कुटेश्वरमाहात्म्यवर्णनं नामैकविंशोऽध्यायः

———

द्वाविंशोऽध्यायः

कर्कटेश्वरमाहात्म्यवर्णनम्

श्रीविश्वनाथ उवाच

द्वाविंशतितमं विद्धि कर्कटेश्वरसञ्ज्ञकम् । यस्य दर्शनमात्रेण तिर्यग्योनिर्न दृश्यते
आसीत्पुरा बृहत्कल्पे धर्ममूर्तिर्जनाधिपः । सुहृच्छक्रस्य निहतायेन दैत्याः सहस्रशः
सोमसूर्यादयो यस्य तेजसा निष्प्रभाः कृताः । प्रजाश्चपालितायेननिहत्यसमरेद्विषः
यथेच्छारूपधारीच सङ्ग्रामेष्वपराजितः । तस्यभानुमतीनामभार्या त्रैलोक्यसुन्दरी
राज्ञस्तस्याग्रमहिषी प्राणेभ्योऽपि गरीयसी ।
दशनारीसहस्राणां मध्ये श्रीरिव राजिता ॥ ५ ॥
नृपो नृपसहस्रेण न कदाचित्प्रमुच्यते । कदाचिदेकान्तगतः पप्रच्छ स्वपुरोहितम्
विस्मयेनावृतमना वशिष्ठमृषिसत्तमम् ॥ ६ ॥
भगवन्केन धर्मेण मम लक्ष्मीरनुत्तमा । कस्माच्च विपुलं तेजो दुःसहं मम दृश्यते ॥

वसिष्ठ उवाच

पुरा त्वमवनीपाऽऽसीः शूद्रजातिसमुद्भवः । बहुदोषसमाविष्टो दुष्टया भार्ययाऽनया
निवसन्दुष्टहृदयो वर्षाणि सुबहून्यपि । महाक्रोधाभिभूतात्मा सदा निष्ठुरजल्पकः
सदा ब्रह्मस्वहारी त्वं सदावेदविनिन्दकः । सदाचासूयकोराजन्सदाविश्वासघातकः
अथ पञ्चत्वमापन्नः काले नरकमाप्तवान् । ताम्रभ्राष्ट्रे परं दग्धो दशवर्षाणि पञ्च च,
रौरवं कुम्भिपाकेचमहारौरवसञ्ज्ञके । सूक्ष्माणितिलमात्राणिकृत्वा खण्डान्यनेकशः
मूषायां धमितो राजन्नसिपत्रे च दारितः । शेषपातकशुद्ध्यर्थं धरायामवतारितः
विधाय कार्कटं रूपं यमेन त्वयि पार्थिव !।
शिवस्य सरो विख्यातं महाकालवनोत्तमे ॥ १४ ॥
दत्तं जप्तं कृतं यच्च हुतं देवार्चनादियत् । सर्वं तदक्षयं कर्म तस्मिन्सरसि विश्रुतम्

निक्षिप्तस्त्वंतदातेनभाविपुण्येनकर्मणा । तत्र स्थितस्त्वंभूपाल वर्षाणांपञ्चकंतथा
कदाचित्तीरभूम्यां त्वं गतः सङ्क्रीडितुं शनैः ।
समीक्ष्य तत्र काकेन धृत्वा चञ्चुपुटेन च ॥ १७ ॥
आकाशमार्गं चोड्डीनः स त्वया ताडितो भृशम् ।
त्वत्तीक्ष्णपातैश्चरणैस्ताडितो व्यथितस्तदा ॥ १८ ॥
मुक्तस्त्वं चञ्चुपुटतो वायसेनाकुलेन तु । स्वर्गद्वारस्य पूर्वे तु देव्यगारे सुपुण्यदे
शिवस्य क्षिप्तस्त्वं शीघ्रं चञ्च्वाक्षेपप्रपीडितः ।
मृतोऽसि सन्निधौ तत्र देवस्य परमेष्ठिनः ॥ २० ॥
विमुच्य देहं तज्जीर्णं यावत्तं कार्कटं पुरा । तत्क्षणाद्दिव्यदेहश्च दिव्याभरणभूषितः
तस्य लिङ्गस्य माहात्म्याद्भूत्वा विद्याधरेश्वरः ।
कामगेन विमानेन पूज्यमानो गणेश्वरैः ॥ २२ ॥
स्वर्गे व्रजंस्त्वं सम्पृष्टः सुरसङ्घैश्च सादरम् ।
कोऽयं महात्मा मुदितो याति दिव्यपथोऽम्बरात् ॥ २३ ॥
ततोरुद्रगणैः सर्वं सुराणांकथितम्पुरा । वृत्तान्तंविस्तरात्सर्वं कार्कटत्वविमोचनम्
तस्य लिङ्गस्य देवेशाः प्रभावोऽयमुपस्थितः ।
देवैः प्रोक्तश्च सहसा लिङ्गस्यास्य प्रभावतः ॥ २५ ॥
कार्कटीयोनिमुक्तस्य प्राप्तं स्वर्गसुखंयतः । कर्कटेश्वरनामायमतो लोके भविष्यति
तदाप्रभृति देवोऽयं कर्कटेश्वरसञ्ज्ञकः । त्वया स्वर्गे महाभोगाभुक्ताराजन्यथेच्छया
आगतोऽसि पुनर्भूमौ लब्धं राज्यमकण्टकम् ।
तस्य लिङ्गस्य माहात्म्याज्ज्ञातं सर्वं तवाधुना ॥ २८ ॥
तस्मात्पार्थिव!भूयस्त्वंलिङ्गमाराधयद्द्रुतम् । जातिस्मरत्वमापन्नो वशिष्ठवचनात्तदा
पूर्वं कर्म स्मृतं तेन स्वकीयं पार्थिवेन तु । पुनर्गत्वा च तल्लिङ्गं पूजयामासयत्नतः
तस्मिंल्लिङ्गे लयम्प्राप्तः स्वशरीरेण पार्वति !।
येऽर्चयन्ति सदा भक्त्या कर्कटेश्वसञ्ज्ञकम् ॥

भुक्त्वा भोगांश्चिरं भूमौ ते यान्ति परमां गतिम् ॥ ३१ ॥

नियमेन प्रपश्यन्ति ये देवं कर्कटेश्वरम् । अष्टम्यां वा चतुर्दश्यां तेषां पुण्यफलं शृणु
सूर्यदीप्तिप्रतीकाशैर्विमानैः सार्वकामिकैः । मृता मम पुरं यान्ति त्रिसप्तकुलसंयुताः
तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोरमैः । कल्पकोटिशतं देवि! सेव्यमाना वसन्ति हि
तदन्ते विष्णुभवने तावत्कालं वसन्ति हि । वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैस्तु सेविताः

विष्णुलोकाद् ब्रह्मलोकं सम्प्राप्य मुदिताः पुनः ।

भोगान्नानाविधान्भुक्त्वा ततो यान्ति परम्पदम् ॥ ३६ ॥

दशाश्वमेधैर्यत्पुण्यं तत्फलं तीर्थयात्रया । कर्कटेश्वरदेवस्य मेघनादेश्वरं शृणु ॥३७॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कर्कटेश्वरमाहात्म्यवर्णनं नाम
द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

मेघनादेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

मेघनादेश्वरं देवि! त्रयोविंशतिमं शृणु । यस्य दर्शनमात्रेण प्राप्यन्ते सर्वसिद्धयः
राजमूला महादेवि! योगक्षेमाः सुवृष्टयः । प्रजाश्च व्याधयश्चैव मरणं च भयानि च ॥

राजा कृतं तथा त्रेता द्वापरश्च तथा कलिः ।

राजमूलानि सर्वाणि राजा धर्मस्य कारणम् ॥ ३ ॥

राजा बभूव लोकेऽस्मिन्मदान्धो नाम पार्वति । अहङ्कारावृतो दुष्टो देवब्राह्मणकण्टकः
कलिद्वापरयोः सन्धौ तस्य दोषाच्च भामिनि । अनावृष्टिरभूद्घोरा लोके द्वादशवार्षिकी
न ववर्ष सहस्राक्षः प्रतिलोमोऽभवत्प्रभुः । नादृश्यन्तापि राज्यन्ते कुत एवाभ्रजातयः

नद्यः संक्षिप्ततोयौघाः क्वचिदन्तर्हितास्तदा । निवृत्तयज्ञस्वाध्याया निर्वषट्कारमङ्गलाः
उच्छिन्नकृषिगोरक्षा निवृत्तविपणास्तथा । अस्थिकङ्कालसङ्कीर्णा हाहाभूतनराकुलाः
शून्यभूयिष्ठनगरा दग्धग्रामनिवेशिनः । गोजाश्वमहिषैर्हीना भक्ष्यमाणाः परस्परम्
आश्रमान्सम्परित्यज्य पर्यधावन्निरस्ततः । ब्राह्मणा दुःखबहुला मृता नष्टाश्च पार्वति
सृष्टिरुन्मूलिता सर्वा जङ्गमा स्थावराखिला । एतस्मिन्नन्तरे देवाः शक्राद्या भयविह्वलाः
शरण्यं शरणं जग्मुर्देवदेवं जनार्दनम् । क्षीरोदस्योत्तरे कूले श्वेतद्वीपं मनोरमम् ॥
ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् । सदानन्दकरं शान्तं सूर्यकोटिसमप्रभम्

स्वेच्छाकल्पितविन्यासप्रासादशयनासनम् ।

वज्रेन्द्रनीलवैडूर्यचन्द्रकान्तादिदीपितम् ॥ १४ ॥

जरामृत्युभयोपेतसर्वव्याधिविवर्जितम् । तस्मिन्द्वीपे ततो देवि सूर्यकोटिसमप्रभम्

साष्टाङ्गां प्रणतिं कृत्वा ते देवाः स्तुतिमब्रुवन् ॥ १५ ॥

भवान्ब्रह्मा च रुद्रश्च महेन्द्रो देवसत्तमः । भवान्कर्त्ता विकर्त्ता च लोकानां प्रभवोऽव्ययः
एवं च सत्यं परमं तपश्च परमं तथा । पवित्रं परमं मार्गं यज्ञस्त्वं परमः प्रभो ॥
परं हौत्रं परं धाम त्वामाहुः पुरुषं परम् । एवं स्तुतस्तदा तैस्तु देवदेवो वरानने!

प्राह देवांस्ततः कृष्णः किं करोम्यद्य वः सुराः ।

विज्ञप्तस्तैर्हरिर्देवो ह्यनावृष्ट्या प्रपीडितैः ॥ १६ ॥

उपायः कथ्यतां देव तुष्टिः पुष्टिर्यथा भवेत् । ध्यानेन चिन्तयित्वा च कथयामास केशवः
गच्छध्वं त्रिदशाः सर्वे महाकालवने शुभे । लिङ्गं वृष्टिकरं तत्र पुरा मेघैः प्रतिष्ठितम्

मेघा वृष्टिकराः सर्वे तस्मिँल्लिङ्गे च सन्ति वै ।

तस्य लिङ्गस्य माहात्म्याद्वृष्टिरेव भविष्यति ॥ २२ ॥

प्रतीहारेश्वराद्देवादीशाने विद्यते सुराः । तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति
महाकालवने प्राप्ता यत्रास्ते लिङ्गमुत्तमम् । तुष्टुवुः परया भक्त्या दृष्ट्वा देवं मनोरमम्
नमस्तेऽस्तु महेशाय नमोऽनन्ताय मालिने । नमस्तैजसमूर्त्ताय नमः सौन्दर्यशालिने
नमो योगाय वेदाय नमः पिङ्गजटाय ते । अनन्तज्ञानदेहाय नम ईश्वरमूर्त्तये ॥ २६ ॥

नमःशुभ्राट्टहासायनमस्तेऽस्तुशिखण्डिने । शङ्करायनमस्तेऽस्तुनमस्तेस्तुपिनाकिने
नमोऽन्तकायभव्यायत्र्यम्बकायास्तुतेनमः । नमस्तेबहुरूपाय नमस्तेऽचिन्त्यमूर्त्तये
नमो योगशरीराय नमस्ते सर्व सर्वदा । नष्टं देव जगत्सर्वमनावृष्ट्या प्रपीडितम् ॥
सुवृष्ट्या देवदेवेश पाहि नः शरणागतान् । एतस्मिन्नन्तरे मेघा पार्वणाङ्गारवर्चसः
लिङ्गमध्यात्समुत्तस्थुर्वादयन्तो नभस्तलम् । अन्योन्यवेगाभिहतावववृषुर्भूतले तदा
जातं विनिष्प्रभं सर्वं न प्राज्ञायत किञ्चन । तिमिरौघपरिक्षिप्ता रेजुश्चाथदिशोदश
तेतस्यदेवदेवस्यमाहात्म्येनप्रतोषिताः । देवाः प्रीतिपरांजग्मुः सर्वेऽमृतमिवोत्तमाः
ततस्तमः संहरन्तो विनेशुश्च बलाहकाः । प्रववुःशीतला वाताःप्रशान्ताश्चदिशोदश

शुद्धप्रभाणि ज्योतींषि सोमं चक्रुः प्रदक्षिणाम् ।
अविग्रहं ग्रहाश्चक्रुः प्रशान्ताश्चापि सिन्धवः ॥ ३५ ॥

महर्षयोविशोकाश्चगन्धर्वाश्च कलं जगुः । अभूत्सृष्टिःपुनःसर्वालिङ्गस्यास्यप्रभावतः
सुरैःसम्पूज्यभक्त्यातेचक्रुर्नामयथार्थतः । अस्यलिङ्गस्यमाहात्म्यं दृष्ट्वाप्रीताःसुराबहु
मेघनादेश्वरं नाम भविष्यत्यस्य सर्वतः । मेघनादेश्वराख्यानं मया ते कथितं प्रिये

भविष्यन्ति नरा भूमौ कृतार्थास्तत्प्रभावतः ।
दर्शनादस्य लिङ्गस्य कामवृष्टिर्भविष्यति ॥ ३६ ॥

कल्पकोटिसहस्राणि कल्पकोटिशतानि च । कुर्वंल्लिङ्गस्य स्नपनं रुद्रलोकेमहीयते
प्रभावः पठ्यते यत्र मेघनादस्य पार्वति । अतिवृष्टिश्चैव ततो भविष्यति च भूतले

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये मेघनादेश्वरमाहात्म्यवर्णनंनामत्रयोविंशोऽध्यायः ॥ २३॥

चतुर्विंशोऽध्यायः

महालयेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

महालयं महाभागे चतुर्विंशतिकं शुभम् । ब्रह्मादिस्तम्बपर्यंतं त्रैलोक्यंसचराचरम् ॥
उत्पादितं धृतं व्याप्तं त्वया देव मया श्रुतम् । त्वयैकेन विशुद्धेन सर्वगेन महात्मना
अत्यर्थं मुनयःसर्वेमुदितामौनिनोऽव्ययाः । वदन्ति कारणंचास्यत्रैलोक्यस्यमहेश्वर
त्वया सर्वमिदं सृष्टं त्रैलोक्यं भूर्भुवादिकम् । उत्पाद्यमानमुत्पन्नं प्रलीयच्चसहस्रशः
देवदानवगंधर्वमुनिचारणभोगिनाम् । उत्पत्तिस्थितिसंहारास्त्वया दृष्टामुहुर्मुहुः ॥
जगच्चराचरं देव कुत्र स्थित्वा सृजस्यलम् । लीलया संहरस्येतत्प्रसादाद्वक्तुमर्हसि

कोऽसौ महालयो रौद्रग्रहरूपी व्यवस्थितः ।
यस्मिन्धृतं त्वया सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ ७ ॥

इतिपृष्टस्त्वयादेवि!मयातेकथितं पुरा । इदानीं कथयिष्यामि शृणुष्वैकाग्रमानसा
पृथिव्यादीनि भूतानि महाकालवने प्रिये । धृतानि प्रलयस्यान्ते एकोद्देशेमहालये
ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् । स्थानं महालयं तत्र ममानन्दकरंपरम् ॥
परंब्रह्ममयं लिङ्गं तत्रतिष्ठति सर्वदा । तस्यलिङ्गस्य मध्ये तु धृतंकृत्स्नंचराचरम्
तत्र ब्रह्मादयो देवाविष्णुस्तत्रैवसंस्थितः । लिङ्गस्याभ्यंतरेदेविसर्वमेवाधितिष्ठति

तस्माल्लिङ्गात्समुत्पन्नो महानात्मा महामतिः ॥ १२ ॥
भूतादिश्चाप्यहङ्कारो विष्णुः शम्भुश्च पार्वति!।
बुद्धिःप्रज्ञा धृतिः ख्यातिः स्मृतिर्लज्जा सरस्वती ॥ १३ ॥
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥
अस्माद्भूतानि लिङ्गानि महाभूतानि पञ्च वै ।

पृथिवी वायुराकाशमापो ज्योतिः प्रलीयते ॥ १५ ॥

स्थलमापस्तथाकाशंजन्मचापिचतुर्विधम् अण्डजोद्भिज्जश्चसस्वेदंजरायुजमथापिवा चतुर्द्धा जन्मचिह्नंयल्लिङ्गेऽस्मिन्नेवलक्ष्यते। तपः कर्म च पुण्यञ्च व्रतं दानं तथैव च

रजःसत्त्वं तमोभावस्तस्माल्लिङ्गाच्च जायते।

तस्मिंस्तच्छ्रूयते सत्यं ज्योतिर्ब्रह्म सनातनम् ॥ १८ ॥

अव्यक्तकारणं सूक्ष्मं यत्तत्सदसदात्मकम्। यस्मात्पितामहोजज्ञे प्रभुरेकःप्रजापतिः

विश्वेदेवास्तथादित्या वसवोऽथाश्विनावपि।

यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा ॥ २० ॥

आपो द्यौःपृथिवीवायुरन्तरिक्षं दिशस्तथा।

सम्वत्सरर्तवो मासाः पक्षाहोरात्रयस्तथा ॥ २१ ॥

यच्चान्यदपितत्सर्वंसम्भूतंलोकसाक्षिकम्। यदिदंदृश्यतेकिञ्चित्तस्यान्तेच प्रलीयते अतोमहालयोनाम विख्यातोभुवनत्रये। मुक्तीश्वरस्यदेवस्य दक्षिणेसम्व्यवस्थितः

यः पूजयति तल्लिङ्गं रुद्रमूर्त्या महालयम्।

त्रैलोक्यविजयी नित्यं कीर्त्तिमान्स नरो भवेत् ॥ २४ ॥

महालयेश्वरे पुण्ये पूजिते परमेश्वरे। भक्त्या परमया चैव सर्वे देवाः सुपूजिताः॥

भवन्तीह महाभागे! यतस्तैरपि पूज्यते ॥ २५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये महालयेश्वरमाहात्म्यवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

मुक्तीश्वरवर्णनम्

श्रीहर उवाच

पञ्चविंशतिकन्देवं विद्धि मुक्तीश्वरं प्रिये। यस्य दर्शनमात्रेण मुक्तिर्भवति पार्वति पुराराथन्तरे कल्पे बभूव द्विजसत्तमः। मुक्तिर्नाममहाभागे संशितात्मा जितेन्द्रियः महाकालसमीपे तु मुक्तिलिङ्गमनुत्तमम्। महाकालवने रम्ये तत्रास्ते योगतत्परः

ततस्तेपे जिताहारो वत्सराणि त्रयोदश।

कदाचित्स्नोऽभिषेकाय आजगाम महानदीम् ॥ ४ ॥

शिप्रांविप्रप्रियांपुण्यांमहापातकनाशिनीम्। तत्रस्नात्वाजपन्विप्रोददर्शायान्तमग्रतः व्याध्रं महाधनुष्पाणिं रक्तनेत्रंसुभीषणम्। वदन्तं हन्तुकामम्वै बल्कलानांजिघृक्षया तं दृष्ट्वा क्षुभितोविप्रोब्रह्मघ्नस्यभयादिति। ध्यायन्नारायणन्देवं तस्थौतत्रैवसद्विजः तं दृष्ट्वान्तर्गतहरिर्व्याधो भीत इवाग्रतः। विहाय सशरं चापं ततो वचनमब्रवीत् ॥

व्याध उवाच

हन्तुमिच्छुरहं ब्रह्मन्भगवन्तमिहागतः। इदानीं स्वगताबुद्धिस्त्वां दृष्ट्वै व महाप्रभम्

ब्राह्मणानां सहस्राणि स्त्रीणामयुतशस्तथा।

निहतानि मया ब्रह्मन्वृत्तिहेतोः कुटुम्बिना ॥ १० ॥

नच मे व्यथितंचित्तंकदाचिदपिजायते। इदानींतप्तुमिच्छामितपोऽहंत्वत्समीपतः उपदेशप्रदानेन प्रसादं कर्तुमर्हसि। एवमुक्तो ह्यसौ विप्रो नोत्तरम्प्रत्यपद्यत ॥१२ ब्रह्महापापकर्मेतिमत्वाब्राह्मणपुङ्गवः। अनुक्तोऽपिस धर्मस्तुव्याधस्तत्रैवतस्थिवान्

स्नात्वा सद्यः समायातो मुक्तिलिङ्गसमीपतः।

द्विजेन सहितो देवि! दृष्ट्वा देवं सनातनम् ॥ १४ ॥

तत्क्षणाद्दिव्यदेहस्तु तस्मिंल्लिङ्गेलयंगतः। दृष्ट्वातन्महदाश्चर्यं मुक्तिर्विप्रो निजान्तरे

चिन्तयामास सहसा मुक्तिः प्राप्ता वरानने !॥ १५ ॥

व्याधेन पापयुक्तेन समाधिरहितेन च । मया पुनः समाचीर्णं तपः परमदुष्करम् न प्राप्ता परमा मूर्त्तिर्मुक्तिर्नैव च लभ्यते । एवं सचिन्तयित्वाथवैराग्याद्‌ब्राह्मणर्षभः

अन्तर्जलगतो भूत्वा चचार विपुलन्तपः ॥ १७ ॥

कस्यचित्त्वथ कालस्य तां नदीमगमत्किल ।

व्याघ्रो बुभुक्षितः साध्वि! तं विहन्तुं समुद्यतः ॥ १८ ॥

अन्तर्जलचरं विप्रं यावद्‌व्याघ्रो जिघृक्षति ।

नमोनारायणायेति तावद्वाक्यं द्विजोऽब्रवीत् ॥ १६ ॥

व्याघ्रेणापि श्रुतो मन्त्रोऽजहात्प्राणांश्च तत्क्षणात् ।

दिव्याम्बरधरो देवि! दिव्याभरणभूषितः ॥

दिव्यालङ्कारशोभाढ्यः पुरुषश्चाभवच्छुभः ॥ २० ॥

सोऽब्रवीद्यामि तं देशं यत्र विष्णुः सनातनः ।

त्वत्प्रसादाद् द्विजश्रेष्ठ! मुक्त्वा शापान्निरामयः ॥ २१ ॥

इत्युक्ते ब्राह्मणःप्राह कोऽसित्वंपुरुषर्षभ !। सोऽब्रवीदस्मिराजेन्द्रप्रतापीपूर्वजन्मनि दीर्घबाहुरितिख्यातः सर्वधर्मविशारदः । अहं जानामिवेदांश्चशास्त्राणिविविधानिच शुभाशुभमहं वेद्मि सर्वज्ञोऽहं महीतले । ब्राह्मणैर्नैव मे कार्यं किं वस्तु ब्राह्मणा इति

तस्यैकस्मिन्दिने विप्राः सर्वे क्रोधसमन्विताः ।

ददुः शापं दुराधर्षं क्रूरो व्याघ्रो भविष्यति ॥ २५ ॥

अपमानेन विप्राणां मांसाहारी भयावहः। सञ्जातोऽस्मिद्विजश्रेष्ठपश्यकालविपर्यये इत्युक्तोऽहं पुरा तैस्तु ब्राह्मणैर्वेदपारगैः । दुर्धर्षोऽयं मया प्राप्तो ब्रह्मशापोद्विजर्षभ ततस्ते ब्राह्मणाः सर्वे प्रणिपत्य मयामुने। प्रसादिता भृशं विप्र!तदा गद्गदया गिरा

जानामि तेजो विप्राणां महाभाग्यञ्च धीमताम् ।

अपेयः सागरः क्रोधात्कृतो यैर्लवणोदकः ॥ २६ ॥

तथैवदीप्ततपसां मुनीनांभावितात्मनाम् । येषांक्रोधाग्निरद्यापिकण्डके नोपशाम्यति

ब्राह्मणानां परीभावाद्वातापिश्च दुरात्मवान् ।

अगस्तिमृषिमासाद्य जीर्णः क्रूरो महासुरः ॥ ३१ ॥

सर्वभक्षः कृतो वह्निर्भृगुणा कारणान्तरे । गौतमेन पुरा शक्रः स सहस्रभगः कृतः दशधा केशवो जज्ञे ब्रह्मशापात्सुदुस्तरात् । प्रसन्नैर्वालखिल्यैश्चपक्षीन्द्रोगरुडःकृतः अश्विनौ देवभिषजौच्यवनेनमहात्मना । विष्टम्भयित्वाकुलिशंकृतौतौसोमपायिनौ कार्त्तवीर्यार्जुनेनैव बाहूनां च सहस्रकम् । दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् ॥ पुरासेन्द्रावशिष्टेन रक्षितास्त्रिदिवौकसः । ब्राह्मणप्रभवं सौख्यंकीर्तिरायुर्यशोबलम् लोकालोकेश्वराश्चैव सर्वे ब्राह्मणपूर्वकाः । एते हि सोमराजान ईश्वराः सुखदुःखयोः भस्मीकुर्युर्जगदिदं क्रुद्धाःप्रत्यक्षदर्शनाः । प्रभावाबहवश्चापि श्रूयन्ते ब्रह्मवादिनाम् क्रोधश्चविपुलःसद्यःसद्यःप्रत्ययकारकः । अहं कोपाद्द्विजेन्द्राणांगतोनिरययातनाम्

नित्यं क्रोधाच्छ्रियं रक्षेद्धनं रक्षेत्समत्सरात् ।

विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ॥ ४० ॥

मयाऽज्ञानात्कृतं पापं राजगर्वेण दैवतः। क्षन्तुमर्हथ विप्रेन्द्रा भवतः शरणागतम् ॥ अथ तुष्टाद्विजाःसर्वेत ऊचुर्मामिदंमुदा । षष्ठान्नकालिकस्तेऽग्रे यदास्थास्यतिकश्चन

मांसभोक्ता च भविता कञ्चित्कालं नराधिप !।

यदा शिप्रान्तरे पुण्ये स्नातस्तु द्विजसत्तमः ॥ ४३ ॥

अन्तर्गलगतेनोक्तो नमो नारायणेति च । जिघृक्षुर्व्याघ्ररूपेण तदा मुक्तो भविष्यसि एवं स भवता प्रोक्तोनमोनारायणेतिच । मंत्रः श्रुतोमयात्वत्तस्तस्येयं व्युष्टिरागता जातोऽहं दिव्यदेहस्तुप्रसादात्तवसुव्रत !। स कृतार्थोऽस्मिसञ्जातोभगवन्दर्शनात्तव परं च गृह्यतां मत्तोयश्च ते संशयो हृदि । तं च ब्रूहि द्विजश्रेष्ठ! सर्वंसम्पादयामिते

तवोपदेशदानेन आनृण्यं गन्तुमुत्सहे ॥ ४८ ॥

इति तस्य वचः श्रुत्वा दिव्यदेहस्य स द्विजः ।

प्रोवाच परया तुष्ट्या प्रफुल्लमुखपङ्कजः ॥ ४६ ॥

अद्य मे सफलं ज्ञानमद्य मे सफलं तपः । अद्य मे सफला जिह्वा सफलं चक्षुरद्य मे॥

श्रुतं देवेन सम्प्रोक्तंस्नात्वापश्यन्तिदेहिनः । प्राक्छरीरगतं तेऽद्य व्याघ्ररूपन्तपोत्तम
तेजोमयं शरीरं तु ब्रह्मरूपं सनातनम् । यदि त्वहमनुग्राह्यो यद्येवं कर्तुमर्हसि ॥
कारणं श्रोतुमिच्छामि हृदि मे वर्त्तनेचिरम् । कथं मुक्तिर्महाभागमुक्तिकामेनयत्नतः
योगाभ्यासरतेनापि वत्सरांश्च त्रयोदश । न लब्धा परमाश्चर्यं तपसा दुष्करेण तु

व्याधेनापि भृशं तेन प्राप्ता मुक्तिः क्षणेन तु ।
अत्र मे संशयो जातः को हेतुः कथ्यतां भृशम् ॥ ५५ ॥

तस्य तद्वचनं श्रुत्वा ततो वचनमब्रवीत् । कथयामि परं गुह्यं रहस्यंमुक्तिलक्षणम्
महादेवमुपास्याशु मुने मुक्तिः सुदुर्लभा । पुरातनैस्तु विद्वद्भिरिदमुक्तं महात्मभिः
श्रृणुष्वैकमना विप्र कुरुयत्नंयथार्थतः । मन्नियोगाद्द्विजश्रेष्ठततोमुक्तिमवाप्स्यसि

शप्तोऽहं तैर्यदा विप्रैस्तदा मे तोषिता भृशम् ।
ममानुकम्पया प्रोक्तं मुक्तिस्ते भविता नृप ! ॥ ५६ ॥

मुक्तिकामो महाकालेमुक्तिर्ब्राह्मणसत्तमः । विद्यतेतपसायुक्तः स ते प्रश्नंकरिष्यति
मुक्तीश्वरंतदा लिङ्गंतस्याग्रेकथयिष्यसि । तवापितस्यमुक्तेश्चमुक्तिरेवंभविष्यति

पूर्वं हि चिह्नितं कर्म देहिनो न विमुञ्चति ।
धात्रा विधिरयं दृष्टो बहुधा कर्मभिश्च यः ॥ ६२ ॥

इतितस्य वचःश्रुत्वा स विप्रोब्रह्मवित्तमः । अन्तर्जलात्समुत्थायततोवचनमब्रवीत्

दिष्ट्या त्वमागतो भूप! दिष्ट्या ते सङ्गतं मया ।
ईदृशा दुर्लभा लोके नरा मुक्तिप्रदर्शकाः ॥ ६४ ॥
इत्युक्त्वा नृपविप्रौ तौ मुक्तिलिङ्गं समागतौ ।
दर्शनार्थं विशालाक्षि! दृष्ट्वा देवं सनातनम् ॥ ६५ ॥

तत्क्षणात्सशरीरौ तौ तस्मिँल्लिङ्गेलयंगतौ । ईदृशोऽयंमयादेवि!महिमाकथितस्तव

अस्य लिङ्गस्य संस्पर्शान्मुक्तिर्भवति नान्यथा ।
येऽर्चयन्ति सदा भक्त्या मुक्तिलिङ्गं सनातनम् ।
अपि पापसमायुक्ताः (स्ते) स याति (न्ति) परमां गतिम् ॥ ६७ ॥

रे मूढाः किंतपोभिश्च किंदानैर्नियमैश्च किम् । कुरुध्वंमुक्तिलिङ्गस्यदर्शनंमुक्तिदायकम्
न मां विदुर्देवगणा नासुरा न महर्षयः । परं रूपंविशालाक्षियदस्मद्द्युति निर्मलम्
न मे वेत्तिपरंरूपंस्वयंसाक्षात्प्रजापतिः । नविष्णुस्त्रिदशश्रेष्ठाःकुतोऽन्ये मुनयःप्रिये
यदेतद्दृश्यते तेजो लिङ्गरूपं यशस्विनि !। एतद्देवशुकाद्याहिध्यायन्तित्रिदशाअमी
अनेकजन्मसंशुद्धा योगिनोऽनुग्रहान्मम । प्रविशन्तु तनुं देवि!मदीयांमुक्तिदायिकाम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्येमुक्तीश्वरमाहात्म्यवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥

——:*:——

षड्विंशोऽध्यायः

सोमेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

विद्धि षड्विंशकंदेवि! देवं सोमेश्वरं परम् । यस्यदर्शनमात्रेणनिष्कलङ्कोनरो भवेत्
अत्रिर्नाममहाभागोब्रह्मणो मानसः सुतः । प्रजापतिरभूद्देवि ! कल्पे वाराहसञ्ज्ञके

तस्य पुत्रोऽभवत्सोमो दक्षोऽथ मातृभागतः ।
सप्तविंशतिर्याः कन्या दाक्षायण्यः प्रकीर्तिताः ॥ ३ ॥
सोमपत्न्यो हि मन्तव्यास्तासां श्रेष्ठा तु रोहिणी ।
तामेव भजते सोमो नेतरा इति शुश्रुम ॥ ४ ॥

इतराःप्रोचुरागत्य दक्षस्याग्रे यथातथम् । दक्षोऽथसतदागत्य तमुवाच सनाकरोत्
यदा न वारितस्तस्थौदक्षःक्रुद्धस्तदाप्रिये । शशापसोमंसङ्क्रुद्धःशीघ्रमन्तर्हितोभव
एवं शप्तस्तुसोमोवै तदाह्यन्तर्हितोऽभवत् । शशापसोमोदक्षंतु,भवानपि भविष्यति
अनेकत्वं विहायैतज्जलदेहं सनातनम् । अतः प्राचेतसो दक्षो ब्रह्मपुत्रोऽपि गीयते ॥
एवमन्तर्हितः सोमो गतो वै दक्षशापतः । देवाश्चनागायक्षाश्च गन्धर्वाः पितृभिःसह

वैराजं ब्रह्मसदनं ब्रह्माणं समुपस्थिताः ॥ ६ ॥

तस्याग्रे कथयामासुर्नमस्कृत्य पुनः पुनः ।

भगवन्सर्वभूतानामादिकर्त्ता स्वयम्भुवः ॥ १० ॥

स्रष्टा च हव्यकव्यानांपाहिनः शरणागतान् । देवानांवचनंश्रुत्वाज्ञात्वादेवःप्रजापतिः

आश्वासयामाससुरान्सुश्लिष्टैर्वचनाम्बुभिः । अवश्यंत्रिदशास्तेनप्राप्तव्यंकर्मणःफलम्

शापान्तं भगवान्देवोविष्णुरेव करिष्यति । एतच्छ्रुत्वाततोदेवावाक्यं पङ्कजजन्मनः

शरण्यं शरणं विष्णुमुपतस्थुर्गतव्यथाः ॥ १३ ॥

ब्रह्मणा सहिता देवि! स्तुतिं चक्रुःसमाहिताः । नमस्तेदेवदेवेश नमस्ते विश्वभावन

नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज !॥ १४ ॥

नारायण जगन्नाथदेवास्त्वां शरणंगताः । त्वं हिनःपरमो ध्येयस्त्वं हिनःपरमोगुरुः

त्वं हि नः परमो देवो ब्रह्मादीनांसुरोत्तम !। अन्तर्धानंगतः सोमो दक्षशापाज्जनार्द्दन

विनासोमेन चौषध्यो नष्टा देव महीतले । तेषांतद्वचनं श्रुत्वा विष्णुर्वचनमब्रवीत्

भयं त्यजध्वममरा अभयं वो ददाम्यहम् । नष्टं चन्द्रमसं शीघ्रमानयिष्याम्यसंशयम्

एवमुक्त्वा तु भगवान्विसृज्यत्रिदशेश्वरान् । सोमंसस्मारसहसा शङ्खचक्रगदाधरः

यदा स्मृतो नचाभ्येति तदाक्रुद्धो जनार्दनः । पुराणपुरुषो देवोब्रह्माणमिदमब्रवीत्

देवैरसुरसङ्घैश्च मथ्यतां कलशोदधिः । भविष्यति पुनश्चन्द्रो मथ्यमाने महोदधौ ॥

अमृतं तत्र लप्स्यध्वं रत्नानि विविधानि च ।

तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति !॥ २२ ॥

मन्थानंमन्दरंकृत्वानेत्रकृत्वाचवासुकिम् । देवामथितुमारब्धाःसमुद्रंनिधिमम्भसाम्

सोमार्थे च पुरादेवि तथैवासुरदानवाः । एतैर्मुखमुपाश्लिष्टो नागराजो महेर्ष्यया ॥

विबुधाः सहिताःसर्वेयतःपुच्छंततःस्थिताः । अतोवैभगवान्देवोयतोनारायणस्ततः

शिरस्युद्यम्य नागस्य पुनः पुनरवाक्षिपत् ।

उदधौ मथ्यमाने वै महाञ्छब्दो बभूव ह ॥ २६ ॥

तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा । विलयं समुपाजग्मुः शतशोऽथसहस्रशः

तस्मिंस्तु मथिते देवि! प्रयत्नात्केशवस्य च ।

प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ २८ ॥

तमेव देवा मनुजाः पितरश्च यशस्विनि !। उपजीवन्ति वृक्षाश्चतथैवौषधयो विधुम्

समुत्पन्नमथो दृष्ट्वा भगवान्प्राहकेशवः । पालयेमाः प्रजाश्चन्द्र त्वं ज्येष्ठोजगतो भव

इत्युक्तो वासुदेवेन प्रजाःपालयितुं शशी । पूर्वं सोमोऽपि यो नष्टःप्रविष्टोगहनंवनम्

तस्याग्रे नारदः सर्वं कथयामास सत्वरम् ।

देवर्षेर्वचनं श्रुत्वा नारदस्य महात्मनः ॥ ३२ ॥

पीडितो दक्षशापेन सोमोऽप्यन्तर्हितस्तदा । जगाम शरणं देवि ब्रह्माणं परमेष्ठिनम्

तत्र गत्वा यथाशापं कथयामास गद्गदः । पूर्वचन्द्रवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥

अयं मे प्रथमः पुत्रः पीडितः शशिनाभृशम् । नवेनोदधिजातेन किंमयाक्रियते पुनः

विष्णुना च बलं दत्तमस्मै चन्द्रमसे दृढम् । तस्माद्यास्यामि तत्राहंयत्रदेवोजनार्दनः

तं दृष्ट्वा मधुहन्तारं ब्रह्मा विष्णुमुवाचह । त्वदादेशाज्जगन्नाथ एष चन्द्रः कृतो मया॥

स चायं पीडितो देव शशाङ्केन नवेन वै । इत्युक्तोब्रह्मणा देवि!वासुदेवोजगत्पतिः

वृत्तान्तं कथयामास ब्रह्माग्रे च पुनः पुनः ॥ ३८ ॥

ब्रह्मापि पूर्वचन्द्रार्थे विष्णुं लोकनमस्कृतम् ।

तुष्टाव प्रणतो भूत्वा प्राञ्जलिः प्रणतः स्थितः ॥ ३९ ॥

नमःकृष्णनमोविष्णोनमोजिष्णोनमोनमः । नमोवामनगोविंदनमोऽनन्तनमोऽच्युत

जयस्व गोविंद! महानुभाव! जयस्व विष्णो! जय पद्मनाभ !।

जयस्व सर्वाद्य गदाधरेश जयस्व विश्वेश्वर विश्वमूर्त्ते !॥ ४१ ॥

एवं स्तुतस्तदादेवि ब्रह्मणा लोककारिणा । समीपस्थंसमालोक्य सोमंवचनमब्रवीत्

गच्छसोम ममादेशान्महाकालवनोत्तमे । उत्तरे मुक्तिलिङ्गस्य लिङ्गंकान्तिकरंपरम्

तमाराधय यत्नेन स ते देहं प्रदास्यति ॥ ४३ ॥

इत्युक्तो वासुदेवेन ब्रह्मणा च पुनः पुनः । आजगाम महादेवि! महाकालवनोत्तमे ॥

लिङ्गं दृष्ट्वा च तुष्टाव स्तोत्रेणानेन सुव्रते !॥ ४४ ॥

चन्द्र उवाच

नमो देवाधिदेवाय त्रिनेत्राय महात्मने । रक्तपिङ्गलनेत्राय जटामुकुटधारिणे ॥ ४५ ॥
भूतवेतालजुष्टाय महादेवाय शूलिने । भीमाट्टहासयुक्ताय कपर्दिस्थाणवे नमः ॥
पूष्णो दन्तविनाशाय तथान्धकविनाशिने । कैलासवरवासाय सर्वदेवाय ते नमः ॥
विकरालोर्द्ध्वकेशाय भैरवाय नमोनमः । अग्निज्वालाकरालाय कलिधर्मविवासिने
तथा दारुवनध्वंसकारिणे तिग्मशूलिने । कृतकङ्कणभोगीन्द्र कण्डसूत्राय शूलिने ॥
प्रचण्डदण्डहस्ताय वडवाग्निमुखाय च । वेदान्तवेद्याय नमो यज्ञमूर्त्ते नमोनमः ॥
दक्षयज्ञविनाशाय जगद्भयकराय च । विश्वेश्वराय देवाय स्थूलसूक्ष्माय शम्भवे ॥
कपर्दिने करालाय सर्वदेवाय ते नमः ॥ ५१ ॥
एवं स्तुतस्तदादेविचन्द्रेणान्तर्हितेन च । लिङ्गरूपीमहादेवस्तुष्टो वाक्यमथाब्रवीत्
स्तोत्रेणानेन तुष्टोऽस्मि ब्रूहि सोम! किमिच्छसि ।
यत्तेऽभिलषितं सर्वं तत्कर्त्तास्मि न संशयः ॥ ५३ ॥

सोम उवाच

यदि त्वहमनुग्राह्यो यदि तुष्टोऽसि मे प्रभो !।
कान्त्या दीप्त्या तथा मूर्त्या तथा रूपेण च प्रभो !॥ ५४ ॥
स्वपदं कर्त्तुमिच्छामि त्वत्प्रसादान्महेश्वर !। एवमस्त्वितिलिङ्गेनतत्क्षणाद्रजनीचर
द्विजराजेन तत्प्राप्तं लिङ्गस्यास्य प्रसादतः । सोमेनाराधितोयस्माद्देवदेवो महेश्वरि
तेन सोमेश्वरोनाम विख्यातो भुवनत्रये । येऽर्चयन्ति महादेवि देवं सोमेश्वरं परम्
कृतपुण्यानरामर्त्यास्ते यान्ति परमंपदम् ।
यःपश्यति नरो भक्त्या लिङ्गं सोमेश्वरंप्रिये !॥ ५८ ॥
विमुक्तो जन्मदुःखाद्यैर्लीयतेमयि मानवः । तेनराःपशवोलोकेकिं तेषांजीवितेफलम्
यैश्च सोमेश्वरोदेवो न दृष्टो नच पूजितः । संसारेऽस्मिन्महाघोरे जन्मरोगभयाकुले
एकः सोमेश्वरः पूज्यः कुष्ठरोगविनाशनः । स एव सुकृतीलोकेकुलंतेनाभ्यलङ्कृतम्
आधारः सर्वलोकानां येन सोमेश्वरोऽर्चितः ।

सकृदभ्यर्च्यसोमेशं बिल्वपत्रेणमानवः । मुक्तोभोगी निरातङ्कोममलोकेवसेच्चिरम्
काञ्चनैःकुसुमैर्देवि लिङ्गंसोमेश्वरंप्रिये । पूजयन्तिनराभक्त्या तेयान्तिपरमांगतिम्
एष ते कथितो देवि! प्रभावः पापनाशनः । सोमेश्वरस्य देवस्य शृणुष्वानरकेश्वरम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये सोमेश्वरमाहात्म्यवर्णनं नाम
षड्विंशोऽध्यायः ॥ २६ ॥

——

सप्तविंशोध्यायः

अनरकेश्वरवर्णनम्

श्रीमहादेव उवाच

सप्तविंशतिमं देव्यनरकेश्वरसञ्ज्ञकम् । यस्यदर्शनमात्रेण स्वप्नेऽपि नरकः कुतः ॥१
पुरा कलियुगे देवि! कल्पे वाराहसञ्ज्ञके । कलुषं कालमासाद्य सत्ये च प्रलयंगते
निर्मर्यादा निराधारा निरौकानास्तिका जनाः ।
वर्णाश्रमाश्च सञ्जाता वञ्चयन्ति परम्परम् ॥ ३ ॥
नार्चयन्ति सुरान्विप्राः कर्म कुर्वन्ति कुत्सितम् ।
लोभमोहपरा भूत्वा कामसक्ताश्च मानवाः ॥ ४ ॥
वैरबद्धाश्च सञ्जाताः परस्परवधे रताः । निवृत्तयज्ञस्वाध्यायपिण्डोदकविवर्जिताः
ब्राह्मणा सर्वभक्ष्याश्च मृषावादपरायणाः । भूयिष्ठं कूटमानैश्च पण्यं विक्रीणते तदा
दृश्यन्ते षोडशे वर्षे नराः पलितिनः प्रिये !। आयुःक्षयो मनुष्याणां क्षिप्रमेवप्रपद्यते
एवंविधाः समुद्भूता नरा नार्यश्च पातकैः । नरकेषुप्रपद्यन्ते क्रमात्पापानुसारतः ॥
कुठारैर्भिन्नमूर्द्धानः क्रकचैः पाटिताः परे । अग्निवर्णैश्च सन्दंशैरुत्पाटितविलोचनाः
भिन्नाश्चायोमयैस्तीक्ष्णैरग्नितप्तैश्च कीलकैः ।

पीड्यन्ते शैलशिखरैश्चूर्ण्यन्ते क्रूरभूधरैः ॥ १० ॥

क्षिप्यन्तेतप्तकुण्डेषुदह्यन्तेवह्निराशिषु । अमेध्येऽधोमुखाश्चान्येमर्द्दितादण्डपाणिना

लौहैश्चशृङ्खलैर्बद्धाह्यधोवक्त्रैश्चलम्बितैः। अन्तरिक्षेपरिक्षेपात्क्रन्दन्तोऽतीवदुःखिता

कृमिभिर्भ्रमरैस्तीक्ष्णैर्दंशैश्च मशकैस्तथा । लोहतुण्डैश्च विहगैर्निर्दयैर्भक्षिता नरा

केचित्कृत्ताः प्रधावन्ति तोयार्थश्च तृषातुराः ।

स्वमूत्रं पायिताश्चण्डैः क्षुभिताश्चापि घातनैः ॥ १४ ॥

यैश्चाङ्गैःपतितं कर्मक्रियते पुरुषैर्भुवि । तेषांतान्येव चाङ्गानिशोध्यन्तेयातनागतैः

ये पश्यन्ति गुरुं देवान्ब्राह्मणान्क्रुद्धचक्षुषा । दुष्टेन परदारांश्च वीक्षन्ते लोचनेन ये ॥

तेषां नेत्राणि भिद्यन्ते कृष्यन्ते लोहशङ्कुभिः ॥ १६ ॥

श्रवणौ च प्रपूर्यन्ते लौहेन शङ्कुना ततः । पुनश्च शस्त्रैः कृष्यन्तेपुनस्तसैश्च कीलकैः

लौहैर्वेगान्निखन्यन्ते यैः श्रुतं गुरुनिन्दनम् ।

मित्राणां देवतानाञ्च साध्वीनामथवा क्वचित् ॥ १८ ॥

शतशःपाट्यते जिह्वावह्निवर्णैरयोमुखैः । शङ्कुभिस्तीक्ष्णसूक्ष्माग्रैःपूर्यन्तेचानिलैःपुनः

तद्वक्त्राणि बहून्वारान्येऽपवादरतानराः । ये गुरुंमातरञ्चापि पारुष्येण वदन्ति वै

ये निघ्नन्ति दुराचाराः सुरार्थायोपकल्पिते ।·आरामे पुष्पपत्राणितेषामङ्गानिकृन्तति

यैरप्यालिङ्गितानारी परस्यच दुरात्मभिः । तेषामयोमयीनारी वह्निवर्णातुवक्षसि

स्थाप्यते वध्यतेचापिप्रचण्डैर्यमकिङ्करैः । नार्यश्चपुरुषैस्तप्तैरालिङ्ग्यन्तेह्ययोमयैः

तदा लोहमये गेहे ज्वलितानलसंस्तरे ।

निक्षिप्यन्ते नरैः सार्द्धमासाद्य कालसङ्क्षयम् ॥ २४ ॥

यावती वेदना देहे इहलोके प्रदृश्यते । नराणामङ्गपीडावै तस्माच्छतगुणा भवेत् ॥

काकैश्चवृश्चिकैर्गृध्रैर्भक्ष्यन्तेऽप्यपरेनराः। दह्यमानाविलपन्तिभ्रातस्तातेतिचाकुलाः

वदन्त्यसकृदुद्विग्ना न च शान्तिं लभन्ति वै ॥ २६ ॥

दुःखानि ते प्राप्नुवन्ति यान्यसह्यानि पार्वति !।

एवं ते यातनादुःखं प्राप्नुवन्ति सुनिश्चितम् ॥

निमिर्नाम महाभागो यममार्गं ददर्श ह ॥ २७ ॥

रौद्रं भयानकं दुर्गं पूरितम्पापकर्मभिः । तमसा सम्वृतञ्चैव केशशैवालशाद्वलम् ॥

सम्पृक्तं पापकृद्गन्धैर्मांसशोणितकर्द्दमैः । वह्निज्वालेनदीप्तेन समन्तात्परिवारितम्

अधोमुखैश्च कर्कोटैर्गृध्रैश्च समभिद्रुतम् । सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम्

वृक्षै रुधिरमांसैश्च छिन्नबाहूरुपाणिभिः । निकृत्तोदरहस्तैश्च तत्रतत्र प्रचारितैः ॥

वृतं कुणपदुर्गन्धैरशिवं भोगवर्जितम् । असिपत्रवनञ्चैव समन्तात्परिवारितम् ॥

करम्भवालुकाकीर्णमायसीश्च शिलाः पृथक् ।

ददर्श चापि देहोत्थयातनां पापकर्मणाम् ॥ ३३ ॥

स तं दुर्गन्धमालक्ष्य पुरुषं तमुवाच ह । कियदध्वानमस्माभिर्गन्तव्यमिदमब्रवीत्

देशोऽयंकश्चदेवानामेतदिच्छामिवेदितुम् । इत्युक्तोयमदूतस्तुदण्डहस्तोऽग्निसप्रभः

पुरतो दर्शयन्मार्गमित एहीत्युवाच ह ॥ ३५ ॥

भूयःसराजा तं प्राहकिङ्करंविनयान्वितः । भो याम्यपुरुषाचक्ष्वकिंमया दुष्कृतंकृतम्

येनेदं व्यसनम्प्राप्तं मया च धार्मिकेण हि । निमिर्नामाहं विख्यातो जनकनामहंकुले

जातो विदेहविषये सम्यङ्मनुजपालकः । चातुर्वर्ण्यञ्च धर्मस्थं कृत्वा संरक्षितं मया

धर्मप्रधानकल्पेन मनुनाऽत्र यथा पुरा । यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही ॥ ३६

नोत्सृष्टश्चैव संग्रामोनातिथिर्विमुखोऽभवत् । कृतास्पृहाचन मयापरस्त्रीविभवादिषु

सोऽहं कथमिमं प्राप्तो नरकं भृशदारुणम ।

इति पृष्टस्तदा तेन निमिना यमकिङ्करः ॥

उवाच प्रणतो भूत्वा क्रूरोऽपि प्रश्रितं वचः ॥ ४१ ॥

पुरुष उवाच

महाराजयथात्थत्वं तथैतन्नात्रसंशयः । किन्तुस्वल्पंकृतम्पापं भवन्तंस्मारयामितत्

उक्ता या दक्षिणा श्राद्धे न दत्ता सा त्वया नृप !।

प्रमादाद्विस्मृता चैव तस्येदं कर्मणः फलम् ॥ ४३ ॥

एतावदेव ते पापं नान्यत्किञ्चन विद्यते । वैदेहागच्छ पुण्यानामुपभोगायपार्थिव ॥

एवं श्रुत्वा तु राजर्षिर्निमिर्दूतमथाब्रवीत् । यास्यामिदेवानुचरयत्रमां त्वं हिनेष्यसि
किंचित्पृच्छामि ते तत्त्वं यथावद्वक्तुमर्हसि ।
वज्रतुण्डास्त्वमी काकाः पुंसां नयनहारिणः ॥ ४६ ॥
पुनःपुनश्च नेत्राणि तद्र षांभवन्ति हि । किं कृतं कर्मदूतेन्द्र कथयैतज्जुगुप्सितम्
हरन्त्येषां तथा जिह्वांजायमानांपुनर्नवाम् । करपत्रेणपाट्यन्ते कस्मादेतेसुदुःखिताः
किमेतेनष्टचित्ताश्च तुद्यन्तेऽहर्निशंनराः । एताश्चान्याश्च दृश्यन्ते यातनापापकर्मिणाम्
कियत्कालं भविष्यन्ति तन्ममोद्देशतो वद ॥ ४९ ॥

पुरुष उवाच

यन्मांपृच्छसि भूपाल पापकर्मफलोदयम् । तत्तेऽहंसम्प्रवक्ष्यामिसंक्षेपेणतथातथम्
पुण्यापुण्ये हि पुरुषः पर्यायेण समश्नुते । भुञ्जतश्चक्षयं याति पुण्यम्पापमथापिवा
न तु भोगादृते पुण्यं पापं कर्म च मानवः । परित्यजति राजेन्द्र! सत्यमेतदुदाहृतम्
एवमेते महापापा यातनाभिरहर्निशम् । क्षपयन्ति महाघोरं नरकान्तरवर्त्तिनः॥ ५३॥
देवत्वेऽथ मनुष्यत्वे तिर्यक्त्वेऽथ शुभाशुभम् ।
पुण्यपापोद्भवं भुङ्क्ते सुखदुःखं न संशयः ५४ ॥
एतदुद्देशतोराजन्भवता कथितं मया । स्वकर्मफलमोक्षाणांपुण्यानां पापिनान्तथा
तदेह्यन्यत्र गच्छावो यथादृष्टं त्वयाधुना । ततस्तमग्रतः कृत्वा सराजा गन्तुमुद्यतः
तदाहिसर्वैरुद्घुष्टं यातनास्थायिभिर्नृभिः । प्रसादंकुरुभूपेति तिष्ठतावन्मुहूर्त्तकम् ॥
त्वदङ्गसङ्गा पवनो देहान्ह्लादयते हि नः ॥ ५७ ॥
परितापं च गात्रेभ्यः पीडाबाधाश्चकृत्स्नशः । अपहन्ति नरव्याघ्रकृपांकुरुमहीपते
एतच्छ्रुत्वा वचस्तेषां तं याम्यपुरुषं नृपः । पप्रच्छ कथमेतेषामाह्लादो मयितिष्ठति
किं मया कर्म तत्पुण्यं मर्त्यलोके महत्कृतम् । प्रह्लादजननी दृष्टिर्यस्येयंतदुदीर्यताम्

पुरुष उवाच

त्वया दृष्टो महाकाले विख्यातोऽनरकेश्वरः ।
आश्विनस्य चतुर्दश्यां तस्येदं फलमीदृशम् ॥ ६१ ॥

तत्स्नानाद्गात्रसंसर्गी पवनो ह्लाददायकः । पापकर्मकृतां राजन्यातना न प्रबाधते ॥

राजोवाच

यदिमत्संनिधानेसायातना न प्रबाधते । ततो भद्रमुखात्राहंस्थास्येस्थाणुरिवाचलः

पुरुष उवाच

एहि राजेन्द्र! गच्छावो निजपुण्यसमार्जितान् ।
भुङ्क्ष्व भोगान्न यास्येतां यातनां पापकर्मणाम् ॥ ६४ ॥

राजोवाच

न स्वर्गे ब्रह्मलोके वा तत्सुखं प्राप्यते नरैः ।
यदार्त्तजन्तुं निर्वाणमानेतुमिति मे मतिः ॥ ६५ ॥
तस्मान्नतावद्यास्यामि यावदेते सुदुःखिताः ।
मत्सन्निधानात्सुखिनो भवन्तु नरकौकसः ॥ ६६ ॥
प्राप्स्यन्तेतेयदिसुखंबहवोदुःखिते मयि । किन्तुप्राप्तंमयासर्वंतस्मात्त्वंव्रजमाचिरम्

पुरुष उवाच

एष धर्मश्चशक्रश्चत्वांनेतुंसमुपागतौ । अवश्यमस्माद्गन्तव्यं तस्मात्पार्थिवगम्यताम्
एतस्मिन्नन्तरे धर्मः शक्रेण सहितोऽब्रवीत् । निमे परमधर्मज्ञ प्रीता देवगणास्तव॥
ऐह्येहिपुरुषव्याघ्रकृतमेतावताप्रभो । सिद्धिःप्राप्तात्वयाराजँल्लोकाश्चाप्यक्षयान्विताः
नत्वमन्युस्त्वयाकार्यः शृणु मे वचनं विभो । अवश्यंनरकस्तावद्द्रष्टव्यः सर्वराजभिः
नयामि त्वामहं स्वर्गं त्वयासम्यगुपासितः । विमानवरमारुह्यविमलंचाद्यगम्यताम्

निमिरुवाच

नरके मानवा धर्मपीड्यन्तेऽत्रसहस्रशः । त्राहीतिवार्त्ताक्रन्दन्तोमामतोनव्रजाम्यहम्

इन्द्र उवाच

कर्मणा नरके प्राप्तिरेषां च पापकर्मणाम् । स्वर्गेत्वयाऽपिगन्तव्यं नृप!पुण्येनकर्मणा

राजोवाच

परिजानासि धर्मज्ञ! त्वं वा शक्र शचीपते !। विशिष्टं ममकिं पुण्यंशुभंतद्वक्तुमर्हसि

धर्म उवाच

आश्विनस्य तु मासस्यकृष्णपक्षेचतुर्दशी । तस्यां त्वयामहाबाहोमहाकालवनोत्तमे

दृष्टो देवः सुविख्यातः स्वर्गदोऽनरकेश्वरः ॥ ७६ ॥

तद्विशिष्टं च ते पुण्यं तस्य सङ्ख्या न विद्यते ।

स्वकर्मोपार्जितम्पुण्यं भुङ्क्ष्व राजन्यथासुखम् ॥

एते नारकिकाः सर्वे क्षपयन्तु स्वकर्मजाम् (यातनामितिशेषः) ॥ ७७ ॥

राजोवाच

कथं स्पृहां करिष्यन्तिसत्संगेषुचमानवाः । यदि मत्सन्निधावेषामुत्कर्षोनोपजायते

तस्माद्यत्सुकृतं किञ्चिद्विशिष्टतरमस्तिवै । तेन मुच्यन्तु नरकात्पापिनोयातनागताः

धर्म उवाच

राजंस्त्वया कृतं पूर्वेऽनरकेश्वरदर्शनम् । तदुत्पन्नस्य पुण्यस्य कलामेभ्यःप्रयच्छ वै

तत्पुण्यस्य प्रभावेण मोक्ष्यन्तेनरकादिमे । तथा कृते ततस्तेन विमुक्ता नरकाच्च ते

ततोऽब्रवीद्धर्मराजोर्ह्निर्मिं शक्रसमन्वितः । एवं श्रेष्ठतरं स्थानं त्वया प्राप्तं महीपते

एतांश्च नारकान्पश्य विमुक्तान्पापकर्मणः । ततोऽपतत्पुष्पवृष्टिस्तस्योपरिमहीपतेः

विमानं चाधिरोप्यैनं स्वर्लोकमनयद्धरिः । येये तत्राभवन्पापा यातनाभ्यःपरिच्युताः

प्रभावात्तस्य देवस्य स्वर्गलोकं गताः प्रिये !।

अतो देवः सुविख्यातः स देवोऽनरकेश्वरः ॥ ८५ ॥

स्तुतो देवगणैः सर्वैर्नरकादवतारकः । जातः स एव सुकृतीकुलं तेनैव पावितम् ॥

यः पश्यतिनरो नित्यं देवञ्चानरकेश्वरम् । येऽर्चयन्तिनराभक्त्या देवञ्चानरकेश्वरम्

तेषां विलीयते पापं पूर्वजन्मशतोद्भवम् ॥ ८७ ॥

येऽनुमोदन्ति देवस्य दर्शनं पर्वतात्मजे । तेऽपिपापविनिर्मुक्ताःप्रयान्तिममममन्दिरे

समतीतं भविष्यच्च कुलानामयुतंनरः । मम लोकं नयत्याशु तस्यलिङ्गस्यदर्शनात्

शिवयोगसमायुक्ता कृष्णा या च चतुर्द्दशा ।

सा प्रोक्ता वल्लभा तस्य सर्वपापप्रणाशिनी ॥ ९० ॥

ये चायान्ति नरास्तस्यां देवं चानरकेश्वरम् । उपोष्यपापैर्मुच्यन्ते नराःशतजन्मजैः

कर्मणामनसावाचायत्पापंसमुपार्जितम् । तत्क्षालयतिदेवोसौतिथौतस्यांसमर्चितः

एष ते कथितो देवि!प्रभावः पापनाशनः । जटेश्वरस्य देवस्य श्रृणुमाहात्म्यमुत्तमम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-चतुरशीतिलिङ्गमाहात्म्येऽनरके (मनके) श्वरमाहात्म्यवर्णनंनामसप्तविंशोऽध्यायः ॥

अष्टाविंशोऽध्यायः

जटेश्वरमहिमवर्णनम्

श्रीदेवदेव उवाच

अष्टाविंशतिकं विद्धि विख्यातं च जटेश्वरम् । यस्यदर्शनमात्रेणमुक्तोभवति मानवः

पुरा राथन्तरे कल्पे वीरधन्वा महीपतिः । धर्मात्मा च यशस्वीचबभूवभुविविश्रुतः

सकदाचिद्वनं गत्वा मृगहेतोर्वरानने !। व्यापादयन्मृगगणान्धनुषा क्रोधविह्वलः ॥

जगाम तत्र यत्रासन्भ्रातरः पञ्च सुव्रताः । सम्वर्त्तस्य सुतादेविमृगरूपेणसंस्थिताः

ते कदाचिद्वने पञ्च दृष्ट्वाहरिणपोतकान् । श्वसनो जातमात्रांश्चकौतूहलसमन्विताः

एकैकं जगृहुस्तत्र मृतास्ते त्वतिदुःखिताः ।

ततः सर्वे च ते पञ्च ययुर्वै पितुरन्तिकम् ॥ ६ ॥

प्रायश्चित्तं समीहन्तःसम्वर्त्तं सांसदैवृतम् । ऊचुस्तेवचनं चेदं मृगहिंसाश्रितंतदा

जातमात्रा मृगाः पञ्च अस्माभिर्निहताः प्रभो !।

अकामतस्ततोऽस्माकंप्रायश्चित्तं विधीयताम् ॥ ८ ॥

ऊचेस शुद्धिमाप्नोतिप्रायश्चित्तेकृतेसति । अनधीत्य धर्मशास्त्रं प्रायश्चित्तंददातियः

प्रायश्चित्ती भवेत्पूतः किल्बिषं दातरि व्रजेत् ॥ ६ ॥

धर्मशास्त्रसमारूढा वेदखड्गधरा द्विजाः ।क्रीडार्थमपि यद्ब्रयुः स धर्मःपरमःस्मृतः

ब्रह्मच्छिद्रंजपच्छिद्रं यच्छिद्रं यज्ञकर्मणि । अच्छिद्रं जायते सर्वंब्राह्मणैरुपपादितम्

अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ।

प्रणश्यत्यखिलं पापमग्निष्टोमफलं भवेत् ॥ १२ ॥

इत्येवं वदति श्रेष्ठे संवर्त्ते द्विजसत्तमे । समागताश्च मुनयो भृग्वत्र्यङ्गिरसादयः ॥

तेषामर्थे यथावृत्तं कथयामासुरेव ते । संवर्त्तस्य सुता दीना भक्तिनम्राः पुनः पुनः

तेऽप्यूचुर्धर्मशास्त्राणि विहितानि यथार्थतः ।

प्रायश्चित्तं यथोद्दिष्टं देशकालविभागतः ॥ १५ ॥

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।

प्रायश्चित्तार्द्धमर्हति स्त्रियो वै व्याधितस्य च ॥ १६ ॥

देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।

प्रायश्चित्तं प्रकल्प्यं स्यादितिधर्मो व्यवस्थितः ॥ १७ ॥

इदानीं मृगचर्माणि परिधाय धृतव्रताः । चरध्वं पञ्च वर्षाणि ततः शुद्धाभविष्यथ

एवमुक्तास्तु ते बालामृगधर्मोपजीविनः । वनं विविशुरव्यग्राध्यायन्तोब्रह्मशाश्वतम्

ततो वर्षे ह्यतिक्रान्ते वीरधन्वा महीपतिः ।

तत्राजगाम यस्मिंस्ते चरन्ति मृगरूपिणः ॥ २० ॥

ते चाप्येकतरोर्मूलेमृगधर्मोपजीविनः । जपन्तः संस्थितास्ते हिराज्ञादृष्टामृगाइति

मत्वा विद्धास्तु नाराचैर्मृतास्ते ब्रह्मवादिनः ।

तान्दृष्ट्वा च मृतान्राजा ब्राह्मणान्संशितव्रतान् ।

भयेन वेपमानस्तु देवराताश्रमं ययौ ॥ २२ ॥

तत्रापृच्छद्ब्रह्मवध्या मम जातामहामुने । आमूलान्तंवधन्तस्यकथयित्वा नराधिपः

भृशं शोकपरीतात्मा रुरोद भृशदुःखितः । स ऋषिर्देवकल्पस्तु रुन्दतं नृपसत्तमम्

उवाच मा भैर्नृपतेअपनेष्यामिपातकम् । पाताले सुतलाख्ये तु निमज्जन्तीयथाधरा

उद्धृता देवदेवेन विष्णुना क्रोडमूर्त्तिना । तद्वद्भवन्तं राजेन्द्र ब्रह्महत्यापरिप्लुतम् ॥

उद्धरिष्यति देवोऽसौ स्वयमेव जनार्दनः ॥ २६ ॥

एवमुक्तस्ततो राजा दुरितो (दुःखितो ?) वाक्यमब्रवीत् ॥ २७ ॥

किमनेन द्विजेनैव निष्प्रभेण दुरात्मना । उद्धर्तुंनैव शक्नोति स्वयमेव द्विजाधमः ॥

इत्युक्त्वा कोपरक्ताक्षः खड्गेनैव जघान तम् । मृतंदृष्ट्वाद्विजंराजाक्रोधेनकलुषीकृतः

तस्मिन्नेववनेदेविपापसङ्घेनमोहितः । जघान कपिलांदोग्ध्रींसवत्सांगालवस्यच

क्षुधार्त्तश्च तृषार्त्तश्च बाल्यान्मोहाच्च साहसात् ।

क्रूरा बुद्धिः समभवज्जटीभूतं च पातकम् ॥ ३१ ॥

जटीभूतेन पापेन बभ्राम गहने वने । स कदाचित्तुरङ्गेण हृतो दूरं महद्वनम् ॥ ३२॥

व्याघ्रसिंहगजाकीर्णं मृगशम्बरसेवितम् । एकाकी तत्रराजासावश्वंमुक्त्वातरोरधः

कुशोपरि तदातत्रसुष्वाप च स निर्भयम् । तत्रव्याधाः समचरन्दृष्ट्वासुप्तंचनिर्भयम्

ते गतास्त्वारिताव्याधाःस्वभर्तुःकथनायवै । स्वामिनातेननिर्दिष्टानिग्रहीतुंप्रचक्रमुः

तावद्राज्ञःशरीरात्तु श्वेताऽभरणभूषिता । उत्थायचक्रमादायतयाम्लेच्छाश्चपातिताः

दस्यून्निहत्य सा देवी तत्रैवादर्शनं गता ॥ ३७ ॥

अथ राजा तया मुक्तः प्रतिबुद्धोऽथ तत्क्षणात् ।

म्लेच्छांश्च निहतान्दृष्ट्वा चिन्तयामास पार्थिवः ॥ ३८ ॥

गोवध्या ब्रह्मवध्या च वने ह्यस्मिन्सुदारुणा । कथं मया नृशंसेनप्राप्तापापपरंपरा ॥

एवं स चिन्तयित्वाऽथ निःश्वस्य च पुनःपुनः । तमेवाश्वंसमारुह्यवामदेवाश्रमंययौ

मुनिना वामदेवेन दृष्टो राजा तथाविधः ।

जटीभूतेन पापेन पीडितो दुःखितस्तदा ॥ ४१ ॥

वामदेव उवाच

अयं स पुरुषव्याघ्रो वीरधन्वा महीपतिः । सोमवंशसमुत्पन्नो दशां कष्टांसमागतः

उद्धरिष्यामि राजानमेनं पुरुषसत्तमम् । इत्यालोच्य तदा विप्रो वामदेवो महातपाः

प्रत्युवाच महीपालं वीरधन्वानमातुरम् ॥ ४३ ॥

भोभो राजन्महीपाल! वीरधन्वेति विश्रुतः ।

विदूरथस्य तनयो विख्यातो भुवनत्रये ॥ ४४ ॥

प्रागभवे व्याधरूपेणनिहिथाविपिने मृगान् । दृढं जागरणंरात्रावामलक्यास्तरोरध
फाल्गुनामलपक्षे त्वामलक्यैकादशीशुभा । पुष्यर्क्षयोगिनीतस्यांजामदग्न्यप्रदक्षि
पूजा लोकैः कृताद्रृष्टा विस्मयेनत्वया पुरा । अकामादुपवासोऽभत्तस्यांजागरणंपुनः
तत्प्रभाचादभू राजा महाबलपराक्रमः । तया संरक्षितो राजन्म्लेच्छवर्गाद्वनेऽधुना ॥
निहताः शत्रवः सर्वे तयैव शुभमाप्स्यसि । पूर्वकर्मविपाकेन ब्रह्महत्या समागता ॥
ज्ञाता तपःप्रभावेन मया योगबलेन च । जटीभूतं शरीरं ते पापसङ्घेन पार्थिव

इदानीं पालयिष्यामि श्रृणु मे वचनं परम् ॥ ५१ ॥

इत्युक्तो वामदेवेन मुनिना स महीपतिः । प्रणम्यप्रयतो भूत्वा पप्रच्छ च पुनः पुनः
कथं यास्यन्ति मे हत्या गोब्राह्मणसमुद्भवाः । उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥

तस्य तद्वचनं श्रुत्वा वामदेवो महामुनिः ।
कथयामास माहात्म्यं लिङ्गस्यास्य यशस्विनि ॥ ५४ ॥

महाकालवनं गच्छ महाराज ममाज्ञया । तत्रास्ते देवदेवोऽपि जगद्व्यापी जटेश्वरः
पापसङ्घप्रहर्त्ता च सर्ववेदेषु पठ्यते । देवस्यानरकेशस्य उत्तरे स व्यवस्थितः ॥ ५६
तस्य तद्वचनं श्रुत्वा वामदेवस्य पार्थिवः । आजगाम त्वरायुक्तो महाकालवनोत्तमे
तत्र दृष्ट्वा जगद्वन्द्यं देवदेवं जटेश्वरम् । स्तुतिं चकार राजेन्द्रो भक्त्या परमया पुनः ॥

शिवाय ते नमो नित्यं विश्वकाय नमोनमः ।
नमो दिव्याय गुह्याय गूढव्रतशरीरिणे ॥ ५६ ॥

नमो जटाय रामाय माययाक्रान्तकारिणे । नमोऽस्तु बहुरूपाय नमो नीलाभरूपिणे
नमो भोगाय धूम्राय नमोऽस्तु गगनात्मने । नमो वह्निसमूहाय नमस्ते निर्मलाक
नमो महान्धकारार्क नमस्ते शत्रुघातिते । नमः संसारपाराय दिव्यरूपशरीरिणे ॥

नमः कनकवर्णाय नमो मोहितमोहिने ॥ ६२ ॥
नमः सुरूपाय सुरार्चिताय नमो विरूपाय प्रकृतेः पराय ।
नमोनमो रूपनिराश्रयाय श्यामासुरूपाय नमो नमस्ते ॥ ६३ ॥

इति स्तुतस्तदा देवि महादेवोमहेश्वरः । जटावेष्टितसर्वाङ्गो लिङ्गमध्याच्चनिस्सृतः

भस्मचर्चितसर्वाङ्गो भोगिभोगाङ्गदोज्ज्वलः ।
हिमराशिनिभाकारो राजताचलनिर्मलः ॥ ६५ ॥
मुक्तालतानिभाभिस्तु जटाभिर्भूषितो विभुः ।
कपिलाभिः करालाभिर्विकटाभिश्च वेष्टितः ॥ ६६ ॥
भोगीन्द्रफणबद्धाभिः सितपीतादिभिस्तथा ।
नदीरूपाभि (रे ?) रूताभिः शोभितोऽसौ जटेश्वरः ॥ ६७ ॥

राजानं प्रत्युवाचेदं वचनं पर्वतात्मजे !। स्तोत्रेणानेन राजेन्द्र तुष्टोऽहंतोषितस्त्वया
जटीभूतं घने पापं गतं मद्दर्शनेन वै । तस्मात्स्थानं परं गच्छ मदीयं शाश्वतं मुदा
इत्युक्तो देवदेवेन वीरधन्वामहीपतिः । जगाम परमं स्थानं दाहप्रलयवर्जितम् ॥
कामगेन विमानेन स्तूयमानो गणैः प्रिये । पापसङ्घेन मुक्तोऽसौ जटीभूतेशदर्शनात्

लिङ्गश्चातः समाख्यातो नाम्ना देवो जटेश्वरः ।
जटेश्वरं वरारोहे! ये पश्यन्ति सुभक्तितः ॥
तेषां पापं जटीभूतं तत्क्षणादेव नश्यति ॥ ७२ ॥

येऽर्चयन्ति सदा देवि देवदेवं जटेश्वरम् । तेषां बलंप्रभावश्च सौभाग्यं चभविष्यति
येऽप्यन्ये देवगन्धर्वा यक्षराक्षसमानवाः । लिङ्गंच पूजयिष्यन्तिविधिवद्भक्तिभावतः

तेऽपि कामानवाप्स्यन्ति यांश्च कांश्चसुदुर्लभान् ।
ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ७५ ॥
निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात ।
पापिनः क्रूरकर्माणो येऽपि लिङ्गं समाश्रिताः ॥
तेऽपि पापविनिर्मुक्ता भविष्यन्ति गतज्वराः ॥ ७६ ॥

जटेश्वरंप्रपश्यन्ति भक्त्यायेचदिनेदिने । ते धर्मधनसौभाग्यैर्भविष्यन्ति समन्विताः

व्याधितो व्याधिना मुक्तो दुःखी दुःखात्प्रमुच्यते ।
दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ ७८ ॥
जटेश्वरस्य माहात्म्यं ये पठिष्यन्ति पार्वति !।

श्रोष्यन्ति येऽपि मद्भक्त्या प्रयताः श्रद्धयान्विताः ॥ ७१ ॥

ते सर्वकामानाप्स्यन्ति गतिमन्तेचमत्पुरे । यानारी दुर्भगासापिसौभाग्यंलभतेसदा गुर्विणी लभते पुत्रमरोगं श्रुतिभूषणम् । शिशुग्रहाश्च नश्यन्ति नापमृत्युभयंभवेत् मांगल्यमिदमायुष्यं धर्मकामाश्रयंमहत् । दुःस्वप्नजंभयंघोरंपापजंयाति सङ्क्षयम् दुर्भुक्तंदुर्जनस्पर्शं यच्चाल्पायुःकरंभवेत् । लिङ्गाख्यानकथां श्रुत्वाविनश्यतिनसंशयः श्राद्धेषु यःपठेदेतां जटेश्वरकथां शुभाम् । तदक्षयं भवेच्छ्राद्धं पितृणां प्रीतिवर्द्धनम्

एष ते कथितो देवि! प्रभावः पापनाशनः ।

जटेश्वरस्य देवस्य शृणु रामेश्वरं शिवम् ॥ ८५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽ-चतुरशीतिलिङ्गमाहात्म्ये जटेश्वरमाहात्म्यवर्णनं नामाऽष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

रामेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

एकोनत्रिंशतं विद्धि देवं रामेश्वरं प्रिये !। यस्य दर्शनमात्रेण मुच्यते ब्रह्महत्यया ॥ पुरा त्रेतायुगे देवि ! रामःशस्त्रभृताम्वरः । शूरः सर्वगुणोपेतः पितृभक्तो बभूव ह

रेणुकागर्भसम्भूतः स्वयं रामो बभूव ह ।

विष्णुरेवावतीर्णोऽसौ भृगोः शापात्सुदुस्तरात् ॥ ३ ॥

स कदाचिन्नियुक्तोऽसौ मुनिना जमदग्निना ।

शिरश्छिन्धीत्युवाचेदं मातुस्ते विपुलं सुत !॥ ४ ॥

स पितुर्ववचनं श्रुत्वा भ्रातृणां मातुरेवच । शिरांसिचिच्छिदेरामोजमदग्निर्वरंददौ सर्वेषां पृथिवीशानां त्वमजेयो भविष्यसि । सर्वक्षयकरो भावीन चिरादेव भार्गव

गृहाण परशुं पुत्र वह्निज्वालोद्भवं दृढम् । अनेन शितशस्त्रेण ततःख्यातोभविष्यति अथ केनापि कालेन कार्त्तवीर्यार्जुनो नृपः । हैहयानां कुले जातः सहस्रबाहुविश्रुतः जघान जमदग्निं तु कामधेनुकृतेकुधीः । पितरं निहतं दृष्ट्वा रामः क्रुद्धोऽब्रवीदिदम्

अथ पश्यन्तु मे वीर्यं त्रयो लोकाः सनातनम् ।

स च पश्यतु दुर्बुद्धिर्ब्रह्महा कृतवीर्यजः ॥ १० ॥

मत्पिता निहतो येन सत्कर्मनिरतः सदा । तस्यबाहुसहस्रंतुछेत्स्यामीह नसंशयः

इत्युक्त्वा क्रोधरक्ताक्षः कार्त्तवीर्यार्जुनं भुवि ।

धर्षयित्वा यथाकामं क्रोशमानं पुनः पुनः ॥ १२ ॥

कृत्स्नं बाहुसहस्रं च चिच्छेद भृगुनन्दनः । परश्वधेन तीक्ष्णेनज्ञातिभिःसहितंतदा रथस्थं पातयामास जघान नृपतिं प्रिये !। त्रिःसप्तकृत्वःपृथिवीतेननिःक्षत्रियाकृता कृत्वा निःक्षत्रियां चैवभार्गवः स महाबलः । सर्वपापविनाशाय वाजिमेधेनचेष्टवान्

तस्मिन्यज्ञे महादाने दक्षिणां भृगुनन्दनः ।

मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम् ॥ १६ ॥

वारुणांस्तुरगाञ्छुभ्रान्रथं च रथिनां वरः । हिरण्यमक्षयं धेनूर्गजेन्द्रांश्च महामतिः तदा तस्मिन्महायज्ञे वाजि मेधेमहायशाः । तथापिन गता हत्याह्यनेकप्राणिसम्भवा एवं किल पुराणेषु सर्वागमभिदादिषु । विश्वस्तघातिनां चैव निष्कृतिःश्रूयतेयथा अश्वमेधेन यज्ञेन ब्रह्महत्या विनश्यति । अथवा द्वादशाब्देन यद्येकाऽऽस्याकृताभुवि मया पुनर्नृशंसेन बहवः प्राणिनो हताः । विश्वस्ताश्च प्रमत्ताश्च गर्भस्थाश्च पुनःपुनः स्त्रियो वृद्धाश्च बालाश्चमाता चैव विशेषतः । इतिदुःखान्वितोरामो विषादंपरमंगतः चिन्तयित्वा मुहूर्तं तु गतो रैवतकं गिरिम् । तथातपोऽतपद्घोरंबहून्वर्षगणान्प्रिये

तथापि न गता हत्या ह्यनेकप्राणिसम्भवा ।

अथ रामो जगामाथ महेन्द्रे मलये तथा ॥ २४ ॥

सह्ये हिमालये रम्ये पुण्ये बदरिकाश्रमे । चरित्वा पर्वतान्सर्वान्स्नानार्थंनर्मदां ययौ

यमुनां चन्द्रभागां च गङ्गां त्रिपथगामिनीम् ।

इरावतीं वितस्तां च परां चर्मण्वतीं शुभाम् ॥ २६ ॥
विशालां कपिलां दुर्गां गम्भीरां गोमतीं शिवाम् ।
गोदावरीं दशार्णां च पुण्यां भीमरथीं तथा ॥ २७ ॥
गयां चैव कुरुक्षेत्रं नैमिषं पुष्करं तथा । अट्टहासं प्रभासं च केदारममरेश्वरम् ॥ २८
कृतयात्रोऽपि दुःखार्त्तश्चिन्तयामास भार्गवः ।
न नूनं तीर्थमाहात्म्यं दृश्यते भुवि साम्प्रतम् ॥ २९ ॥
न गताब्रह्महत्यामेकृतोधर्मो निरर्थकः । मिथ्यातत्कथ्यते शास्त्रेतीर्थदानादिभिःशुभैः
यदि स्यात्सत्यमेतच्च नष्टं जातं कथं मम ॥ ३० ॥
एतस्मिन्नेव काले तु नारदो मुनिपुङ्गवः । आजगाम तमुद्देशं यत्र रामोऽव्यवस्थितः
विषण्णवदनो दीनश्चिन्तयानः पुनः पुनः । दृष्ट्वा तथाविधोरामः प्रत्युवाचाथनारदम्
भोभो नारद देवर्षे !शृणु मे परमं वचः । जननी निहता पूर्वं पितुर्वाक्याद्द्विजोत्तम
पितुःपराभवाद्भूमौ भूमिपाला मया हताः ।
गर्भाविदारिताः स्त्रीणां बाला वृद्धाश्चयोषितः ॥ ३४ ॥
निरन्तरा हता लोका विशोकेनादयालुना । पश्चाद्घृणा समुत्पन्ना परलोकं ममेक्षतः
यज्ञः कृतोऽश्वमेधश्च दत्तं दानमनेकधा । स्नातोऽहं सर्वतीर्थेषु सर्वप्रस्रवणेषु च ॥३६
पर्वतेषु तपस्तप्तं हुतं जप्तं निरन्तरम् । ब्रह्महत्याविनाशार्थं किं किं नात्र मया कृतम्
परं नैव गता हत्या तस्मात्सर्वं निरर्थकम् ॥ ३८ ॥
इतितस्यवचःश्रुत्वा नारदोभगवानृषिः । प्रत्युवाच हितंसत्यं चिरंध्यात्वावचस्तदा
भोभो राम! किमात्मानं न स्मरस्यधुना हरिम ॥ ३९ ॥
त्वयैव कथितं पूर्वं ब्रह्महत्याविनाशनम् । महाकालवने क्षेत्रे क्षेत्राणामुत्तमं परम् ॥
तस्मिन्क्षेत्रे महालिङ्गं ब्रह्महत्याविनाशनम् ॥ ४० ॥
जटेश्वरो महाभाग! विद्यते सर्वसिद्धिदम् । कृतावताररामत्वंतत्रगच्छाविलम्बितम्
नारदस्य वचः श्रुत्वा स्मृत्वा क्षेत्रमनुत्तमम् ॥ ४१ ॥
जगाम त्वरितं देवि! महाकालवने ततः । लिङ्गमाराधयामास ततो हत्यागताक्षयम्

लिङ्गमध्यादहं देवि! प्रसन्नो निर्गतस्तदा ॥ ४२ ॥
जामदग्न्यो मया प्रोक्तः कान्तकामं ददाम्यहम् ।
स प्रोवाच ततो रामो भक्तिनम्रात्मकन्धरः ॥ ४३ ॥
त्वत्पादपङ्कजे भूयाद्भक्तिर्मे विपुला सदा । वरमेतं प्रयच्छाद्य यदि तुष्टो महेश्वर ॥
इत्युक्तोऽहंतदातेनयथातुष्टेनपार्वति । तस्मै दत्ता मयाभीष्टावरा कीर्त्तिकरास्थितिः
अद्यप्रभृति ते नाम्ना देवःख्यातोभविष्यति । यदारामेश्वर इति त्रिषु लोकेषु गीयते
भक्त्यायेपूजयिष्यन्ति देवं रामेश्वरंपरम् । आजन्मप्रभवं पापंतेषांनश्यतितत्क्षणात्
स एव पुण्यवान्पूज्य इह लोके परत्र च । यःपश्यतिनरो भक्त्या देवं रामेश्वरंशिवम्
येऽनुमोदन्तिदेवस्य दर्शनंयजनं तथा । तेऽपि पापविनिर्मुक्ताः प्रयान्तिममम न्दिरम्
यच्चापि पातकं घोरं ब्रह्महत्यासहस्रकम् । तत्पापं विलयं याति रामेश्वरसमर्चनात्
दुष्प्राप्यं यत्फलं विप्रैर्वाजपेयादिभिर्मखैः । प्राप्यते तत्सुखेनैव श्रीरामेश्वरदर्शनात्
ये हताभिमुखाःशूरागोविप्रार्थे रणाजिरे । गतिरभ्यधिकातेभ्यो दृष्ट्वारामेश्वरंशिवम्
जितास्तेन सदा लोका रामेणेव जगत्त्रयम् ।
दृष्टं येन सदा भक्त्या लिङ्गं रामेश्वरं शिवम् ॥ ५३ ॥
एष ते कथितो देवि! प्रभावः पापनाशनः । रामेश्वरस्य देवस्यशृणुत्वं च्यवनेश्वरम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये रामेश्वरमाहात्म्यवर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

च्यवनेश्वरप्रभाववर्णनम्

श्रीविश्वनाथ उवाच

त्रिंशत्तमं विजानीहि त्वं देवि! च्यवनेश्वरम् । यत्र दर्शनमात्रेण स्वर्गभ्रंशो न जायते
भृगोर्महर्षेः पुत्रश्च च्यवनोनाम पार्वति !। स्थाणुभूतस्तपस्तेपे निराहारो महामुनिः
वितस्तायास्तटेरम्ये बहुवर्षगणान्किल । सवल्मीकोऽभवद्विप्रोलताभिरभिसम्वृतः

कालेन महतादेवि समाकीर्णः पिपालकैः ।
तथा स सम्वृतो धीमान् मृत्पिण्डइव सर्वशः ॥ ४ ॥

आजगाम समुद्देशं विहर्त्तुं वन उत्तमे । शर्यातिर्नाम धर्मात्मासकुटुम्बो मुदान्वितः
तस्यस्त्रीणांसहस्राणिचत्वार्यासन्परिग्रहः । एकैवतु सुता सुभ्रू सुकन्यानामनामतः

सा सखीभिः परिवृता सर्वाभरणभूषिता ।
सा भ्रम्यमाणा वल्मीके दृष्ट्वा भार्गवचक्षुषी ॥ ७ ॥
सा कौतुकात्कण्टकेन बुद्धिमोहवती तदा ।
किं नु खल्विदमित्युक्त्वा निर्बिभेदाऽस्य लोचने ॥ ८ ॥

अभवत्सतयाविद्धो नेत्रयोः परमार्तिमान् । ततःशर्यातिसैन्यस्यशकृन्मूत्रंसमारुणत्
ततो रुद्धे सकृन्मूत्रे पर्यतप्यत पार्थिवः । प्रत्युवाच ततः क्रुद्धो राजा गद्गदया गिरा
केनापकृतमद्येह भार्गवस्य महात्मनः ।तपोनित्यस्य वृद्धस्य रोषणस्य विशेषतः
ज्ञातंवायदिवाज्ञातंतदिदं ब्रूत माचिरम् । तमूचुःसैनिकाः सर्वे न विद्मोऽपकृतम्वयम्

ततः स पृथिवीपालः साम्ना चोग्रेण च स्वयम् ।
पर्यपृच्छत्स्ववर्गञ्च भूयोभूयः सुदुःखितः ॥ १३ ॥

पितरंदुःखितं दृष्ट्वा सुकन्यातमथाब्रवीत् । मयाकिञ्चिच्चवल्मीकेदृष्टंसत्त्वमतिच्छवि

खद्योतवदविज्ञातं तन्मया विद्धमन्तिकम् ।

एतच्छ्रुत्वा तु शर्यातीर्वल्मीकं क्षिप्रमभ्यगात् ॥ १५ ॥

तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् । प्रार्थयामाससैन्यार्थेप्राञ्जलिः स महीपतिः
अज्ञानाद्बालया यत्तेऽपकृतं तु महीसुर । इमामेव च ते कन्यां ददामि सुदृढव्रताम्
भार्यार्थे त्वं गृहाणेमांप्रसीदद्विजसत्तम । ततोऽब्रवीन्महीपालंच्यवनो भार्गवस्तथा
यद्यवम्प्रतिगृह्यैतां क्षमिष्यामि महीपते !। ददौ दुहितरं तस्मै च्यवनाय महीपतिः
प्रतिगृह्य च तां कन्यां भगवान्प्रससाद ह । प्राप्ते प्रसादे राजाथससैन्यो विषयंगतः

सुकन्याऽपि पतिं लब्ध्वा तपस्विनमनिन्दिता ।
नित्यं पर्यचरत्प्रीत्या तपसा नियमेन च ॥ २१ ॥
कस्यचित्त्वथ कालस्य नासत्यावश्विनौ प्रिये !।
कृताभिषेकां विवृतां सुकन्यां तामपश्यताम् ॥ २२ ॥

तां दृष्ट्वा दर्शनीयाङ्गीं देवराजसुतामिव । ऊचतुः समुपद्रुत्य कस्य त्वमतिशोभने ॥
सा प्रोवाचमहाभागा पतिव्रतपरायणा । शर्यातितनयाऽस्मैव भार्या च च्यवनस्य हि
ततोऽश्विनौ प्रहस्यैनामब्रूतां पुनरेव तु । कस्मादेवंविधा भूत्वाजराजर्जरितंपातम्
त्वमपास्येह कल्याणि कामभोगबहिष्कृता । वृद्धं च्यवनमुत्सृज्य वरयस्वैकमावयोः
पत्यर्थं देवगर्भाभे मा वृथा यौवनंकृथाः । एवमुक्ता सुकन्या तु दस्रौ ताविदमब्रवीत्
रताहं च्यवने देवे मैवं मा पर्यशङ्कतम् । ततोऽब्रूतां पुनस्त्वेनामावां देवभिषग्वरौ ॥

युवानं रूपसम्पन्नं करिष्यावः पतिं तव ।
एतेन समयेनावामामन्त्रय सुमध्यमे !॥ २६ ॥
सा तयोर्वचनं श्रुत्वा कथयामास भार्गवे ।
तच्छ्रुत्वा च्यवनो भार्यां क्रियतामित्यभाषत ॥ ३० ॥

ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः । ततोऽप्सुच्यवनःशीघ्रं रूपार्थीप्रविवेशह
अश्विनावपि तत्काले सरःप्राविशतांप्रिये । ततो मुहूर्त्तादुत्तीर्णाःसर्वे तेसरसस्तदा
दिव्यरूपधराः सर्वे युवानो दिव्यकुण्डलाः । तुल्यवेषधराश्चैव मनसः प्रीतिवर्द्धनाः
तेऽब्रुवन्सहिताःसर्वेवृणीष्वान्यतमंशुभम् । अस्माकमीप्सितंभद्रे पतित्वेघरवर्णिनि

सा समीक्ष्य तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् ।
निश्चित्य मनसा बुद्ध्या देवी वव्रे स्वकं पतिम् ॥ ३५ ॥
लब्ध्वा तु च्यवनो भार्यां वयोरूपं तु वाञ्छितम् ।
हृष्टोऽब्रवीन्महातेजास्तौ नासत्याविदं वच ॥ ३६ ॥
यदहंरूपसम्पन्नोवयसाचसमन्वितः । कृतो भवद्भ्यां वृद्धःसन्भार्यांश्चप्राप्तवानिमाम्
तस्माद्युवां करिष्यामिप्रीत्याहंसोमपायिनौ । सत्यमेतन्नसन्देहोदेवराजस्यपश्यतः
तच्छ्रुत्वाहृष्टमनसौ दिवंदेवौप्रजग्मतुः । याजयामाससामाह्नौनासत्यावश्विनाविति
भिषजौ देवतानां हि कर्मणा तेन गर्हितौ ।
आभ्यामर्थाय सोमं त्वं प्रदास्यसि यदि स्वयम् ॥ ४० ॥
वज्रं ते प्रहरिष्यामि घोररूपं सुदारुणम् । एवमुक्तः स्मयन्निन्द्रमभिवीक्ष्यसभार्गवः
बलिनं वासवं ज्ञात्वा चिन्तयामास सत्वरम् ॥ ४१ ॥
देवमाराधयिष्यामि महादेवं महेश्वरम् । यस्य कर्मकरः शक्रो यस्य देवावशानुगाः
यः समर्थो जगद्धाता सृष्टिसंहारकारकः ॥ ४२ ॥
इत्युक्त्वाच्यवनोदेवि महाकालवनंगत । रामेश्वरस्य देवस्यलिङ्गमीशानतःस्थितम्
श्रद्धयाराधितं तेन च्यवनेन महात्मना ॥ ४३ ॥
तस्यप्रसन्नो रुद्रस्तु स वज्रादभयन्ददौ । तस्य प्रहरतो बाहुं स्तम्भयामासभार्गवः
समाराधनतुष्टस्यलिङ्गस्यास्यप्रभावतः । एतस्मिन्नन्तरेज्वालानिःसृतालिङ्गमध्यतः
तया देवगणाः सर्वे दह्यमाना विचेतसः । प्रोचुर्गद्गदया वाचा धूमेनान्धीकृतेक्षणाः
क्रियेतां सोमपावेतावश्विनौ बलसूदन !। देवानां वचनं श्रुत्वा च्यवनं भयपीडितः
प्रत्युवाच तत शक्रः प्रणामानतकन्धरः ॥ ४७ ॥
सोमपावश्विनावेतावद्यप्रभृति भार्गव !। भविष्यतस्ततः सर्वमेतत्सत्यं ब्रवीमि ते ॥
मा तेऽतिथ्याभिसंरम्भो भविष्यति तपोधन !।
लिङ्गस्याऽस्य प्रभावोऽयं यदहं निष्प्रभीकृतः ॥ ४९ ॥
ततस्त्वन्नामधेयेन प्रसिद्धिर्भुवि यास्यति ।

आराधितं यतो देवि! च्यवनेन महात्मना ॥ ५० ॥
च्यवनेश्वरमेतद्वै ख्यातं त्रिभुवनेऽभवत् । भक्ता ये पूजयिष्यन्ति देवेशं च्यवनेश्वरम्
आजन्मप्रभवं पापं तेषां नश्यति तत्क्षणात् ॥ ५१ ॥
यः पश्यति नरो नित्यं च्यवनेश्वरसञ्ज्ञकम् ।
जन्मदुःखजरारोगैर्मुक्तो मुक्तिमवाप्नुयात् ॥ ५२ ॥
यंयं काममभिध्यायेन्मनसाभिमतं नरः । तं तं दुर्लभमाप्नोति च्यवनेश्वरदर्शनात् ॥
नियमेन प्रपश्यन्ति ये देवं च्यवनेश्वरम् । ते प्रयान्ति तनुं त्यक्त्वामदीयेभुवनेप्रिये
यः शृणोति कथां पुण्यां सर्वपापहरां शुभाम् ।
स पुण्यात्मा परं स्थानं याति दिव्यं न संशयः ॥ ५५ ॥
भक्तिहीनः क्रियाहीनो यः पश्यति प्रसङ्गतः ।
स पुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि !॥ ५६ ॥
पुष्पैर्विचित्रैर्ये देवं यजन्ते च्यवनेश्वरम् । संसारार्णवमुल्लङ्घ्यते यान्ति परमं पदम्
एष ते कथितो देवि! प्रभावः पापनाशनः ।
च्यवनेश्वरदेवस्य शृणु खण्डेश्वरं शिवे ॥ ५८ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनाम
त्रिंशोऽध्यायः ॥ ३० ॥

———

एकत्रिंशोऽध्यायः

खण्डेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

एकत्रिंशत्तमं विद्धि देवं खण्डेश्वरंप्रिये !। सम्पूर्णं जायतेयस्य दर्शाद्दानव्रतादिका

आसीत्त्रेतायुगे देवि ! भद्राश्वोनाम पार्थिवः ।

यस्य नाम्नाऽभवद्वर्षं भद्राश्वंनाम नामतः ॥ २ ॥

तस्यागस्त्यः कदाचित्तु गृहमागम्य सत्तमः । उवाच सप्तरात्रं तुवसामिभवतोगृहे

तं राजा शिरसा नत्वा स्वास्यतामित्यभाषत ।

तस्य कान्तिमतीनाम भार्या परमशोभना ॥ ४ ॥

तस्यास्तेजःसमभवद्द्वादशादित्यसन्निभम् । सपत्नीनांशतं तस्याविद्यतेवरवर्णिनि

ता दास्य इव कर्माणि कुर्वन्त्यहरहः सदा ।

कान्तिमत्याः प्रभावेण भयोत्त्रस्ताः सुलोचनाः ॥ ६ ॥

तामगस्त्यस्तथा दृष्ट्वा तन्मुखासक्तलोचनाम् । एवंभूतां तथादृष्ट्वाराज्ञींपरमशोभनाम्

साधुसाधु जगन्नाथेत्यगस्त्यः प्राह हर्षितः ॥ ७ ॥

द्वितीये दिवसेऽप्येवं राज्ञीं दृष्ट्वा, महाप्रभाम् । अहो ह्यङ्गनयामुष्टं जगदेतच्चराचरम्

इत्यगस्त्यो द्वितीयेऽह्नि राज्ञीं दृष्ट्वेत्युवाच ह । तृतीयेऽह्नि च तांदृष्ट्वापुनरेवमुवाचह

अहो मूढा न जानन्ति लिङ्गमाहात्म्यमुत्तमम् ।

महाकालवने क्षेत्रे च्यवनेशस्य पूर्वतः ॥ १० ॥

खण्डव्रतानि जायन्ते पूर्णानि दर्शनाद्यतः । चतुर्थेदिवसेहस्तावुत्क्षिप्य पुनरब्रवात्

साधुसाधु जगन्नाथ साधु भद्राश्व सुव्रत !। पञ्चमे दिवसेऽप्येवं षष्ठे चैव पुनः पुनः

नृत्यन्तं सप्तमे दृष्ट्वा दिने पत्न्या समन्वितः ।

प्रोवाच वैनं राजा स विस्मितेनान्तरात्मना ।

किं हर्षकारणं ब्रह्मन् !येन नृत्यसमन्वितः ॥ १३ ॥

अगस्त्य उवाच

अहो भूपालमूढस्त्वंमहामूर्खाश्च मन्त्रिणः । अहोपुरोहितो मुग्धोयेनजानन्तिमेमतम्

ईदृशा अपि जायन्ते राजानो यस्य दर्शनात् । एवमुक्तस्ततो राजाकृताञ्जलिरभाषत

न जानीमो वयं ब्रह्मन्नभिप्रायं तवाधुना । कथयस्वमहाभाग यद्यनुग्रहकृद्भवान् ॥

अगस्त्य उवाच

इयं राज्ञी त्वदीयाऽभूद्दासी वैश्यस्य वैदिशे ।:नगरे हरिदत्तस्यत्वमस्याःपतिरेवच

खण्डव्रतप्रभावेण जातः कर्मकरो भवान् ॥ १७ ॥

स च वैश्यो महाकालेगत्वादेवंमहेश्वरम् । अर्चयामासविधिवद्गन्धपुष्पादिभिःशुभैः

अभ्यर्च्य तु गृहं यावद्भवन्तौ रक्षपालकौ । ततः कालेन महता मृतौ द्वावपिदम्पती

तेनपुण्येन ते जन्म प्रियव्रतगृहेऽभवत् । इयं च पत्नी ते जाता पुरा वैश्यप्रदासिका

परकीयप्रसङ्गेन सञ्जाता भूमिरुत्तमा । राज्यं पत्नी सुता साधुरित्युक्तं वचनं मया

तस्य देवस्य माहात्म्याद्यजन्तं विविधैर्मखैः ।

पश्यामि त्वां महीपाल! भूपालशतवेदितम् ।

अतः साधुपुरा प्रोक्तं मया तव महीपते !॥ २३ ॥

इति तस्य वचः श्रुत्वा कुम्भयोनेर्महात्मनः । महाकालवने गन्तुंमतिंचक्रे महीपतिः

ततः सान्तःपुरः प्रायात्तेन सार्द्धं महर्षिणा ॥ २४ ॥

अगस्त्यकथितंलिङ्गं ददर्श श्रद्धया पुनः । पूजयामासविधिवत्पत्न्यासार्द्धंमहीपतिः

ततस्तुष्टस्तदादेवो नृपं प्राहामितद्युतिः । मनोऽभीष्टं तपस्तेऽस्तु भोगमैश्वर्यमेवच

कुलं प्रभावं सौभाग्यं दीर्घमायुररोगिताम् ।

निःसपत्नं ततो राज्यं कृत्वा स्वर्गमवाप्स्यति ॥ २७ ॥

इत्युक्तोदेवदेवेनगतोऽसौविषयं स्वकम् । निष्कण्टकंततोराज्यंकृत्वास्वर्गंगतःप्रिय

अनेकजन्मचरितं खण्डव्रतकदम्बकम् । सम्पूर्णमभवद्देवि लिङ्गस्यास्य प्रभावतः

अतः खण्डेश्वरो देवो विख्यातो भुवनत्रये ।

ये पश्यन्ति नरा देवि! देवं खण्डेश्वरं शिवम् ॥ ३० ॥
खण्डव्रतानि पूर्णानितेषामाशु भवन्ति हि । तपःखण्डंव्रतेखण्डंदानखण्डंचयत्कृतम्
तत्सर्वं पूर्णतां याति श्रीखण्डेश्वरदर्शनात् ॥ ३१ ॥
दृष्ट्वा खण्डेश्वरं देवं पापविघ्नैः प्रमुच्यते । सप्तजन्मकृतैर्देवि! मनोवाक्कायकर्मभिः ॥
दृष्ट्वा खण्डेश्वरं देवं कृतकृत्यत्वमाप्यते ।
तस्य नश्यति दौर्भाग्यं सप्तजन्मोद्भवं प्रिये !॥ ३३ ॥
खण्डेश्वरेऽर्चिते देवे सर्वे देवाः सवासवाः । सन्तुष्टा वरदाश्चैव भवन्तिवरवर्णिनि
देवं खण्डेश्वरं ये वैयजन्ति श्रद्धयाप्रिये । पुण्यैर्नानाविधैःस्नानैःसुगन्धैश्चविशेषतः
धूपदीपैर्नमस्कारैर्जपैः स्तोत्रैः पृथग्विधैः ।
ते सर्वे कामसम्पन्नाः श्रीमन्तो राज्यसंयुताः ॥ ३६ ॥
दीर्घायुषः शुभाचारा जायन्ते देहिनोऽमलाः ।
अतिश्रेष्ठा गतिस्तेषां विशोका नित्यमक्षयाः ।
खण्डेश्वरप्रसादेन जायन्ते नाऽत्र संशयः ॥ ३७ ॥
एते च विष्णुब्रह्मेन्द्रकुबेरदहनादयः । परां सिद्धिं सुसम्प्राप्ताः खण्डेश्वरसमर्चनात्
एष ते कथितो देवि प्रभावः पापनाशनः । खण्डेश्वरस्य देवस्य शृणुवैपत्तनेश्वरम्

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये खण्डेश्वरमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

पत्तनेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

त्रिषु लोकेषुविख्यातंद्वात्रिंशत्तममुत्तमम् । विद्धिसिद्धिप्रदंपुंसांपत्तनेश्वरमीश्वरम्
पुराऽहं पर्वते देवि! मन्दरेचारुकन्दरे । क्रीडन्सार्द्धं त्वयापृष्टःकदाचिद्रहसि स्थितः
किमर्थंपर्वतंत्यक्त्वा कैलासंरमणीयकम् । मुक्ताफलशिलाशुभ्रं शङ्खचन्द्रांशुनिर्मलम्
सिद्धचारणगन्धर्वकिन्नरोद्गीतनादितम् । सदा पुष्पद्रुमच्छन्नं कदलीवनराजितम् ॥
अथकोकिलचक्राह्वचकोरकुरराकुलम् । पुण्यलोकोपमं स्थानं त्रिविष्टपविभूषणम्
महाकालवने शून्ये नानागुल्मलतावृते । गजेन्द्रगजशार्दूलसिंहशम्बरसङ्कुले ॥ ६ ॥
ऋक्षवानरगोमायुजन्तुकादिविराजिते । मयूरसर्पमार्जारमूषिकादिविराजिते ॥
कथं वासः कृतो देव! कौतूहलमिदं मम ॥ ८ ॥
इति पृष्टस्त्वया देवि! मन्दरे चारुकन्दरे । मया प्रोक्तं प्रसन्नेन पत्तनं च मम प्रिये ॥
महाकालवनं रम्यं स्वर्गात्सुखकरं परम् । श्मशानपीठसत्क्षेत्रवनोवरसमाश्रितम् ॥
अनौपम्यगुणं विद्धि पत्तनं पर्वतात्मजे !। एवं पत्तनदेवो वै न दृष्टो भुवनत्रये ॥
गीतवादित्रचातुर्यैः स्पर्द्धते यः सुरालयम् ॥ ११ ॥
एतस्मिन्नन्तरे देवि!देवर्षिर्नारदोमुनिः । द्रष्टुकामःसमायातो मन्दरे मां यशस्विनि
विनोदार्थं मया पृष्टस्त्वत्प्रियार्थं कुतूहलात् ।
क्व त्वया गमितः कालः कल्पसङ्ख्यो महामुने !॥ १३ ॥
कस्मिन्नाश्रमसंस्थानेतपसःसंचयःकृतः । तीर्थानिकानिभ्रान्तानिकते रतिरभूच्चिरम्
कौतुकं दृष्टपूर्वं तु वद मे मुनिसत्तम !। इति पृष्टो मया देवि! ब्रह्मपुत्रो महामुनिः ॥
कथयामास वृत्तान्तं पत्तनस्य प्रयत्नतः ॥ १५ ॥
बहूनि संपरिक्रम्य तीर्थान्यायतनानि च । पत्तनानि विचित्राणि देशांश्चनगराणिच

अटनार्थं महादेव जम्बूद्वीपे मनोरमे । दृष्टः पत्तनराजश्च सदानन्दकरः परः ॥ १७ ॥

स्वेच्छाकल्पितविन्यासः प्रासादशतकल्पितः ।

इच्छाकामफलावाप्तिरनिर्देश्यसुखावहः ॥ १८ ॥

सर्वर्तुकुसुमामोदसुखस्पर्शानिलावृतः । वीणावेणुरवैर्घुष्टो मनः प्रह्लादकारकः ॥

वजेन्द्रनीलवैडूर्यचन्द्रकान्तादिदीपितः । जरामृत्युभयोपेतः सर्वव्याधिविवर्जितः ॥

शक्राग्नियमरक्षोब्धिवायुसोमेशसेवितः । ऊद्र्ध्वाधः सप्तलोकेषुपुण्येषुनिवसन्तिहि

सदा प्रमुदिता देवास्तेऽपि काङ्क्षन्ति पत्तनम् ।

तत्र शान्ता महात्मानो निवसन्ते महेश्वर !॥ २२ ॥

विद्योतितदिशो दान्ताः सूर्यवैश्वानरप्रभाः । दिव्याम्बरधराधीराजटामुकुटधारिणः

विप्रामाहेश्वराः पुण्याःक्षत्रियाहरतत्पराः । मुमुक्षवस्तपोनिष्ठावैश्याःशूद्राश्चिरायुषः

स शुभ्ररूपः स च लोहिताकृतिः स चापि पीतः स सितेतरः क्वचित् ।

स नामधेयः स च नामवर्ज्यः सोऽदृश्यरूपः स च दृष्टरूपः ॥ २५ ॥

क्वचिद्रविसहस्राक्षः क्वचिदेकरविप्रभः ।

क्वचिच्चन्द्राद्विशिष्येत क्वचिदङ्गुलिकान्तिमान् ॥ २६ ॥

जन्ममृत्युजरारोगैर्दुःखानि विविधानि च । प्रयान्तिविलयं तानि प्रसन्नेपत्तनेश्वरे

एषते कथितो देवि! प्रभावः पापनाशनः । पत्तनेशस्य देवस्य आनन्देशमतः शृणु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये पत्तनेश्वरमाहात्म्यवर्णनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

आनन्देश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

त्रयस्त्रिंशत्तमं देवमानन्देश्वरमीश्वरम् । विद्धि पापहरं पुण्यं सर्वसम्पत्करं सदा ॥

पुरा राथन्तरे कल्पे बभूव पृथिवीपतिः । अनमित्र इति ख्यातः सार्वभौमो महीतले

सधर्मात्मा महात्मात्र पराक्रमधनोनृपः । अतीत्यसर्वभूतानि बभौ भानुरिवाव्ययः

समः शत्रौ च पुत्रे च मित्रे च परधर्मवित् । गिरिभद्रागिरेःपुत्रीतेनोढा वरवर्णिनी

अतीववल्लभासाच प्राणेभ्योऽपिगरीयसी । आनन्दइतिपुत्रोऽभूत्तस्यज्ञानरतःसुधीः

जातमात्रो निजोत्सङ्गे स्थिरमुल्लाप्य वै पुनः ।

परिष्वजति हार्द्देन उल्लापयति पुनः पुनः ॥ ६ ॥

स जातिस्मरणो जातो मातुरुत्सङ्गमास्थितः ।

जहास च तदा माता सङ्क्षुब्धा वाक्यमब्रवीत् ॥ ७ ॥

भीताऽस्मि किमिदं वत्स! हासो यद्वदने तव ।

अकालबोधः सञ्जातः किंस्वित्पश्यसि शोभनम् ॥ ८ ॥

इत्युक्तोमातरंप्राहसर्वोऽपि स्वार्थमीहते । मां नेतुमिच्छतिपुरोमार्जारीकिंनपश्यसि

अन्तर्धानगता चेयं द्वितीया जातहारिणी ॥ ९ ॥

पुत्रप्रीत्याचमातस्त्वमतःस्वार्थंसमीहसे । उल्लाप्योल्लाप्यबहुशःपरिष्वजसिमांबत

उद्भूते बालके स्नेहात्सम्भ्रमात्स्त्रीजनोऽप्ययम् ।

ततोऽयमागतो हासः शृणु चाप्यत्र कारणम् ॥ ११ ॥

स्वार्थे प्रसक्तामार्जारीलोलुपा मामवेक्षते । तथान्तर्द्धानगा चेयंद्वितीयाजातहारिणी

त्वंतु क्रमेणोपभोग्यंमत्तःफलमभीप्ससि। नमांजानासिकोऽप्येवं वै चोपकृतंमया

सङ्गतिर्बालबालानां पञ्चसप्तदिनात्मकम् ।

तथापि स्निह्यसि प्रीत्या परिष्वजसि सन्ततम् ॥ १४ ॥

ततेतिवत्स!भोभद्रइत्यलीकं ब्रवीषिमाम् । पुत्रन्यवचनंश्रुत्वाक्रुद्धामाताऽब्रवीदि

नाहं त्वामुपकारार्थं वत्स! प्रीत्या परिष्वजे ।

स्वार्थो मया परित्यक्तो यस्त्वत्तो मे भविष्यति ॥ १६ ॥

इत्युक्त्वा सा तमुत्सृज्य निष्क्रान्ता सूतिकागृहात् ।

जहार तत्परित्यक्तं सा तदा जातहारिणी ॥ १७ ॥

साहृत्वातंतदाबालंपूर्वजातिस्मरंप्रिये । हैमिन्याःशयने न्यस्यद्विक्रान्तस्यमहीभृत

मत्वा स्वकीयं पुत्रं तु विक्रान्तेन महीभृता । कृतं चै नामकरणमानन्दइति विश्रुतम्

विक्रान्तस्यसुतोनीतोबोधस्यच द्विजन्मनः । चैत्रनामाकृतस्तेनसंस्कृतोवेदमन्त्रकै

तृतीयं भक्षयामास बोधपुत्रं निशाचरी । जातिस्मरोऽप्यथानन्दः कृतोपनयनस्तदा

गुरुणासमनुज्ञातंक्रियतामभिवादनम् । जनन्याःप्रागुपस्थानमित्युक्तो वाक्यमब्रवी

वन्द्या मे कतमा माता जनित्री पालिनी च वा ।

आनन्दस्य वचः श्रुत्वा गुरुर्वचनमब्रवीत् ॥ २३ ॥

नन्वियं ते महाभाग जनित्रीजनकात्मजा । विक्रान्तस्याग्रमहिषी हैमिनीनामनामत

आनन्द उवाच

चैत्रस्य प्रसवित्रीयंचैत्रोऽयंद्विजवेश्मनि । संस्कृतोब्राह्मणैर्मन्त्रैर्गिरिभद्रासुतस्त्वहम्

गुरुराह ततः कस्त्वं चैत्रः को वा त्वयोच्यते ।

ततः स कथयामास पूर्ववृत्तान्तमादितः ॥ २६ ॥

गुरुरुवाच

अतीव गहनं वत्स सङ्कटं महदागतम् । न वेद्मिकिञ्चिन्मोहेन भ्रमन्तिमम बुद्धय

आनन्द उवाच

मोहस्यावसरः कोऽत्र जगत्येवं व्यवस्थितः ।

कः कस्य पुत्रो विप्रर्षे! को वा कस्य न बान्धवः ॥ २८ ॥

अतः संसारता हन्ति संसारं प्राणिनामिह । महामोहहतं चेतश्चित्रमत्र कथं गुरो

ब्रह्मपुत्रस्य दुष्टस्य दुःसहस्य सुता भुवि । जातहारिणिकानाम परिवर्त्तयते सुतान्

मातृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि । मातृद्वयमथोप्राप्तं जातिं संस्मरतासता

सोऽहं तपः करिष्यामि चैत्रआनीयतामिति ।

ततः सुविस्मितो राजा सभार्यः सह बन्धुभिः ॥ ३२ ॥

तस्मान्निवर्त्यममतामनुमेने च तम्प्रति । चैत्रमानीय तनयं राज्ययोग्यं चकार सः

सन्मान्यब्राह्मणं येन पुत्रबुद्ध्यासपालितः । सोऽप्यानन्दस्तपस्तेपेमहाकालवनेशुभे

इन्द्रेश्वरस्य देवस्य पश्चिमे लिङ्गमुत्तमम् । भक्त्या ह्याराधयामासतपसादुष्करेणतु

तपस्यन्तं ततस्तन्तुदेवः प्राहशुचिस्मिते । किमर्थंतप्यसे वत्स!तपस्तीव्रंब्रवीमिते

मनुनाभविताभाव्यंषष्ठेन व्रजतत्कुरु । अलन्तेतपसा ! तस्मिंस्ततो मुक्तिमवाप्स्यसि

इत्युक्तो देवदेवेन तथेत्याह महामतिः । बभूव स मनुर्देवि! ब्रह्मतुल्यो महायशाः ॥

पुत्रानुत्पादयामास लिङ्गस्याऽस्य समर्चनात् ।

कृतं नाम तदा देवैरानन्देश्वरमुत्तमम् ॥ ३९ ॥

आनन्देनयतःप्राप्तासिद्धिर्देवि सुदुर्ल्लभा । अतोनामसुविख्यातमानन्देश्वरमाख्यताम्

ये पश्यन्ति विशालाक्षि आनन्देश्वरमीश्वरम् ।

ते पुत्रपौत्रसम्पन्ना भविष्यन्ति महीतले ॥ ४१ ॥

येषांक्षीणंनृणां पापं कोटिजन्मशतोद्भवम् । तेषां भवतिसाभक्तिरानन्देश्वरदर्शनात्

तदैव पुरुषो मुक्तो जन्ममृत्युजरादिभिः । यदा पश्यति देवेशमानन्देश्वरसञ्ज्ञकम्

मयोक्तं मुक्तिदं नृणामानन्देश्वरदर्शनम् । स्वर्गापवर्गदं देवमानन्दं लिङ्गमुत्तमम् ॥

अत्र देवैर्विशालाक्षि! पूजितं लिङ्गमुत्तमम् ॥ ४४ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । आनन्देश्वरदेवस्यश्रृणु त्वं कन्थडेश्वरम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-

चतुरशीतिलिङ्गमाहात्म्य आनन्देश्वरमाहात्म्यवर्णनं नाम

त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

कन्थडेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

चतुस्त्रिंशत्तमं विद्धि देवम्वै कन्थडेश्वरम् । यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते
वितस्तायास्तटेरम्ये ब्राह्मणोनिवसन्पुरा । बभूवपाण्डवोनाम दरिद्रेणातिपीडितः
ज्ञातिभिश्चपरित्यक्तो दुष्टया भार्यया तथा ।
कन्थाप्येका स्थिता यस्य सर्वस्वप्रेमधारिणी ॥ ३ ॥
तेनाहं सुतकामेन तोषितो गिरिगह्वरे । मयाऽप्युक्तं विशालाक्षिपुत्रस्तवभविष्यति
तस्य पुत्रः समुत्पन्नः कन्थामध्यादयोनिजः ।
शीतोष्णवारिणी कन्था तस्य पुत्रस्य साऽभवत ॥ ५ ॥
स च लब्धः प्रसादेन मदीयेन वरानने !। रुद्रेण च वरो दत्तः कन्थाया भविता पुनः
अथ षष्ठे गते वर्षे मौञ्जीबन्धमचिन्तयत् । तदामन्त्र्य मुनीन्सर्वान्प्रसाद्यच पुनःपुनः
नमस्कृत्य ऋषीन्सर्वान्पूजयामास भक्तितः ॥ ७ ॥
फलैर्वित्तानुसारेण मौञ्जीं तस्याप्यबन्धत । तेऽप्युक्ता मुनयःसर्वे प्रसाद्यच पुनःपुनः
दीयतामाशिषोह्यस्मैपुत्राय मुनिसत्तमाः । ममपुत्रस्यपुत्रोऽयं दीर्घायुर्जायतांचिरम्
तूष्णीम्भूताः स्थिताः सर्वे तच्छ्रुत्वा नोत्तरं ददुः ।
यदा ते नोत्तरं प्रोचुस्तदा मुनिवरः स्वयम् ॥
ध्यानेन चिन्तयामास नूनमल्पायुषं सुतम् ॥ १० ॥
इतिज्ञात्वा तु सम्मोहमगमत्सहसामुनिः । विललापस दुःखार्त्तःसुतस्नेहेनदुःखितः

वाडव उवाच

दत्तः स्वयं महेशेन ममाल्पायुः कथं सुतः । रुद्रेण च वरोदत्तः प्रसन्नेन पुरा मम ॥
मत्तुल्यवार्यः पुत्रस्ते कन्थामध्याद्भविष्यति ।

जातं च दत्त्वा ह्यल्पायुं मिथ्या त्र्यक्षस्य तद्वचः ॥ १३ ॥
पितरं दुःखितं दृष्ट्वा तूष्णींभूतोमुनिस्तदा। स बालःसहसावाक्यं बभाषेहर्षवर्द्धनम्
त्यजत भयमिदानीं यन्ममार्थे विषण्णा विनिहतनिजयत्नं प्रेतराजं करोमि ।
शृणुत मम गिरम्भोः सेश्वरा लोकपालाः पितृपतिविजयार्थं सत्प्रतिज्ञाममैषा ॥१५
अतिविषमतपोभिः शङ्करंतोषयित्वा स्वपितुरपि च भक्त्या हन्मिमृत्योर्जयाशाम् ।
किमतिशयविषादव्याकुलास्तात! सर्वेसपदि पितृपतिं तं स्वे वशे स्थापयामि॥१६
प्रयामि रुद्रं शरणं महेश्वरं देवम्वरं चाप्युमयाऽविहीनम् ।
शृण्वन्तु सर्वेमुनयः समन्तान्न मादृशो मृत्युपराभवोऽस्ति ॥ १७ ॥
तपोभिरुग्रैः शितिकण्ठपादौ प्रसाद्य मृत्युं न चिराद्विनेष्ये ।
कन्थाजवाक्यामृतलोलनेत्राः सञ्जातरोमाञ्चलसत्स्वदेहाः ॥ १८ ॥
पप्रच्छुरेनं मुनयः शिशुं तं जानासि रुद्रं परमं कथं त्वम् ।
वयं चिरं कालमुपासमानास्तपोभिरुग्रैर्व्रतसञ्चयैश्च ॥ १६ ॥
तथापि विद्मो न वयं महेशं ज्ञातस्त्वयाऽसौ कथमर्भकेण ।
ईहामहे तं किल पुत्र! सम्यक्छ्रोतुं प्रहर्षाद्भुतजातरोमाः ॥ २० ॥
ज्ञातस्त्वया कुत्र कथं महेशो महेश्वरो वै भुवनैकनाथः ॥ २१ ॥
इति तेषां वचः श्रुत्वा मुनीनां भावितात्मनाम् ।
स बालः कथयामास वृत्तान्तं पर्वतात्मजे ॥ २२ ॥
ममात्र क्रीडतः सिद्धः सिद्धिदः समुपागतः ।
विज्ञायाऽल्पायुषं मां तु वात्सल्यादब्रवीदिदम् ॥ २३ ॥
गच्छ पुत्र ममादेशान्महाकालवनोत्तमे। दक्षिणे चास्ति यल्लिङ्गमानन्देश्वरलिङ्गतः
तमाराधयशीघ्रं त्वंचिरञ्जीवीभविष्यसि । तस्योपदेशदानेनज्ञातंसम्यङ्महेश्वरात्
नान्यो देवोऽस्ति लोकेषु सत्यं सत्यं मुनीश्वराः !।
तस्मादद्यैव यास्यामि महाकालवने शुभे ॥ २६ ॥
लिङ्गमाराधयिष्यामि विषादस्त्यज्यतामिह ।

तस्य तद्वचनं श्रुत्वा तेन सार्द्धं महर्षयः ॥ २७ ॥
पिता चविस्मितोदेवि!सर्वएवसमागताः । देवमाराधयामासबालःकालजिघांसया
लिङ्गमध्यात्ततोवाणीनिःसृतापर्वतात्मजे । अहोतुष्टोऽस्मितेवत्सकंकामंप्रददाम्यहम्

बाल उवाच

यदितुष्टोऽसिमेदेवयेत्वांपश्यन्तिशङ्कर !। पापकन्थाविनिर्मुक्तास्तेसन्तुचिरजीविनः
बालस्यभाषितंश्रुत्वालिङ्गेनोक्तंयशस्विनि । येचमांपूजयिष्यन्तिश्रद्धयापरयायुताः
ते भविष्यन्ति सततं जरामरणवर्जिताः ॥ ३१ ॥
लप्स्यन्ते परमान्कामान्भविष्यन्ति गणोत्तम !।
पूज्याः सर्वेषु लोकेषु सर्वालङ्कारभूषिताः ॥ ३२ ॥
एवंलब्धवरः कन्थः प्राञ्जलिः समुपस्थितः । लिङ्गेनोक्तः प्रसन्नेन भूयो वरयसुव्रत!
वरो वै दुर्लभो लोके देवदानवगुह्यकैः । मयावतारितोयस्मान्नास्त्यदेयंतवाधुना ॥
बालेनोक्तो महादेव यदि देयो वरः पुनः । मन्नाम्नादेवतेख्यातिर्भूयात्त्रिभुवनेभुवि
एवमस्त्वितिलिङ्गेन प्रोक्तंतुष्टेनपार्वति !। तदाप्रभृति देवेशो विख्यातः कन्थडेश्वरः
यस्य दर्शनमात्रेण चिरायुर्जायते नरः ॥ ३६ ॥
यः समीक्षति तल्लिङ्गं कन्थडेश्वरमीश्वरम् ॥ ३७ ॥
पापकन्थाविनिर्मुक्तोमुक्तियास्यतिगौरिसः । पुण्यंयशस्यंगेयंतल्लिङ्गंपापप्रणाशनम्
पुनाति पातकान्सर्वान्मम नामानुकीर्त्तनात् ॥ ३८ ॥
तेऽधन्याः पुरुषालोके तेषांजन्मनिरर्थकम् । यैर्न दृष्टोमहाकालेदेवोऽसौकन्थडेश्वरः
एष तेकथितोदेवि ! प्रभावः पापनाशनः । कन्थडेश्वरदेवस्य इन्द्रेश्वरमथो शृणु
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कन्थडेश्वरमाहात्म्यवर्णनंनाम
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः

इन्द्रेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

पञ्चत्रिंशत्तमं देवमिन्द्रेश्वरमनुत्तमम् । महासिद्धिप्रदंदेविब्रह्महत्याविनाशनम् ॥ १ ॥
आसीत्प्रजापतिस्त्वष्टा तस्य पुत्रः कुशध्वजः ।
स्वकर्मनिरतो दान्तो वासवेन निपातितः ॥ २ ॥
तस्य पुत्रं हतं श्रुत्वा त्वष्टा क्रुद्धः प्रजापतिः । अवलुञ्च्यजटामेकामिदं वचनमब्रवीत्
अद्यपश्यन्तु मे वीर्यं त्रयोलोकाःसदेवताः । स च पश्यतुदुर्बुद्धिर्ब्रह्महा पाकशासनः
स्वकर्मनिरतो येन मत्सुतो विनिपातितः ।
इत्युक्त्वा कोपरक्ताक्षो जटामग्नौ जुहाव ताम् ॥ ५ ॥
ततोवृत्रःसमुत्तस्थौज्वालामालासमाकुलः । महाकायोमहादंष्ट्रोभिन्नाञ्जनचयप्रभः
इन्द्रशत्रुरमेयात्मा त्वष्टुस्तेजोऽभिबृंहितः । अहन्यहनिसोऽवर्द्धदिषुपातंमहाबलम्
वधायचात्मनो दृष्ट्वा वृत्रं शक्रोमहासुरम् । चिन्तयामाससहसाकिं कृतं सुकृतं भवेत्
एतस्मिन्नन्तरे प्राप्तो वृत्रो बलवताम्वरः । ददर्श वासवं तत्र देवैः सार्द्धं वरानने !॥
दैत्यो वृत्रो महाकायश्चक्रे सङ्ग्राममुल्बणम् ।
नानाशस्त्रास्त्रसङ्क्षोभं भटसङ्घट्टसङ्कटम् ॥ १० ॥
छिन्नभिन्नतनुत्राणक्रोधरक्तधरातलम् । लूनाननाब्जप्रकरं करपल्लवदुर्गमम् ॥ ११ ॥
कबन्धसङ्घघटनं घटितामरसैनिकम् । विकीर्णाभरणस्फीतस्फुरद्योधाङ्गभूषणम्
कल्लोलरुधिरोद्गारपाटलीकृतदिङ्मुखम् । तस्मिन्रणेमहाभीमेदेवान्भित्त्वासगुह्यकान्
वासवं बन्धयित्वा तु स्वर्गलोकं जगाम ह । राज्यंचकारनिःशङ्कोनिःसपत्नंवरानने
ततस्तुबद्धे देवेन्द्रे बृहस्पतिरुदारधीः । आजगाम तमुद्देशं यत्र बद्धः शतक्रतुः ॥ १५
दृष्ट्वा तथाविधं शक्रमाशीर्भिरभिनन्द्य च । बन्धनान्मोचयित्वातु प्रोवाचेदंवचस्तदा

अनुकूलो न कालोऽयं सुरेशस्य तवाधुना । उद्योगःसुमहान्दृष्टःसञ्जातश्चासुरद्विषाम्
दृष्टा हि प्रवराः सर्वे मया तत्र महासुराः ॥ १७ ॥
एकैकोऽपि विजेतुं त्वां शक्तः स्यादिति मे मतिः ।
न तादृक्सङ्गमः शक्र! कदाचित्सुरविद्विषाम् ।
दृष्टो वापि श्रुतो वापि यादृशो ह्यवलोकितः ॥ १८ ॥
बृहस्पतिवचःश्रुत्वा शक्रः सम्भ्रममागमत् । ध्यात्वामुहूर्त्तंप्रोवाच बृहद्बुद्धेबृहस्पते
किमत्र प्रतिकर्त्तव्यं वद तावद् बृहस्पते । बहवोबलवन्तश्च दानवाः स्वल्पकैर्दिनैः॥
मत्सकाशं समेष्यन्ति स च वृत्रो महाबलः ॥ २० ॥
इतिशक्रवचःश्रुत्वा बृहस्पतिरुवाचतम् । उपायः क्रियतां तूर्णं गच्छ शक्र ममाज्ञया
महाकालवने रम्ये खण्डेश्वरस्यदक्षिणे । सर्वसम्पत्करं लिङ्गं विद्यते तत्र वासव
तदाराधययत्नेन तत्तेकामं प्रदास्यति । बृहस्पतिवचःश्रुत्वा शक्रःशीघ्रतरं गतः ॥
महाकालवनेदेवि! दृष्ट्वालिङ्गमनुत्तमम् । स्तुतिं चकार सहसा भक्तिनम्रात्मकन्धरः
नमोदेवाधिदेवाय शङ्कराय वृषाय च । काम्याय बहुरूपाय व्यालयज्ञोपवीतिने ।
वरेण्याय नमोनित्यं नमस्ते सर्वकामद !॥ २५ ॥
आद्यः प्रजासृष्टिकरस्त्वमेव कालः प्रजाः संहरसि त्वमेव ।
अपाम्पतिर्भूतपतिस्त्वमेव धनेश्वरस्त्वं दहनस्त्वमेव ॥ २६ ॥
चन्द्रश्च सूर्यः पवनस्त्वमेव धाता विधाता परमः पुराणः ।
जलाशयस्त्वं वरुणस्त्वमेव शैलोत्तमस्त्वं भुजगेश्वरश्च ।
डिण्डिर्महाकाल वृषस्त्वमेव विनायको गुह्यवरस्त्वमेव ॥ २७ ॥
इतीरितां स्तुतिं श्रुत्वा लिङ्गेनोक्तः शतक्रतुः ।
गच्छ शक्र !ममादेशान्मत्तेजोबृंहितो रणे ।
हनिष्यसि न सन्देहो वृत्रं रिपुविदारण !॥ २८ ॥
तस्यलिङ्गस्य माहात्म्यादपांफेनेन पार्वति । जघानऽमरेवृत्रं पश्यतां त्रिदशद्विषाम्
निहत्य दानवान्पश्चाल्लीलया रणकर्कशः । उवाचेन्द्रस्तदा देवान्हतोवृत्रोमहारणे ॥

त्रैलोक्याध्यक्षतां प्राप्ता भवन्तो मत्पराक्रमात् ।
एवमुक्तास्तु शक्रेण ते देवाविस्मयान्विताः ॥ ३१ ॥
अस्य देवस्य माहात्म्याद्धतो वृत्रो महासुरः ।
शरीरे च स्थिताः पापा दर्शनात्सङ्क्षयं गताः ॥ ३२ ॥
इन्द्रेणाराधितोयस्माद्देवदेवोमहेश्वरः । तस्मादिन्द्रेश्वरोनामख्यातोभुविभविष्यति
दर्शनादस्य लिङ्गस्य पुरीमिन्द्रस्य शोभनाम् ।
पापिनोऽपि गमिष्यन्ति सर्वपातकवर्जिताः ॥ ३४ ॥
यःपश्यतिनरोनित्यं श्रीइन्द्रेश्वरसञ्ज्ञकम् । समुक्तःपातकैःसर्वैर्दिविमोदिष्यतेचिरम्
इन्द्रेणाराधितं लिङ्गं भक्त्या यः पूजयिष्यति ।
सयाति वै परं स्थानं दिव्यकल्पचतुष्टयम् ॥ ३५ ॥
येन चेन्द्रेश्वरोदेवो भक्त्या सम्यक्प्रपूजितः । तेनविष्णुप्रभृतयो वयंसर्वेसवासवाः
मुनयो लोकपालाश्च पूजिताः स्युर्न संशयः ॥ ३७ ॥
इत्युक्तः स सुरैः शक्रो वैकुण्ठाद्यैःसमन्ततः । तैरेवसहितो देवोजगामाथत्रिविष्टपम्
इन्द्रेश्वरस्य देवस्य प्रभावः कथितस्त्वयम् ।
मार्कण्डेयेश्वरं देवं शृणु पार्वति ! साम्प्रतम् ॥ ३६ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्य इन्द्रेश्वरमाहात्म्यवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

मार्कण्डेयेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

मार्कण्डेयेश्वरं विद्धि षट्त्रिंशत्तममीश्वरम् । यस्य दर्शनमात्रेण पुत्रवाञ्जायते नरः ॥
ब्रह्मवंशसमुत्पन्नो मृकण्डोनाम तापसः । वेदाध्ययनसम्पन्नः स चापुत्रो बभूव ह ॥
पुत्रार्थं चिन्तयामास कथं पुत्रो भवेदिति । अपुत्रस्यकुतो लोक इति वेदेषु पठ्यते
तस्मात्तपःकरिष्यामियेन मे तनयोभवेत् । एवंसञ्चिन्त्यबहुधा स जगामहिमालयम्
चकारवसतिंचापि तपसेभावितात्मवान् । वायुभक्षोऽम्बुभक्षश्चनिराहारोर्ध्वपादकः
शाकमूलफलाहारः पर्णाश्येकद्विपर्णभुक् । एवमादीनि चान्यानि तपांसिसुबहून्यपि
चकारस मुनिस्तत्र वर्षाणि द्वादशैवतु । न तुष्टोऽहं तदा देवि! तपसा दुष्करेण तु

ततो ज्ञात्वा मतिं तस्य विज्ञप्तोऽहं तदात्वया ।
करोत्येव तपः क्रूरं पुत्रहेतोर्मुनिर्महान् ॥ ८ ॥

तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् । तपसादुष्करेणैव क्षुभितानाकवासिनः

समुद्राः क्षुभिताः सर्वे चन्द्रादित्यौ तथैव च ।
ऋषयो विस्मृतिं प्राप्ताः कम्पेते चापि रोदसी ॥
अकालप्रलयो देव भविष्यति न संशयः ॥ १० ॥

मुनयेतन्मृकण्डायपुत्रो वै दीयतामिति । मयाप्रोक्तं वरारोहे पुत्रमिच्छत्ययोनिजम्
अक्षयं सुविशालाक्षि सहस्राक्षमिवापरम् । चन्द्राभं चन्द्रवदनं चन्द्रवद्भुवनप्रियम् ॥
नीलोत्पलदलश्यामं नीलोत्पलदलेक्षणम् । विशालचारुजघनं चारुकुण्डलमण्डितम्

पुत्रमिच्छति देवेशि! मृकण्डोऽयं महामुनिः । १२ ॥

त्वयाप्युक्तं पुनर्देवि कारुण्याद्भक्तिवत्सले । न ददासि मुनेः पुत्रं तप्यतो विषमं तपः
फलस्यदातातपसांकथंत्वंगीयसे बुधैः । कस्त्वांनुशरणं गच्छेल्लोकानांसम्भवंभवम्

करोषि सर्वदैत्यानां सर्वदेवाकुलाकुलम् । त्वयाहं सुचिरं देवं सत्कृता करुणाकर
नान्यो मामनुकम्पार्थं प्रयच्छेत्प्रवरं वरम् । सत्वंसर्वजगन्नाथ प्रभुः कर्त्ताप्रशासिता

हेतुः स्वामी महेशानो दयालुर्भक्तवत्सलः ।
सर्वेश्वर! स्तुतोऽभीष्टं किं न विप्राय दीयते ॥ १८ ॥

तपसा क्षीणपापस्य ब्रह्मत्वेभावितात्मनः । अस्यपुत्रप्रदानं त्वं कुरु मद्वचनाच्छिव
मया त्वं वर्णिता देवि स्नेहाक्षरपदैः शुभैः । लोलपङ्कजपत्राक्षि गौरि भूधरगात्रजे
स्कन्दमातः कलापूर्णचन्द्रबिम्बनिभानने । कृशोदरि विनिःस्पृष्टचामीकरनिभद्युते

त्वयोक्तं प्रकरिष्यामि वाक्यं द्विरदगामिनि !।
त्वं सिद्धिःसाधकासाध्यं त्वं क्रियाप्रक्रमाश्रया ॥ २२ ॥

त्वं मायाश्रीर्द्युतिः श्रीमच्छ्रद्धारुचिरसंततिः । कृत्वामानंबहुविधं मयैव सहसुन्दरि
भ्राजसे विविधाकारा मोहयित्वाखिलंजगत् । त्वयाप्युक्तंपुनर्देविक्रियतांतुवचोमम
मुनयेऽस्मै तपः क्षीणसर्वगात्राय साम्प्रतम् । वरःप्रदीयतामस्मै ब्राह्मणायमहेश्वर!॥
मयाप्युक्तं विशालाक्षि! श्रूयतां वचनंमम । असौ गच्छतुविप्रेन्द्रोमहाकालवनोत्तमे
पत्तनेश्वरपूर्वे तु तत्रास्ते लिङ्गमुत्तमम् । पुत्रप्रदं विशालाक्षि महापातकनाशनम् ॥
मदीयं वचनं श्रुत्वा त्वयाप्युक्तो द्विजोत्तमः । महाकालवनं गच्छ पुत्रार्थमृषिसत्तम

तत्र लिङ्गं समाराध्य लप्स्यसे पुत्रमुत्तमम् ॥ २८ ॥

त्वया सम्प्रेरितो विप्रस्तथेति कृतनिश्चयः । आशया परयायुक्तः पुत्रकामोजगामसः
तत्र दृष्ट्वा महालिङ्गं पुत्रदं पापनाशनम् । भक्त्या संसेवयामास तपसादुष्करेण तु ॥
अथकेनापि कालेन निःसृतोऽहं त्वयासह । लिङ्गमध्याद्वरारोहे सचप्रोक्तोद्विजोत्तमः

शर्वोऽहमिति जानीहि ब्रूहि किं करवाणि ते ।
आवां पुरा प्रसन्नौ ते ज्ञातं तव विचेष्टितम् ॥ ३२ ॥

यमिच्छसि वरं ब्रह्मंस्तदद्य प्रददामिते । मया प्रोक्तःप्रसन्नेन मुनिः परमविस्मितः
प्रह्वः प्राहसुहृदये स हृष्टो मुनिसत्तमः । अपत्यहेतोर्देवेशौ किमलभ्यं भवेन्मम ॥

मया प्रोक्तस्तदा देवि! मृकण्डो मुनिसत्तमः ।

अयोनिजस्ते तनयो मानुषो वै भविष्यति ।

ऐश्वर्यज्ञानसम्पन्नो दीर्घायुः सर्ववित्सुधीः ॥ ३५ ॥

एतस्मिन्नन्तरे देवि! प्रादुर्भूतोमहातपाः । पुत्रः परमधर्मात्मा मार्कण्डेयो महामुनिः

स जातमात्रो धर्मात्मा तत्रैव तपसिस्थितः । देवमाराधयामास सतुष्टोऽथवरंददौ

त्वयाऽहं जातमात्रेण तपसा तोषितोयतः ।

तस्मात्ख्यातिं गमिष्यामि त्वन्नाम्ना द्विजसत्तम ॥ ३८ ॥

येमांपश्यन्तिविप्रेन्द्रभक्तयापरमयायुताः । प्राप्नुवन्तिगतिंनित्यंते सदानन्ददायिनीम्

प्रसंगाद्येगमिष्यन्ति तेसदादुःखवर्जिताः । देवदेवं समाराध्यमोदिष्यन्तिहिते नराः

त्र्यक्षागणेश्वराःसिद्धाःसिद्धगन्धर्वसेविताः । तेभविष्यन्ति सततंममभक्ताश्चयेनराः

ये मां संपूजयिष्यन्ति हृद्यैः पुष्पैः सुगन्धिभिः ।

दीर्घायुषो भविष्यन्ति सदा दुःखविवर्जिताः ॥ ४२ ॥

इत्युक्ते तेन लिङ्गेन मार्कण्डेयो महातपाः । तपश्चचार तत्रैव महाकालवने स्थितः ॥

प्रभावः कथितो देवि! मार्कण्डेयेश्वरस्य च ।

शिवेश्वरस्य देवस्य माहात्म्यं शृणु साम्प्रतम् ॥ ४४ ॥

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये मार्कण्डेयेश्वरमाहात्म्य-
वर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

———

सप्तत्रिंशोऽध्यायः

शिवेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

सप्तत्रिंशत्तमं विद्धि शिवेश्वरमनन्तकम् । यस्य दर्शनमात्रेण जायन्ते सर्वसम्पदः ॥

राजा रिपुञ्जयोनाम ब्रह्मकल्पे पुराऽभवत् । महाकालवने रम्ये प्रजापालनतत्परः ॥

देवपूजां व्रतं दानं ध्यानं स्वाध्यायसत्क्रियाम् ।

प्रजापालनकं कृत्वा न स जानाति किञ्चन ॥ ३ ॥

स प्रजाः पालयामासपुत्रवत्परिपालिताः । प्रजास्ताःसुखसंवृद्धाजरामृत्युविवर्जिताः

पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ।

तस्यैव तेजसा व्याप्तं महाकालपुरं प्रिये !॥ ५ ॥

एतस्मिन्नन्तरे पृथ्वीं तस्मिञ्छासतिपार्वति । महाकालवनंदेविस्वपुरंविहितंमया

विना चोज्जयिनीं गन्तुं न रतिं प्राप कुत्रचित् ॥ ६ ॥

तदा मया गणेशस्तु शिवसञ्ज्ञो गणाग्रणीः ।

चिन्तितस्तत्क्षणात्प्राप्तः किं करोमीत्युवाच ह ॥ ७ ॥

मयाप्युक्तो गणेशोहि गच्छ पुत्र मम प्रियम् । महाकालपुरं व्याप्तं राज्ञारिपुञ्जयेनहि

इत्युक्तः स मयादेवितथेत्युक्त्वाकृताञ्जलिः । गतोऽसौमानुषेलोकेममाज्ञाहर्षिताननः

गते शिवगणे देविसन्तुष्टोऽहंशुचिस्मिते । युक्तिज्ञानवृतोदक्षःप्रभोर्भृत्योहिदुर्लभः

ततः सभिक्षुरूपेण बह्वौषधिपरिग्रहः । गृहीत्वादुन्दुभिं स्कन्धे वचनं चेदमब्रवीत्

कश्च भूतविषग्रस्तो नानादोषैःसमाश्रितः । कस्य कोव्याधिरत्युग्रोयमहम्प्रशमंनये

कोऽपुत्रःपुत्रवानस्तुमन्मन्त्रबलमाश्रितः । वैद्योऽस्मि सर्वयुक्तिज्ञःसर्वकामप्रदायकः

तस्यवाक्यंसमाकर्ण्यकौतूहलसमन्वितः । सवृद्धबालनारीकोजनस्तमभिजग्मिवान्

तेषां स नाशयामास व्याधिं दुर्जयमप्यति । तेचतस्मैसुमहतींपूजांचक्रुःसुहर्षिताः

हेमरत्नाम्बरधनैर्धान्यग्रामपुरादिभिः ॥ १५ ॥

एवं स न्यवसत्तत्र वर्षाणि च चतुर्दश । नृपतेरन्तरप्रेक्षी नचान्तरमवापसः ॥ १६

अहोऽतिदुष्करो राजा अहो लोकपरायणः ।

अहोतेजोनिधिर्वीरो दुर्जयोऽसौ महामतिः ॥ १७ ॥

एवं सचिन्तयंस्तत्र भिक्षुरूपीशिवोगणः । जीर्णोद्यानलताजालगहनेसम्वृतःस्थितः

अत्रान्तरे तु नृपतेस्तस्य लोकव्रतस्य तु । महिषीनिर्जरा राज्ञःप्राणेभ्योपिगरीयसी

रूपेणाप्रतिमा लोके सा चापुत्रा सुतार्थिनी ।

सपत्नीबहुला देवी श्रुत्वा भिक्षुं समाश्रिता ॥ २० ॥

सर्वकामप्रदंज्ञात्वानागराणांसकौतुकम् । स्वां सखींप्रेषयामाससुनन्दांनामभामिनी

भिक्षोरायतने गुप्तमन्तःपुरमतन्द्रिता । तया चासादितो भिक्षुर्विचिन्त्यनगरंतदा

उवाच चिन्तापरमं भिक्षुं भिक्षासमन्वितम् ॥ २२ ॥

प्रणम्यप्राञ्जलिर्भूत्वाकार्यार्थंविगतव्यथा । भगवन्महिषीराज्ञःप्राणेभ्योऽपिगरीयसी

वन्ध्या पुत्रार्थिनी देवी गुप्तं त्वां द्रष्टुमिच्छति ॥ २३ ॥

भवान्कृपाकरः प्रायः प्रजानामीहितप्रदः । एवं श्रुत्वा शिवगणो लब्ध्वारन्ध्रमुवाच ह

भिक्षुरुवाच

भद्रे! केयं तव मतिर्विपरीतप्रलापिनी । अविज्ञातो नरपतेर्गृहमेहीति भाषसे

अविज्ञातः पुरे दृष्टः साहसी पुरुषो भवेत् ॥ २५ ॥

एवं मत्वा व्रज क्षिप्रं स्वमेवान्तःपुरं शुभे । नाहं तत्रागमिष्यामि यावन्नृपतेर्वचः

सा तु तस्य वचः श्रुत्वा भिक्षोः क्षुभितमानसा ।

जगामान्तःपुरं तूर्णं देव्यै तच्च न्यवेदयत् ॥ २७ ॥

सखीवचस्तु सा श्रुत्वा देवी दीना उवाच ताम् ।

सुनन्दे! क उपायोऽस्ति राजा येन प्रवर्त्तते ।

भिक्षोरानयने क्षिप्रं यावन्नासौ व्रजेत्क्वचित् ॥ २८ ॥

उवाचसातां युक्त्यैवंसुनन्दायुक्तभाषिणी । त्वंतस्यवल्लभाराज्ञःप्राणेभ्योपिगरीयसी

तस्मादस्वथचित्तत्वं राज्ञः स्वंसम्प्रदर्शय । हेतुना तेनराजा च वाक्यंतवकरिष्यति

तस्मिन्नेव काले तु देव्या दर्शनलालसः । जगामान्तःपुरं राजा प्रियांदीनांददर्शह

तामपृच्छत्ततो राजा स्नेहार्द्रीकृतमानसः ॥ ३१ ॥

राजोवाच

किमिदं देवि! ते रूपं विमनस्केव भाषसे । भग्नासि केनदुःखेनकस्यापकृतमीदृशम्

नृपस्य वचनं श्रुत्वा राज्ञीवचनमब्रवीत् । न पुत्रान्नृप मेसन्तितेज मे नास्तिनिर्वृतिः

क्रीडनं पीडनायैव तेषां ये पुत्रवर्जिताः । अपुत्रा जगतो दीनादुःखिताः पुत्रवर्जिताः

अपुत्रे च गतिर्नास्ति सुतापुत्रविवर्जिते ॥ ३४ ॥

सुखिनस्तेजनालोकेये बालंपांसुभूषितम् । परिष्वजन्तिस्वसुतमस्फुटाक्षरभाषकम्

अनेन कारणेनास्मि निर्वेदं परमं गता । उपायो हि मया दृष्टःपुत्रार्थे ममसाम्प्रतम्

इह भिक्षुः समायातो देवरूपी सनातनः । तस्य चाव्याहता शक्तिःश्रूयतेसर्ववस्तुषु

सर्वोबालो जनश्चात्र शरणं यस्य गच्छति । तस्यभिक्षोःप्रसादेनसुतवत्योवयंनृप

भविष्यामोऽत्र सन्देहो न मे मनसि वर्त्तते ॥ ३८ ॥

तस्याः स वचनं श्रुत्वा जीर्णोद्यानंजगाम ह । प्रिययासहितोराजातंचभिक्षुं ददर्शह

दृष्टमात्रो नृपतिना भिक्षुर्लिङ्गत्वमागतः । दृष्ट्वा सुमहदाश्चर्यं भक्तिनम्रोमहीपतिः ॥

पूजयामास विधिवत्तल्लिङ्गं भिक्षुरूपकम् ॥ ४० ॥

अपुत्रोऽस्मीत्युवाचेदं धन्येयंमहिषी मम । देहि मे तनयं देव शिवोऽभवान्महेश्वरः

इत्युक्तो राजसिंहेन भिक्षुर्लिङ्गाकृतिस्तदा । प्रत्युवाच महीपालं पुत्रस्ते भवितानृप

ततःप्रभृति राजाऽसौ सकलत्रो महामतिः । सर्वभावेन तं देवं जगाम शरणंमुदा ॥

देवदेवस्य माहात्म्यात्पुत्रो जातो महाबलः ।

धर्मात्मा च यशस्वी च सार्वभौमो गुणाधिकः ॥ ४४ ॥

अथाहं मन्दराद्देवि कौतुकात्तुसमागतः । लिङ्गाकारंगणंदृष्ट्वा राजानं सेवकं तथा ॥

योगैश्वर्येण च मयाकृतस्मै पुरमात्मनः । नानारत्नप्रभोद्द्योतं नानासिद्धिनिषेवितम्

तच्छिवं शाश्वतं स्थानं दत्तं देवि! तदा मया ॥ ४६ ॥

मार्कण्डेयेश्वराद्देवादुत्तरे वरवर्णिनि! । तदाप्रभृति देवोऽसौ शिवेश्वरइति स्मृतः ॥
येऽर्चयिष्यन्तिसततंशिवेश्वरमनुत्तमम् । निर्धूतसर्वपापास्तेभविष्यन्तिगणोत्तमाः
विदित्वार्भगुरंलोकंयेद्रक्ष्यन्तिशिवेश्वरम् । अन्तकालेप्रदास्यामि तेषांज्ञानमनुत्तमम्
मोक्षंसुदुर्लभंमत्वासंसारंचातिभीषणम् । अपुनर्भवहेतुत्वात्संसेव्योऽसौशिवेश्वरः

सर्वावस्थोऽपि यो मर्त्यः संश्रयेत्तं शिवेश्वरम् ।
स तां गतिमवाप्नोति यज्ञैर्दानैर्हि या गतिः ॥ ५१ ॥

आख्यानम्प्रयतोमर्त्त्योयःइदंश्रावयेच्छुचिः । पठेद्वावाचयेद्वापिसमुच्येत्सर्वकिल्बिषैः
एषते कथितोदेवि प्रभावः पापनाशनः । शिवेश्वरस्य देवस्य कुसुमेशमतः शृणु ॥

इति श्रीस्कान्देमाहापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये शिवेश्वरमाहात्म्यवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

———

अष्टत्रिंशोऽध्यायः

कुसुमेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

अष्टत्रिंशत्तमं विद्धि कुसुमेश्वरसञ्ज्ञकम् । देवं स्वर्गप्रदंदेवि महापातकनाशनम् ॥
पुरा वैवस्वते कल्पे प्राप्ते वाराहसञ्ज्ञके । प्रादुर्भूते विशालाक्षि कैलासादहमागतः
महाकालवनेरम्ये रममाणस्य पार्वति !। त्वया सार्द्धं ममाक्षैश्च प्रादुरासीन्महास्वनः
पृष्टोऽहञ्चतदाश्रुत्वाशब्दंचातीवदुःसहम् । शब्दोत्पत्तिर्मयादेवि कथितासात्वदग्रतः
एतेगणेशाः क्रीडन्ति मध्येवै वीरकोगणः । कुसुमैर्भूषितोऽत्यर्थंममातीवसुवल्लभः
कुसुमैर्हन्यतेऽत्यर्थं पूज्यते कुसुमोत्करैः । स एव वीरको देवि! सदा मे हर्षदायकः
नानाश्चर्यगुणाधारो गणेश्वरशतार्चितः । मदीयं वचनं श्रुत्वा त्वयाप्युक्तं वरानने !॥

न दृश्यते विना पुण्यैः पुत्रस्याननपङ्कजम् ।
ईदृशस्य सुतस्यापि ममोत्कण्ठा महेश्वर !॥ ८ ॥

कदाहमीदृशं पुत्रं द्रक्ष्याम्यानन्ददायकम् । मया तव वचःश्रुत्वा हसित्वाच पुनःपुनः

प्रोक्तं पार्वति! पुत्रोऽयं प्रदत्तो वीरकोऽधुना ॥ ९ ॥

एष एव सुतस्तेस्तु नयनानन्ददायकः । त्वया मात्रा कृतार्थस्तु वीरकः कुसुमार्चितः
मदायं वचनं श्रुत्वा प्रेषिता विजया त्वया । दत्तो हरेण मे पुत्रो विजये शीघ्रमानय

विजयोवाच गणपं गणमध्ये च वर्त्तिनम् ।
एहि वीरक! चापल्यात्त्वया देवः प्रकोपितः ॥
किमुन्मत्तवदत्यर्थं नृत्यरागेण मोहितः ॥ १२ ॥

इत्युक्तो भयसन्त्रस्तःकुसुमैर्भूषितस्तदा । त्वत्समीपं समायातोविजयानुगतःशनैः
भूषितं कुसुमैर्दृष्ट्वा भयत्रस्तञ्च वीरकम् । त्वयाचाकारितो देवि! गिरा मधुरवर्णया

एह्येहि जातोऽसि मे पुत्रकस्त्वं देवेन दत्तोऽधुना वीरकोऽसि ।
उक्तवत्येवमङ्के निधायाथ तं पर्यचुम्बःकपोले कलम्वादिनम् ॥ १५ ॥
मूर्द्ध्न्युपाघ्राय सम्माज्र्य गात्राणि सा भूषयामास दिव्यैः स्वयम्भूषणैः ।
किङ्किणीमेखलानूपुरैः सन्मणीनिष्ककेयूरहारोत्करैः सद्गुणैः ॥ १६ ॥
कोमलैः पल्लवैश्चित्रितैश्चारुभिर्दिव्यमन्त्रोद्भवैस्तस्य शुभ्रैस्ततः ।
भूतिभिश्चाकरोमिश्रसिद्धार्थकैरङ्गरक्षाविधींस्तस्य तुष्टा सती ॥ १७ ॥
एवमाधाय चोवकथ कृत्वा स्रजं मूर्ध्नि गोरोचनापत्रभङ्गोज्ज्वलैः ।
वत्स गच्छाऽधुना क्रीड सार्द्धं गणैरप्रमत्तो यथा बालचर्या शनैः ॥ १८ ॥
सोऽपि सिद्धध्याकुले गण्डशैले मिलद्रत्नजाले बृहच्छालतालाकुले ।
क्षणं फुल्लमालातमालालिमाले क्षणं वृक्षमूले विलोलालिमाले ॥ १९ ॥
क्षणं स्वल्पपङ्के जले पङ्कजाले क्षणं वृक्षखण्डे शुभे निष्कलङ्के ।
परिक्रीडते बालको वै विहारी गणेशाधिपो देवतानन्दकारी ॥ २० ॥

एवं विक्रीडतस्तस्य वीरकस्य गणस्य च ।

सन्ध्या तमोमयी प्राप्ता विज्ञप्तोऽहं त्वया प्रिये !॥ २१ ॥
ऐश्वर्यं दीयतामस्य मम पुत्रस्य शङ्कर !। शरीरार्द्धं गणेशत्वं लोकपालत्वमग्रतः ॥
लिङ्गत्वमक्षयत्वं च स्थानं दिव्यं सुदुर्ल्लभम् ।
वन्द्यमानं यथा देव! सिद्धगन्धर्वकिन्नरैः ॥
ब्रह्मेन्द्रवरुणादित्यलोकपालेश्वरेश्वरैः ॥ २३ ॥
एतैरेवगणैःसार्द्धं स्तूयमानं महात्मभिः । अलङ्कृतोमयायस्मात्कुसुमैर्विविधैःशुभैः
कुसुमेश्वरसञ्ज्ञस्तुतस्मात्ख्यातोभवत्विति । मयाप्युक्तंविशालाक्षिवीरकंदयितंमम
मत्प्रभावसमं दिव्यं सेवितं गणपैः सदा । श्रृणु गन्धर्वगीतानां माधुर्यममृतोपमम्
पश्य किन्नरनारीणां गायन्तीनांमनोरमम् । पश्याप्सरःसमूहस्य नृत्यमेतन्निरन्तरम्
विद्याधरैः परिवृतः कुसुमेशो वरानने !। विशेषतो मया देवि! प्रथमं प्रमथेश्वरः ॥
कुसुमेश्वरतां नीतो यदा कुसुममण्डितः ॥ २८ ॥
स्थानंदत्तं विशालाक्षि शिवलिङ्गस्यचोत्तरे । वरोदत्तोबहुमतो दुष्प्राप्यस्त्रिदशैरपि
ये त्वां द्रक्ष्यन्ति गणप! कुसुमेश्वरसञ्ज्ञकम् । न तेषां जायतेपापं पद्मपत्रेयथाजलम्
कुसुमैरर्चयिष्यन्ति ये नराः कुसुमेश्वरम् ।
मत्स्थानं ते समासाद्य मोदिष्यन्ति गतव्यथाः ॥ ३१ ॥
योऽप्येकं दिवसं मर्त्यस्त्वां पश्यति समाहितः ।
स मुक्तः पातकः सर्वैर्मम लोकं गमिष्यति ॥ ३२ ॥
यः पूजयति भावेन कुसुमैः कुसुमेश्वरम् । स प्राप्स्यतिपरंस्थानं पुनरावृत्तिदुर्लभम्
एवमादिवरैः पुष्टः कृतोऽयं कुसुमेश्वरः । कृतकृत्यो गणो देवि! लिङ्गेनेश्वरतांगतः
कुसुमेश्वरदेवस्य प्रभावः कथितस्त्वयम् ।
अक्रूरेशस्य देवस्य श्रूयतां तदनन्तरम् ॥ ३५ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
कुसुमेश्वरमाहात्म्यवर्णनं नामष्टत्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

अक्रूरेश्वरमाहात्म्यवर्णनम्

हर उवाच

अक्रूरेश्वरमेकोनचत्वारिंशत्तमं श्रृणु । यस्य दर्शनमात्रेण सुबुद्धिर्जायते नृणाम् ॥ १
पुरा त्वयैव कल्पादौ परया शक्तिरूपया । कृतं कृत्स्नंवरारोहेत्रैलोक्यं सचराचरम्
ततस्त्वं संस्तुता देवैः सकिन्नरमहोरगैः । प्रदक्षिणांप्रकुर्वन्तिगणानानाविधास्तुते
नमस्कारंप्रकुर्वन्तिस्तोत्रं कुर्वन्तिचापरे । नकरोतिनमस्कारमेको भृङ्गिरिटिस्तदा
क्रूरां बुद्धिं समासाद्य गर्वेणातीव गर्वितः ॥ ५ ॥
एको देवोमहादेवः स्त्रियाकिमनयामम । यदानायाति ते पार्श्वंतदा प्रोक्तस्त्वयागतः
कस्मान्न कुरुषे पूजां प्रदक्षिणमथोस्तुतिम् । मद्भक्तोमदधीनोऽसिममपुत्रोमयाकृतः
इत्थं भूतगणेश! त्वं किं वै लौल्येन वर्त्तसे ॥ ७ ॥
इति भृङ्गिरिटिः श्रुत्वाक्रुद्धस्त्वामाह गर्वितः । नाहंपार्वति ते पुत्रःपुत्रोऽहंशङ्करस्यतु
एष एव च मे माता एषएव च मे पिता । एवं रात्रिदिनं यामि शरणं परमेष्ठिनम् ॥
त्वमप्यस्यैवशरणंननु पार्वतिसंस्थिता । यदि चत्वामहंवन्देतद्वन्देसकलान्गणान्
इति भृङ्गिरिटेः श्रुत्वा वाक्यं कुपितया त्वया ।
तस्योक्तं प्रमथेशस्य भीरु! भृङ्गिरिटेरिदम् ॥ ११ ॥
सुतो भूत्वा भवान्कस्माददाक्षिण्यं ब्रवीषि माम् ।
त्वङ्मांसशोणितान्त्रं च मातृकं तनयस्यतु ॥ १२ ॥
नखदन्तास्थिसङ्घातः शिश्नं वाक्च शिरस्तथा । तथैवशुक्रंगणपपैतृकं तु शरीरकम्
इति भृङ्गिरिटिःश्रुत्वासद्यो योगबलेनतु । मांसादित्यक्तवान्सर्वं मातृकंभागमेवहि
ततः प्रभृति वामोरु! नखदन्तास्थिनासिकः । सचक्रूरांमतिकृत्वाक्रोधसंरक्तलोचनः
त्वां परित्यज्य दुःखार्त्त आजगाम ममांतिकम् ।

अथ त्वया तदा शप्तो गणो भृङ्गिरिटिः प्रिये !॥ १६ ॥
क्रूराबुद्धिःकृता यस्मात्त्वयाकुमतिनाभृशम् । तस्मात्त्वंमानुषेलोकेगमिष्यसिनसंशयः
इत्युक्तस्तुत्वयादेवि!गणोभृङ्गिरिटिस्तथा । पपातमानुषं लोकंपुण्यांतेसुकृतीयथा
स गत्वा पुष्करद्वीपं तपसेभावितात्मवान् । तत्रैकपादूदूर्ध्वभुजोदशपद्मान्यवस्थितः
दग्धीभूतं च तपसा जगद्वै दुष्करेण तु ॥ १६ ॥
ततो ब्रह्मा च विष्णुश्च शक्रश्च त्रिदशैःसह । वयं च चारुजवने तत्समीपं समागतः
उपगम्य ततस्तस्य कथितं पुरतो मया । अलं क्रूरेण तपसालोकस्योत्सादनेन वै ॥
त्रैलोक्यमपि निःसञ्ज्ञं जातमेवंस्थितेत्वयि । संहरस्व तपोघोरं लोकसंतापनंमहत्
प्रार्थ्यतां पार्वती पुत्र सा दास्यति वरं च ते ।
अस्याः प्रसादान्मुक्तिस्ते शापाच्चैव भविष्यति ॥ २३ ॥
एवमुक्तस्तदा तेन प्रार्थितात्वं महेश्वरि !। गणेन भृङ्गिरिटिना भक्तिनम्रेण सादरात्
त्वया प्रोक्तं विशालाक्षिपुत्र गच्छममाज्ञया । महाकालवनेरम्येतत्राऽक्रूरोभविष्यसि
पुनः प्राप्स्यसि कैलासंसिद्धगन्धर्वसेवितम् । अङ्कपादाग्रतोलिङ्गंसप्तकल्पानुगंमहत्
यस्य दर्शनमात्रेण शुभा बुद्धिः प्रजायते ॥ २६ ॥
कृतघ्ना नास्तिकाःक्रूरायेच विश्वासघातकाः । महापातकिनो येचयेच शापवशंगताः
दर्शनात्तस्य लिङ्गस्य तेऽपि स्वर्गभुजो नराः ॥ २७ ॥
क्रूरांबुद्धिसमासाद्यकंसं हत्वाचकेशिहा । बलदेवेन सहितस्त्यक्त्वातांमथुरांपुरीम्
महाकालवनं गत्वातोषयित्वा महेश्वरम् । अक्रूरत्वंचसम्प्राप्तं कीर्त्तिर्लब्धाचशाश्वती
त्वदीयं वचनं श्रुत्वा गणो भृङ्गिरिटिस्तदा । तथेतिप्रत्ययीजातोमहाकालवनंगतः
देवमाराधयामास तपसा दुष्करेण तु ॥ ३० ॥
एतस्मिन्नन्तरे देवि! लिङ्गमध्यात्त्वमुत्थित ।
अर्द्धाङ्गं मामकं कृत्वा स्वकीयाङ्गमथार्द्धता ।
फणीन्द्रबद्धजूटार्द्धमर्द्धधम्मिल्लभूषितम ॥ ३१ ॥
पत्रवल्लीविचित्रार्धमर्द्धचन्द्रविराजितम् । मुक्ताहारनिबद्धार्द्धमर्द्धं सर्पैश्च वेष्टितम् ॥

ततोभृङ्गिरिटिर्देवि! दृष्ट्वा तन्महदद्भुतम् । चिन्तयामास हृदये मयाऽज्ञानादनुष्ठितम्
उमा च शङ्करश्चैव देहमेकं सनातनम् । एका मूर्त्तिरनिर्देश्या द्विधा भेदेन दृश्यते ॥
एवं चिन्तयतस्तस्य भक्तिनम्रस्य पार्वति !। प्रोक्तंत्वया प्रसन्नाहं वरं वरय पुत्रक!
तेनोक्तं यदि तुष्टाऽसि मातर्मम महेश्वरि !।
अस्य लिङ्गस्य माहात्म्यात्क्रूराबुद्धिर्गता मम ॥ ३६ ॥
अक्रूरेश्वरनामायं देवः ख्यातो भवत्विति । त्वं देवि सर्वभावानामेकाकारणमुच्यते
त्वं मूर्ता पुण्यनिचया त्वं गतिः पुण्यसेविनाम् ।
पिता माता सुहृद्बन्धुस्त्वमेका कारणं परम् ॥ ३८ ॥
कुरु पुण्यतमं स्थानं ब्रह्महत्यादिनाशनम् । भुक्तिदं मुक्तिदंचैववाञ्छितार्थप्रदायकम्
तथेति च त्वया प्रोक्तं गिरा मधुरयातदा । यत्ते प्रियतमं वत्स तत्सर्वंप्रकरोम्यहम्
नमेऽस्ति दुष्करं पुत्र त्वत्कृते कनकप्रभ !। अस्मिन्स्थाने तुयेदेवमक्रूरेश्वरसञ्ज्ञकम्
प्रसङ्गादपि पश्यन्ति अपि पापरता नराः ।
तेऽप्यवश्यं भविष्यन्ति त्वत्समा नियतं गणाः ॥ ४२ ॥
भक्त्या स्तोष्यन्ति ये नाम लिङ्गस्यास्य च मानवाः ।
मानसैः पातकैर्मुक्ता यास्यन्ति स्वर्गमक्षयम् ॥ ४३ ॥
स्नात्वा तु विधिवत्पूजां यः करिष्यति मानवः ।
स मुक्तःपातकैःसर्वैःप्राप्स्यते रविमण्डलम् ॥ ४४ ॥
आयुरारोग्यमैश्वर्यं काममत्र हि वाञ्छितम् ।
गोसहस्रफलं चात्र स्पृष्ट्वा प्राप्स्यति मानवः ॥ ४५ ॥
स्नात्वामन्दाकिनीकुण्डे योऽक्रूरेश्वरमीश्वरम् । पूजयेद्विविधैःपुष्पैर्महापापहतोपिवा
विमानं दिव्यमारूढो यावत्कल्पचतुष्टयम् ।
गन्धर्वैर्गीयमानस्तु सोऽपिस्वर्गं गमिष्यति ॥ ४७ ॥
इत्युक्तः स गणो देवि! मत्समीपमुपागतः ।
शापान्मुक्तस्त्वया सार्धं विस्मिता किं वरानने !॥ ४८ ॥

एषतेकथितो देवि प्रभावः पापनाशनः । अक्रूरेश्वरदेवस्य शृणु कुण्डेश्वरं परम् ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्येऽक्रूरेश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥

चत्वारिंशोऽध्यायः

कुण्डेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

चत्वारिंशत्तमंविद्धि कुण्डेश्वरमतःशृणु । यस्य दर्शनमात्रेण लभ्यते सद्गतिः परा ॥
विज्ञप्तोऽहं त्वया देवि मन्दरेचारुकन्दरे । वीरकंद्रष्टुमिच्छामि क्व गतो मम पुत्रकः
मया प्रोक्तं विशालाक्षि! महाकालवनोत्तमे । जलमध्येस्थितस्तेपेतपः परमदारुणम्
मुनिभिः सहितो धीमान्भ्राजमानोंऽशुमानिव ।
गच्छामस्तत्र तं द्रष्टुं गणैः सार्द्धं वरानने !॥ ४ ॥
मदीयंवचनंश्रुत्वा त्वयाहंप्रेरितस्तदा । उत्तिष्ठशम्भो गच्छामो वृषमारुह सत्वरम्
सप्रस्रवौ स्तनौ जातौ सद्यःसंस्मृत्य वीरकम् ।
मया स्मृतो वृषो देवि! धर्मरूपी सनातनः ॥ ६ ॥
मदीयंचिन्तितंज्ञात्वा ममपार्श्वमुपागतः । आरूढोऽहं त्वयासार्द्धंतस्मिन्नेववृषे तदा
प्रस्थितस्तत्क्षणाच्छीघ्रं गणैर्नानाविधैः सह ।
वेगात्प्रयातो वृषभस्कन्धालम्बितया त्वया ॥ ८ ॥
रणद्वलयबाहुभ्यां गाढमालिङ्गितोह्यहम् । त्वंभीताचतदाजातायदाऽतीवप्रणोदितः
वृषोमया विशालाक्षि सकृष्टोगणपस्तदा । कृष्टंच सत्वरंदृष्ट्वा प्रोक्तं चभीतया तदा
श्रान्तास्मिसाम्प्रतं देववेगेनानेनभीषिता । तद्विश्रमितुमिच्छामि भूधरस्यतटेविभो
क्षणं पद्भ्यां गमिष्यामि विषमोऽयं गिरिर्महान् ।

त्वदीयं वचनं श्रुत्वा बाढमुक्तं प्रिये मया ॥ १२ ॥
मुहूर्त्तं चारुजघने शैलपादमुपाश्रिता । कुरुश्रमापनयनं यावद्वेगात्प्रयाम्यहम् ॥ १३ ॥
पन्थानं त्वत्सुखं यत्र तं वयंमृगयावहे । एषकुण्डोगणाध्यक्षस्त्वत्समीपेवसिष्यति
त्वदाज्ञावशर्त्ती च किङ्करः स्थापितो मया ॥ १४ ॥
एवमुक्त्वा ततो देवि संस्थाप्यगणरक्षकम् । आरूढोऽहंगिरेःप्रान्तमुदयाद्रिंरविर्यथा
ततोऽवलोकितोऽत्यर्थं रमणीयोमहागिरिः । इदं रम्यमिदंरम्यमित्यस्मिन्वरपर्वते
पश्यतोमम शैलेन्द्रं गताःसम्वत्सरादश । त्वयाथचिन्तितंदेवि क्वगतस्त्रिपुरान्तकः
नूनं न मदनातत्नां वेत्तिमां रतिवर्जिताम् । मां विहायमहादेवोनिर्विशङ्कः क्व वर्त्तते
हरस्य क्वापि यातस्य वैरंसंस्मृत्यचित्तजः । बाधतेमामनङ्गोऽपिचापरोपितमार्गणः
विलोकयन्तीं हा दृष्ट्वा विलपन्तीं पुनः पुनः ॥ १६ ॥
ततः कुण्डो गणाध्यक्षो ज्ञात्वा भावं त्वदीयकम् ।
उत्कृष्टेन स्वरेणोक्तं मा देवि! विमना भव ॥ २० ॥
आयात एष ते भर्त्ता मा चेतः कलुषं कुरु ।
एतच्छ्रुत्वा वचस्तस्य कुण्डस्य कमलानने !॥ २१ ॥
दुःखार्त्तयात्वयाप्रोक्तः कुण्ड!वेद्मि नशङ्करम् । क्वगतःकिं चकुरुतेकालंदीर्घमिमंशिव
दर्शयस्व महादेवमित्युक्तोऽसौ पुनःपुनः ॥ २२ ॥
यदा न दर्शितस्तेन कुण्डेनाहं वरानने । तदाशप्तस्त्वयादेविक्रुद्धया गणरक्षकः ॥
गच्छ त्वं मानुषं लोकं यस्मान्नकथितो हरः ।
एतस्मिन्नन्तरे देवि !प्राप्तोऽहं त्वत्समीपतः ॥ २४ ॥
पृष्टश्चाहंत्वयादेविविहायक्वगतोऽसिमाम् । दुर्गमेपर्वतेशून्येतस्मात्त्यक्ष्यामिजीवितम्
गत्वाग्रे भूधरस्यास्य किंकृतंचत्वयाविभो । मया तववचःश्रुत्वाकथितंसर्वमेवतत्
दुराधर्षतरः शैलः समन्ताद्दुरतिक्रमः । त्वत्प्रियार्थंमहाभागेमयामार्गोऽवलोकितः
येन मार्गेण विश्रब्धं गमिष्यामः सुमध्यमे ।
अयं कुण्डो गणो देवि! विषण्णो व्याकुलः कृतः ॥ २८ ॥

त्वयाप्युक्तं महादेव कुण्डःशप्तोमया गणः । ममाज्ञा नकृतायस्माद्धिफलं नवचो मम
तस्माद्यातु ममादेशान्महाकालवनं शुभम् ॥ २६ ॥
भैरवं रूपमास्थाय यत्र त्वं चोत्तरेस्थितः । तस्याग्रतःस्थितंलिङ्गंवर्त्ततेकामदंसदा
तस्यदर्शनमात्रेण गणपोऽयं भविष्यति । कुण्डेश्वरेतिविख्यातःसदेवोवैभविष्यति
इत्युक्तः सत्वयादेविसमासाद्यपुनः पुनः । प्रस्थापितस्त्वयादेशाद्व्रजकुण्डममाज्ञया
महाकालवनंशीघ्रं लिङ्गमाराध्य सत्वरम् । कीर्तिस्तेभवितापुत्रत्रिषुलोकेषुशाश्वती
इत्युक्तस्तत्क्षणात्प्राप्तो दृष्ट्वा लिङ्गं तु शाश्वतम् ।
उत्तरस्य शिवस्याग्रे पूजयामास भक्तितः ॥ ३४ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्चपरमर्षयः । यक्षाश्चाप्सरसश्चैव समाजग्मुःसहस्रशः
अथाहंतत्क्षणात्प्राप्तस्त्वयासार्द्धं गणैर्वृतः । दृष्ट्वाकुण्डं गणेशंतु लिङ्गाराधनतत्परम्
समाधिध्याननिरतं प्रोक्तमस्माभिरादरात् । तुष्टा ते पार्वतीपुत्रप्रार्थ्यतांवरमुत्तमम्
अक्षयं तु पदं प्राप्तंत्वयालिङ्गस्यदर्शनात् । अद्यप्रभृतिदेवोऽयंख्यातोभुविभविष्यति
नाम्ना कुण्डेश्वरो यस्मात्सर्वसम्पत्करः सदा ।
कुण्डेश्वरमनादिं तु भक्त्या पश्यति यो नरः ।
सोऽश्वमेधसहस्रस्य फलं प्राप्स्यति नान्यथा ॥ ३९ ॥
तस्यदानफलं सर्वं सर्वतीर्थफलंसदा । लिङ्गंकुण्डेश्वरंयस्तु भक्त्यासम्पूजयिष्यति
दशानामश्वमेधानामग्निष्टोमशतस्य च । स्पर्शनात्फलमाप्नोति कुण्डेश्वरस्यसर्वदा
प्रातः पश्यन्ति ये भक्त्या कृत्वा नियमपूर्वकम् ।
सिद्धिं सुकामिकीं हृष्टाः सम्प्राप्स्यन्ति न संशयः ॥ ४२ ॥
एष ते कथितो देवि प्रभावः पापनाशनः । कुण्डेश्वरस्यदेवस्य शृणु लुम्पेश्वरं परम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कुण्डेश्वरमाहात्म्यवर्णनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः

लुम्पेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

चत्वारिंशत्तमं सैकमीश्वरंविद्धि पार्वति !। लुम्पेश्वरमिति ख्यातं नामयस्यमहीतले
देशेम्लेच्छगणाकीर्णे बभूव जगतीपतिः । लुम्पाधिप इतिख्यातोमहेन्द्रसमविक्रम
तस्यासीद्दयिता भार्याविशालानामनामतः । सायौवनगुणोपेतारूपेणाप्रतिमाभुवि
स युद्धकामो नृपतिः पर्यपृच्छद्द्विजोत्तमान् ॥ ४ ॥
अथ केनापि कथितमाश्रमे सामगो द्विजः । तेनसार्द्धं महाबाहोयुध्यस्वत्वंनृपोत्तम
ततः स प्रस्थितो राजा म्लेच्छैः सार्द्धं सहस्रशः ।
तुषारैर्बर्बरैर्लुम्पैः पह्लवैः श्वगणैस्तथा ॥ ६ ॥
दस्युभिः सम्वृतः क्रूरैः क्रोधेनाकुलितेन्द्रियः ।
आजगामाश्रमं पुण्यं सामगस्य मुनेस्तदा ॥ ७ ॥
मुनिना पूजितस्तेन मधुपर्कादिविष्टरैः । एतस्मिन्नन्तरे राजा होमधेनुं ददर्श ह ॥
प्रार्थयामास सहसा न दत्ता मुनिना तदा । प्रमथ्य चाश्रमं तस्य होमधेनुंजहारसः
वनं बभञ्ज सकलं तस्य विप्रस्य पश्यतः ॥ ६ ॥
काल्यमानां च गां दृष्ट्वा वत्सं चातीव दुःखितम् ।
उवाच वचनं विप्रो मा राजन्साहसं कुरु ॥ १० ॥
एवं वदन्तं विप्रेन्द्रं शरैस्तीक्ष्णैर्जघान ह । लुम्पः क्रोधसमाविष्टो दुष्टो दुष्टजनैर्वृतः
असकृत्पुत्रपुत्रेति विलपन्तमनाथवत् । हत्वा च सामगं विप्रंजगाम स्वगृहं नृपः ॥
एतस्मिन्नन्तरे पुत्रः समित्पाणिरुपागतः । दृष्ट्वा च पितरं विप्रं तदामृत्युवशङ्गतम्
अनागसं महात्मानं विललाप सुदुःखितः ॥ १३ ॥
केनेदं कुत्सितं कर्म कृतं पापेन मे पिता । अयुध्यमानो वृद्धःसन्हतः शरशतैः शितैः

विलप्यैवं सकरुणं बहुनानाविधं तथा। प्रेतकार्याणि सर्वाणि पितुश्चक्रे विधानतः

ददाह पितरं चाग्नौ तोयमादाय सत्वरम् ।

तस्य लुम्पाधिपस्याऽपि ददौ शापं सुदारुणम् ॥ १६ ॥

स्वधर्मनिरतो विद्वान्येन मे निहतः पिता । सपापात्मादुराचारःकुष्ठरोगमवाप्नुयात्

एतस्मिन्नन्तरे राजा कुष्ठरोगेण पीडितः । अन्तङ्क्रमणतां प्राप्तोलुम्पाधीशोवरानने

औषधैरधिकोऽभ्येति ब्रह्मशापप्रभावतः ।

वैराग्यान्मर्तुकामोऽसौ काष्ठान्यादाय दुःखितः ॥ १६ ॥

चितां कर्तुं समारेभे समायातोऽथ नारदः । पूजितो विधिना तेनदुःखितेनन्नृपेणहि

अथ पप्रच्छ लुम्पोऽसौ नारदं मुनिसत्तमम् । अकस्मान्मम देवर्षे कुष्ठरोगोबभूव ह

तेनाहं पीडितोऽतीव न च शान्ति व्रजत्यसौ ॥ २१ ॥

औषधैर्वर्द्धतेकस्मादेतदाख्यातुमर्हसि । न तेऽस्त्यविदितंकिञ्चिदिह लोके परत्र च

तस्य तद्वचनं श्रुत्वा लम्पाधीशस्य नारदः । कथयामास तत्सर्वंब्रह्मशापंसुदुस्तरम्

ततः सभार्यो नृपतिः प्रार्थयामास नारदम् ।

कथं मे भगवञ्छापो दुस्तरो यास्यति क्षयम् ॥ २४ ॥

एवमुक्तस्तुलुम्पेन नारदो भगवानृषिः । कारुण्यात्कथयामाससभार्यस्ययशस्विनि

महाकालवने राजँल्लिङ्गं कुष्ठहरं परम् । सर्वसम्पत्करं तत्र विद्यते पापनाशनम् ॥

शिप्रायाश्च तटे रम्ये केशवार्कस्य पूर्वतः ।

तत्र त्वं गच्छ राजेन्द्र! कान्त्यायुक्तो भविष्यसि ॥ २७ ॥

एवमुक्तस्तुलुम्पोऽसौ ह्याजगाम त्वरान्वितः । महाकालवनं रम्यंमहर्षिगणसेवितम्

प्राप्तः स्वर्गोपमं भूयः शिप्रयापरिशोभितम् ।

विवेश च मुदायुक्तो दृष्ट्वा लिङ्गमनुत्तमम् ॥ २६ ॥

स्नात्वा शिप्राजले पुण्ये महापातकनाशने । दर्शनात्तस्य लिङ्गस्यदिव्यरूपोबभूवह

कुष्ठरोगेण मुक्तस्तु मुक्तो वै ब्रह्महत्यया ।

कृतकृत्यो नृपो जातो दर्शनादेव पार्वति !॥ ३१ ॥

सतत्र तामुषित्वैकां रजनीं पृथिवीपतिः । तापसानां परं चक्रे सत्कारं भार्यया सह

ततः कृतस्वस्त्ययनस्तापसैस्तैर्महात्मभिः ।

दिव्यज्ञानान्वितैर्दिव्यैः सूर्यवैश्वानरप्रभैः ॥ ३३ ॥

कृतं नाम तदातस्य लिङ्गस्य कमलानने । लुम्पेनाराधितोयस्माद्देवोऽयंकुष्ठनाशनः

लुम्पेश्वर इति ख्यातो भविष्यति महीतले ॥ ३४ ॥

पूजयिष्यन्ति ये भक्त्या लिङ्गं लुम्पेश्वरं परम् ।

स्नात्वा शिप्राजले पुण्ये ते यास्यन्ति परं पदम् ॥ ३५ ॥

प्रार्थयिष्यन्ति यान्कामान्मनसाचेप्सितान्प्रियान् ।

तानाप्स्यन्ति न सन्देहो लुम्पेशस्य च दर्शनात् ॥ ३६ ॥

महापापसमायुक्तो यःपश्यतिसमाहितः । लिङ्गंलुम्पेश्वरंसोऽपिदेवतुल्योभविष्यति

गोघ्नश्चैव कृतघ्नश्च मातृहा गुरुतल्पगः । दुष्टकर्मसमाचारो भ्रातृहा पितृहा तथा ॥

लुम्पेश्वरं सकृत्पश्यन्मुच्यतेसर्वकिल्बिषैः । पूजितोऽपिदहेत्पापंसप्तजन्मार्जितंचयत्

इत्युक्त्वा मुनयः सर्वेपूजयामासुरन्विताः । कुष्ठरोगविनिर्मुक्तोराजास्वविषयंगतः

एष ते कथितो देवि! प्रभावः पापनाशनः । लुम्पेश्वरस्य देवस्य शृणु गङ्गेश्वरं परम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये लुम्पेश्वरमाहात्म्यवर्णनं-
नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

——:*:——

द्विचत्वारिंशोऽध्यायः

गङ्गेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

द्वाचत्वारिंशतं देवं गङ्गेश्वरमथो शृणु । यस्य दर्शनमात्रेणसर्वतीर्थफलं लभेत् ॥
ध्रुवाधारं जगद्योनेः पदं नारायणस्य तु ॥ १ ॥
पदात्प्रवृत्ता या देवी गङ्गा त्रिपथगा नदी ।
सा प्रविश्य सुधायोनिं सोममाधारमम्भसाम् ॥ २ ॥
ततः सम्वर्द्धमानार्करश्मिसङ्गतिपावनी । पपात मेरुपृष्ठे च सा चतुर्धा ततो ययौ
मेरुकूटतटान्तेभ्यो निपतन्ती यशस्विनी ।
विकीर्यमाणसलिला निरालम्बा पपत सा ॥ ४ ॥
मन्दरादिषु शैलेषु प्रविभक्तोदकासमम् । तत्र सीतेतिविख्याता ययौ चैत्ररथम्वनम्
तत्प्लावयित्वा च ययावरुणोदं सरिद्वरा ॥ ६ ॥
तथैवालकनन्दाख्या दक्षिणे गन्धमादने । मेरुपादवनं गत्वा नन्दने देवनन्दने ॥ ७ ॥
मानसञ्च महावेगात्प्लावयित्वासरोवरम् । तस्माच्चशैलराजानं रम्यंत्रिशिखरंगता
तस्माच्च पर्वताः सर्वे प्लावितास्तत्क्षणात्प्रिये !।
तान्प्लावयित्वा सम्प्राप्ता हिमवन्तं महागिरिम् ॥ ९ ॥
मया धृता च तत्रैव जटाजूटेन पार्वति !। न मुक्ता च यदा गङ्गा तदा क्रुद्धा ममोपरि
गात्राणि प्लावयामास मदीयानि वरानने । मया च रुद्राक्रोधेन जटामध्येयशस्विनि
तत्रैव सा तपश्चक्रे बहुकल्पशतानि च । भगीरथेनोपवासैः स्तुत्याचाराधितोह्यहम्
तदामुक्ता मया देविगङ्गात्रिपथगामिनी । महाकालमनुप्राप्ता प्लावयित्वोत्तरान्कुरून्
समुद्रमहिषी जाता प्राणेभ्योऽपि गरीयसी । नदीनामुत्तमागङ्गा समुद्रेण कृतातदा
स तया सहितो रेमे समुद्रः सरिताम्पतिः ॥ १४ ॥

ततः कदाचिद्ब्रह्माणमुपासाञ्चक्रिरे सुराः । तथार्णवोजगामाथब्रह्मलोकं सनातनम्
गङ्गया सहितो देवि! दर्शनार्थं महोत्सवे ॥ १५ ॥
अथ गङ्गा सरिच्छ्रेष्ठा समुपायात्पितामहम् ।
तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥ १६ ॥
ततोऽभवन्सुरगणाः सहसाऽवाङ्मुखास्तदा ।
महाभिषस्तु राजर्षिर्निःशङ्को दृष्टवान्नदीम् ॥ १७ ॥
तस्य भावं विदित्वाऽथ ब्रह्मणा स तिरस्कृतः ।
उक्तस्तु जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ १८ ॥
गङ्गाशप्ताथक्रुद्धेनसमुद्रेणयशस्विनि । मांविहायान्यसक्तासितस्माद्यास्यसिमानुषम्
लोकमल्पायुषंदीना तत्रदुःखमवाप्स्यसि । तं शापं दारुणं श्रुत्वा गङ्गावचनमब्रवीत्
विनापराधाच्छप्ताहं कस्माद्वै देवसंसदि । पतिव्रता पतिप्राणा पतिना परमार्थतः
प्रमादाद्वस्त्रमुद्धूतंवायुना व्यापकेन तु । प्रत्युवाच ततो ब्रह्मा तां नदींलोकपावनीम्
वसूनां कारणाद्देवि! शप्ता यस्मान्महानदि !।
भाव्यर्थे तोयनिधिना तस्माच्छीघ्रं व्रजाधुना ॥ २३ ॥
महाकालवने रम्ये सिद्धगन्धर्वसेविते । शिप्राया दक्षिणे भागे विद्यते लिङ्गमुत्तमम्
सर्वसिद्धिकरं पुण्यं सर्वपातकनाशनम् ।
तमाराधय यत्नेन स ते दास्यति वाञ्छितम् ॥ २५ ॥
पितामहवचः श्रुत्वा तुष्टा त्रिपथगामिनी । गमनं तत्र मेऽभीष्टंविद्यते यत्सखी मम
शिप्राऽपि मे प्रिया पुण्या महापातकनाशिनी ॥ २६ ॥
इति सञ्चिन्त्य मनसा दिव्यादेवनदीतदा । आजगाममहाकाले ह्यपश्यल्लिङ्गमुत्तमम्
पूजयामास पयसा दिव्येन विधिनातदा । दृष्ट्वाशप्रांसखीं तत्र संश्लेषंचाभवत्तयोः
ततःप्रभृतिसञ्जाता साशिप्रापूर्ववाहिनी । त्रिषुलोकेषुविख्यातोदेवोगङ्गेश्वरःस्वयम्
गङ्गयाऽऽराधितो यस्मात्समीहितफलप्रदः ॥ २९ ॥
संस्तुता देवगन्धर्वैर्गङ्गा देवनदी तदा । ऋषिभिर्वालखिल्याद्यैस्तथान्यैर्मुनिभिर्मुदा

समुद्रस्तत्र सम्प्राप्तो मानिता सा महानदी ।
लिङ्गेनोक्ता तदा गङ्गा कलया स्थीयतामिति ॥ ३१ ॥
तत्समीपे महापुण्ये यावत्तिष्ठति मेदिनी । अङ्गीकृतंसमुद्रेण यथोक्तश्चतथास्त्विति
एवमुक्त्वा गता गङ्गा कलया तत्र संस्थिता ।
गङ्गेश्वरं तु यः पश्येत्स्नात्वा शिप्राम्भसि प्रिये !॥ ३३ ॥
गोसहस्रफलं तस्य जायते नात्र संशयः । सर्वतीर्थफलं तस्य सर्वधर्मफलं तथा॥
सर्वयज्ञफलं सम्यक्सर्वदानफलं तथा । सर्वयोगफलं देवि! प्राप्नोत्येव निरन्तरम्
तत्र तीर्थानि सुभगे ! पृथिव्यां यानि कानिचित् ।
धर्मारण्यं फल्गुतीर्थं पुष्करं नैमिषं गया ॥ ३६ ॥
प्रयागश्च कुरुक्षेत्रं केदारममरेश्वरम । चन्द्रभागा विपाशा च सरयूर्देविका कुहूः॥
गोदावरी शतद्रुश्च बाहुदा वेत्रवत्यपि । सर्वा एवात्र सरितः सङ्गताः सन्ति गङ्गया
गुप्तानिपुण्यतीर्थानि सिद्धक्षेत्राणिचैवहि । तत्रसर्वाणितिष्ठन्ति कलामात्रेणपार्वति
एतेषांफलमाप्नोतियःपश्यतिसमाहितः । स्नात्वागङ्गेश्वरं देवं सत्यमेतन्मयोदितम्
अतः पुण्यतमं स्थानं गीयते गणवन्दिते !॥ ४० ॥
एष ते कथितो देवि प्रभावः पापनाशनः । गङ्गेश्वरस्य देवस्य श्रृण्वङ्गारेश्वरम्परम्
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्येगङ्गेश्वरमाहात्म्यवर्णनंनाम द्वाचत्वारिंशोऽध्यायः॥४२॥

त्रिचत्वारिंशोऽध्यायः

अङ्गारेश्वरमाहात्म्यवर्णनम्

श्रीशिव उवाच

चत्वारिंशत्तमं विद्धि त्र्यधिकं पर्वतात्मजे । यस्य दर्शनमात्रेण जायन्ते सर्वसम्पदः
आदिकल्पे पुराजातो वक्त्राङ्गो लोहितच्छविः ।
रौद्रस्त्वङ्गारसदृशो मम गात्राद्वरानने !।
मया धृतो धरण्यां स विख्यातो भूमिपुत्रकः ॥ २ ॥
जातमात्रे सुते तस्मिन्महाकाये भयावहे ।
कम्पिता धरणी देवी देवास्त्रस्ताः सवासवाः ॥ ३ ॥
क्षोभंगताः समुद्राश्च चेलुश्च धरणीधराः । तेनैव पीडितंसर्वं सदेवासुरमानुषम् ॥
ऋषयो वालखिल्याश्च देवाःशक्रपुरोगमाः । बृहस्पतिपुरस्कृत्य ब्रह्मलोकंगताः प्रिये!
सोच्छ्वासाः कथयामासुर्नमस्कृत्य पितामहम् ।
वृत्तान्तं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ ६ ॥
हरगात्रोद्भवेनैव जातमात्रेण लीलया । लोकत्रयं समाक्रान्तं पीडितं भक्षितं तथा
तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ।
चिन्तयित्वा तु तैः सार्द्धमाजगाम ममान्तिकम् ॥ ८ ॥
मया पृष्टास्तु ते सर्वे किमर्थं भयविह्वलाः ।
सोच्छ्वासहृदया दीनाः कस्माद्वो भयमागतम् ॥ ९ ॥
तैःसर्वं कथितं देवि! ममाग्रे भयविह्वलैः । त्वदङ्गसम्भवेनैव देवदेव जगत्पते ॥
पीडितं भक्षितं चैव सदेवासुरमानवम् ॥ १० ॥
इति तेषां वचः श्रुत्वाक्षेमार्थं कृपया मया । आकारितोमत्समीपमुवाच वदतां वरः
आदेशो दीयतां देव किंकरोमीत्युवाचसः । नाकर्षत्वंजगदिदं मया प्रोक्तः पुनः पुनः

ममाङ्गाद्रजसा जातस्तेनाङ्गारक उच्यसे ।
लोकानां स्वस्तये नित्यं मङ्गलोऽसि मया कृतः ॥ १३ ॥
इदानीं वक्रतां यातो वक्रस्त्वं गीयसेबुधैः । विज्ञप्तोऽहंतदा तेनमम वाक्यंश्रुतंयदा
आहारेण विना देव! कथं तृप्तिर्भविष्यति ॥ १४ ॥
तस्मान्मे देहि सुस्थानमाधिपत्यं च देहि मे । शक्तिंचदेहिमे शीघ्रमाहारं देहिमेप्रभो
तस्य तद्वचनं श्रुत्वा पुत्रोऽयंमम वल्लभः। तस्माद्दास्यामि परमंस्थानमक्षयमुत्तमम्
इति सञ्चिन्त्य मनसा स्मृतं स्थानं मयोत्तमम् ।
उत्सङ्गे च सुतं कृत्वा प्रेम्णा प्रोक्तं पुनः पुनः ॥ १७ ॥
दत्तं पुत्र मया स्थानं महाकालवनोत्तमे। गङ्गेश्वरस्य पूर्वे तु प्रशस्यंस्थानमुत्तमम्
खगर्ता चैव शिप्रा च सङ्गमस्तत्र विद्यते ॥ १६ ॥
यदामया धृता गङ्गातदासाचन्द्रमण्डलात् । प्रमादात्पतिता भूमौ महाकालवनोत्तमे
खगर्तेति च विख्याता खाद्भ्रष्टाप्रापतत्क्षितौ । अतोमयावतारस्तुसहसातत्रवै कृतः
लिङ्गमूर्तिरहं पुत्रतिष्ठामिसुरपूजितः। तत्स्थानं दुर्लभं देवैस्तस्मात्त्वं गच्छसत्वरम्
पूजितोऽहं त्वया तत्र सङ्गमे लोकपूजिते ।
त्रिषु लोकेषु यास्यामि ख्यातिं वै तव नामतः ॥ २३ ॥
मध्ये ग्रहाणां सर्वेषामाधिपत्यं मया तव । दत्तंतृतीयकं स्थानं तत्र तृप्तिर्भविष्यति
पूजां प्राप्स्यसितत्रैवग्रहमध्ये व्यवस्थितः । तिथिर्दत्ता चतुर्थीतेतस्यांयेव्रततत्पराः
त्वामुद्दिश्य करिष्यन्ति पूजां शान्तिं सदक्षिणाम् ।
तेन सर्वेण ते तृप्तिर्भविष्यति न संशयः ॥ २६ ॥
वारश्चैकश्च ते दत्तो मङ्लार्थं मया तव । नववस्त्रपरीधानं विद्यारम्भं दिने तव ॥
तैलाभ्यङ्गं करिष्यन्ति न च प्राप्स्यन्ति ते बलम् ॥ २७ ॥
इत्युक्तस्तुमयादेवि वक्राङ्गो मङ्गलःसुतः । अङ्गारकेति विख्यातस्तथेत्यङ्गीचकारसः
सन्तुष्टस्तेन वाक्येन मदीयेन वरानने । आजगाम मुदा युक्तो महाकालवनोत्तमे ॥
शिप्रायाश्च तटे रम्ये खगर्त्तासङ्गमान्तिकम् । दृष्टोऽहं लिङ्गरूपेण परांतुष्टिमुपागतः

मया चालिङ्गितः प्रेम्णा चुम्बितः शिरसि प्रिये !।
वरो दत्तो विशालाक्षि! वाञ्छितं ते भविष्यति ॥ ३१ ॥
दृष्टोऽहं च त्वया पुत्र भक्त्या चाराधितस्त्वया ।
मम वाक्यं कृतं यस्मात्तस्मात्तुष्टोऽस्मि मङ्गल! ॥ ३२ ॥
अङ्गारेश्वरनामाहमद्यप्रभृति पुत्रक !। त्रिषु लोकेषु विख्यातो भविष्यामि न संशयः
ये मांपश्यन्ति सततं सङ्गमेऽत्र व्यवस्थितम् । नतेषांपुनरावृत्तिर्भविष्यतिमहीतले
येमांसम्पूजयिष्यन्ति ह्यङ्गारकदिने नराः । कलौयुगेकृतार्थास्तेभविष्यन्तिनसंशयः
चतुर्थ्यां मङ्गलदिने येमां पश्यन्ति सुव्रताः । नतेयास्यन्तिसंसारे घोरेदुःखशताकुले
अमावास्या च भौमश्च संयोगो दृश्यतेयदा । खगर्त्तायाश्चशिप्रायाःसङ्गमेदेवपूजिते
स्नात्वा तदा प्रपश्यन्ति मामत्रैव व्यवस्थितम् ।
तेषां पुण्यफलं देवि! समासाच्छृणु साम्प्रतम् ॥ ३८ ॥
वाराणस्यां प्रयागे च कुरुक्षेत्रे च यत्फलम् ।
गयायां पुष्करे प्रोक्तं तत्पुण्यमधिकं भवेत् ॥ ३६ ॥
एष ते कथितोदेवि प्रभावः पापनाशनः । अङ्गारेश्वरदेवस्य श्रूयतामुत्तरेश्वरम् ॥ ४०

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्येऽङ्गारकेश्वरमाहात्म्यवर्णनं नाम
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

उत्तरेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

चत्वारिंशत्तमं विद्धि चतुर्भिरधिकंपरम् । यस्यदर्शनमात्रेण समीहितफलं लभेत् ॥
उत्तरेशमिति ख्यातं समीहितफलप्रदम् ॥ १ ॥
पुरानियुक्ताः शक्रेण ये मेघा वृष्टिकारकाः । तैः प्लावितं जगत्सर्वं सपर्वतमहीतलम्
एकार्णवे ततो जाते देवा भीता वरानने !।
निःस्वाध्यायवषट्काराः स्वधास्वाहाविवर्जिताः ॥ ३ ॥
नैवाप्यायनमस्माकं विना होमेन जायते । वयमाप्यायिता विप्रैर्यज्ञभागैर्यथोचितैः ॥
तेषांवयंप्रयच्छामः कामान्यज्ञादिपूजिताः । नास्तिततत्सर्वमेवैतदन्योन्यमवदन्सुराः
दृष्ट्वा पृथ्वींजलेमग्नां ब्रह्माणंशरणंगताः । कथयामासुरत्युग्रं नमस्कृत्य पितामहम् ।
एकार्णवा मही जाता विनष्टाःक्रतवःप्रभो । निःस्वाध्यायवट्कारं जगज्जातं पितामह
देवानां वचनंश्रुत्वा ब्रह्मालोकपितामहः । मुहूर्त्तंचिन्तयामास किमेतदितिविस्मितः
अकाले प्रलयःकस्मान्निमग्ना पृथिवीजले । गतास्पृष्टिर्मदीया तुव्यर्थं जातं वचो मम
इतिसञ्चिन्त्य हृदये सस्मार बलसूदनम् । स्मृतमात्रस्तुबलहाह्याजगाम पितामहम्
प्रोवाच वचनं श्रुत्वा नमस्कृत्य पितामहम् ।
स्मृतोऽहं केन कार्येण देह्याज्ञां मे पितामह !॥ ११ ॥
ब्रह्मणोक्तस्तदाशक्रःकिमर्थंप्लावितामही । असंबद्धैस्त्वदीयैश्चमेघैः किंसहसाकृतम्
ततःसर्वे समाहूता मेघाः शक्रेण पार्वति !। पितामहसमक्षं तुसमायाताश्चतत्क्षणात्
पितामहेन शक्रेण मर्यादाच कृतातदा । गजोनाम महामेघः पूर्वस्यांदिशि निर्मितः
गजाकारैस्ततो मेघैः सहस्रैर्दशभिर्वृतः । गवयो दक्षिणामाशां षट्सहस्राधिपःकृतः
शरभःपश्चिमामाशां सहस्राधिपतिःकृतः । उत्तरोनाम यो मेघो मेघैः कोटिभिरावृतः

उत्तरस्यां दिशि तदाप्रभुत्वे सम्प्रतिष्ठितः । मर्यादा च कृता देवि!ब्रह्मणा वासवेन तु
प्रावृट्काले च वर्षध्वं नक्षत्रैर्जलजैर्दुतम् ।
आर्द्रादिस्वातिपर्यन्तं नक्षत्रदशकं स्मृतम ॥ १८ ॥
ब्रह्मशक्रवचः श्रुत्वा तथेति कृतनिश्चयाः । ववृषुर्नियते काले तन्नामानि भवन्ति हि
एवं व्यवस्थिते लोके मर्यादायां स्थिता घनाः ।
ब्राह्मणा विज्वरा जातास्त्रिदशा मुदिता भृशम् ॥ २० ॥
क्रूरग्रहैरथो रुद्धास्ते मेघा वृष्टिकारकाः । शनैश्चरेण भौमेन भास्करेणाथ केतुना ॥
पीडिताः शरणं जग्मुर्वासवं भयविह्वलाः । निवेदितं भयात्सर्वंनमस्कृत्य पुनः पुनः
मेघानां वचनं श्रुत्वा सन्त्रस्तो वासवस्तदा । उवाचवचनं तेषां नाहंशक्तोनिवारणे
ग्रहाणामसमर्थोऽहं सर्वदैव पयोधराः ॥ २३ ॥
अहं राज्यात्परिभ्रष्टः कृतः क्रूरग्रहैःपुरा । स्थापितोऽहं कदाचिच्च सुप्रसन्नैर्ग्रहैः पदे
मम मान्याश्च पूज्याश्च ग्रहा एव यतोधिकाः ।
ग्रहाः सर्वहराः प्रोक्ता इति मे वर्त्तते मतिः ॥ २५ ॥
एतस्मिन्नन्तरे भूमौ सञ्जाता शतवार्षिकी । अनावृष्टिर्महारौद्रा सर्वप्राणिविनाशिनी
अस्थिकङ्कालशकला श्वेतपर्वतसन्निभा । पृथिवा तत्क्षणाज्जाता विनातोयेनपार्वति
देवाः सर्वे पुनर्भीता ब्रह्माणं शरणं गताः । ऊचुश्च प्रणताः सर्वेत्राहिनःशरणागतान्
अनावृष्ट्या जगत्सर्वं पीडितं चपितामह !। अकाले प्रलयो जातः पुनरेव च तादृशः
त्वया च वासवेनैव नियुक्ता ये पयोधराः । क्रूरग्रहैरतीवोग्रैः पीडितास्ते पितामह
देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः । अहं बिभेमि भो देवा ग्रहैस्तैर्बलवत्तरैः
सर्वं जानामि माहात्म्यं ग्रहाणांक्रूरचेतसाम् । शनैश्चरेणवक्रेणभवन्तःपीडिताःसदा
वरुणो यादसां नाथो मङ्गलेन प्रपीडितः । राज्यभ्रष्टस्तु बहुधा केतुना वासवःकृतः
शिरश्छेदो मया प्राप्तो वक्रेण रविणा पुरा ।
एकैकशः समर्थास्ते किं पुनः सङ्घशस्त्वमी ।
तस्मात्सर्वे महादेवं गच्छामः शरणं वयम् ॥ ३४ ॥

ब्रह्मणो वचनं श्रुत्वा सर्वे देवाः सवासवाः । ब्रह्माणं च पुरस्कृत्य मामेवशरणंगताः

उक्तोऽहं त्रिदशैः सर्वैः पाहि नः शरणागतान् ।

त्वं नो धाता विधाता च सृष्टिसंहारकारकः ॥ ३६ ॥

क्रूरग्रहैर्महादेव! रुद्धा मेघाः समन्ततः । नकुर्वन्ति प्रभो वृष्टिमनावृष्टिः सुदारुणा ॥

सर्वप्राणिविनाशाय सञ्जाता शतवार्षिकी । तेषां तद्वचनं श्रुत्वा मयाज्ञातं वरानने !॥

क्रूरग्रहाणां सामर्थ्यं यथा च विदितं मम ॥ ३८ ॥

इति ज्ञात्वा महादेवि! उपायश्चिन्तितोमया । उत्तरोनामयोमेघोमेघैःकोटिभिरावृतः

आहूतस्तत्क्षणात्प्राप्तः किं करोमीत्युवाचह ॥ ३९ ॥

मया प्रोक्तो ममादेशाद्गच्छत्वं घनसंयुतः । महाकालवनं रम्यं वाञ्छितार्थफलप्रदम्

गङ्गेश्वरस्यदेवस्य दक्षिणे लिङ्गमुत्तमम् । तमाराधय यत्नेनसतेदास्यतिवाञ्छितम्

एवमुक्तो मया मेघ उत्तरो मेघसंयुतः । जगाम त्वरया युक्तो महाकालवनोत्तमे ॥

दृष्ट्वा वृष्टिकरंलिङ्गं पूजयामासभक्तितः । शिप्राजलंगृहीत्वातुस्नात्वास्नात्वाप्रयत्नतः

तावद्यावज्जलं शिप्रां पुनरेवागतं प्रिये !॥ ४३ ॥

एतस्मिन्नन्तरेतस्मादुद्भूतंधूममण्डलम् । लिङ्गमध्याद्वरारोहेज्वालामालाकुलंमहत्

ततो ज्वालामयं सर्वमभूदम्बरगोचरम् । तस्य ज्वालासमूहेन दग्धं वै ग्रहमण्डलम्

सनक्षत्रपथं यावत्ततो भीता ग्रहाः प्रिये !। तमेव शरणं प्राप्ता धूमज्वालाकुलाननाः ॥

ततो ब्रह्मा च विष्णुश्चतद्दृष्ट्वामहदद्भुतम् । देवैर्वृतःसहस्राक्षोलिङ्गान्तिकमुपागतः

तल्लिङ्गं सुमहाज्वालं ज्वालाभिः पूरिताम्बरम् ।

दुष्प्रेक्ष्यं दुर्विदं भीमं वर्द्धमानं ददर्श सः ॥ ४८ ॥

अक्ष्णोर्निमेषमात्रेणववृधेयोजनायुतम् । दृष्ट्वातुवर्द्धमानस्यलिङ्गस्यात्यद्भुताकृतिम्

सुरेशो मोहमापन्नो विसञ्ज्ञाश्च ग्रहास्तदा ॥ ४९ ॥

ततस्तु तस्य लिङ्गस्यवारिधाराविनिःसृताः । एकोद्देशाद्वरारोहेधरात्वेकार्णवीकृता

लिङ्गस्यान्यप्रदेशात्तु वायुः समभवन्महान् । इतरस्मिन्प्रदेशे तु समूहस्तडितामभूत्

सधूमा समभूज्ज्वाला लिङ्गस्यान्यप्रदेशतः ॥ ५२ ॥

एवमत्यद्भुतं दृष्ट्वा वर्द्धमानं समन्ततः । लिङ्गमव्यक्तमुद्भूतमापूरितनभोऽन्तरम् ॥

ग्रहाश्च विह्वला जाता धूमेनाकुलितेन्द्रियाः ।

तुष्टुवुश्च तदा लिङ्गं दह्यमानाः समन्ततः ॥ ५४ ॥

ग्रहा ऊचुः

नमः सुरूपाय सुरार्चिताय नमो विरूपप्रकृतिक्रियाय ।

नमोनमो रूपनिराश्रयाय जलस्वरूपाय नमो नमस्ते ॥ ५५ ॥

इतिस्तुतोयदादेविग्रहैःक्रूरैस्तदाप्रिये । लिङ्गात्प्रादुरभूत्खस्थःस्वरूपोविग्रहाकृतिः

भस्मधूसरसर्वाङ्गो भोगिभोगाङ्गदोज्ज्वलः ।

हिमराशिनिभाकारोरजताचलनिर्मलः ।

उवाच चैतान्प्रणतान्ग्रहाःकम्पितकन्धरान् ॥ ५७ ॥

किं वा कामंमनोऽभीष्टंभवद्भ्यो यद्ददाम्यहम् । ममामोघमिदंसर्वदर्शनंचातिदुर्लभम्

भवद्भ्यो लोकतुष्ट्यर्थं दर्शनंहिददाम्यहम् । एवमुक्त्वाग्रहाःसर्वेप्रोचुःप्राञ्जलयस्तदा

यदि देयोवरोदेवयदि तुष्टोऽसि शङ्कर !। कर्मारम्भेषु सर्वेषुपूजाऽस्माकंयथा भवेत्

तथा कुरु महादेव! तेन तृप्तिर्भविष्यति ॥ ६० ॥

एवंभविष्यतीत्युक्त्वामेघंवोत्तरमुक्तवान् । तुष्टोऽस्म्यहंतुतेवत्सगृहाणवरमीप्सितम्

तच्छ्रुत्वा वचनं तत्र ह्युत्तरः प्राह हर्षितः । यन्मे तुष्टोऽसिभगवंस्तन्मह्यंदीयतांवरम्

यदास्माकं महाबाधां कदाकोऽपि करिष्यति ।

तदा वृष्टिर्विधातव्या त्वया देव! सदा भुवि ॥ ६३ ॥

रक्षाकार्या च मेघानां रक्षणीयास्त्वयावयम् । एवमस्त्वितितेनोक्तंलिङ्गेननगगात्रजे

अद्यप्रभृतितेनाम्ना ख्यातिं यास्यामिभूतले । उत्तरेश्वरसञ्ज्ञोऽहंभविष्यामिनसंशयः

ये मां सम्पूजयिष्यन्ति भक्त्या परमयायुताः ।

तेषां दास्यामि सततं वाञ्छितार्थफलम्भुवि ॥ ६६ ॥

पश्यन्ति प्रयता ये मां कृत्वा नियमपूर्वकम् ।

ते यास्यन्ति पुरं शैवं यावत्कल्पाष्टकायुतम् ॥ ६७ ॥

आरूढाःसूर्यसङ्काशैर्विमानैः सार्वकामिकैः । रुद्रकन्यासमाकीर्णैर्हंससारससंयुतैः ॥
नृत्यवादित्रनिर्घुष्टैरुत्कटध्वनिनादितैः । दोधूयमानैश्च नरैः स्तूयमानाः सुरासुरैः ॥

प्रसङ्गाद्भक्तिहीनोऽपि यो मां पश्यत्यशाठ्यतः ।
ऐश्वर्यं तस्य दास्यामि ह्युत्तरेषु कुरुष्वथ ॥ ७० ॥

स्मरिष्यति च यो नित्यंप्रभातेचोत्तरेश्वरम् । स यातिपरमंस्थानंदाहप्रलयवर्जितम्
एष ते कथितो देवि! प्रभावः पापनाशनः । उत्तरेश्वरदेवस्य शृणु त्रिलोचनेश्वरम् ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्य उत्तरेश्वरमाहात्म्यवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः

त्रिलोचनेश्वरमाहात्म्यवर्णनम्

श्रीदेवदेव उवाच

पञ्चचत्वारिकं विद्धि देवं त्रिलोचनेश्वरम् । यस्यदर्शनमात्रेण सर्वसिद्धिरवाप्यते ॥
इतिहासमिहासीद्यत्पीठे विरजसञ्ज्ञके । त्रिलोचनस्यप्रासादेमणिमाणिक्यनिर्मिते
नानाभङ्गिगवाक्षाढ्ये रत्नसानाविवापरे । देदीप्यमानसौवर्णकलशेन विराजिते ॥
पार्वणेन शशाङ्केन खेदादिव समासिते । तत्र पारावतद्वन्द्वं वसत्स्वैरं कृतालयम्

प्रातः सायं च मध्याह्ने कुर्वन्नित्यं प्रदक्षिणम् ।
उड्डीयमानं परितः पक्षपातैरितस्ततः ॥ ५ ॥

रजःप्रासादसँल्लग्नं दूरीकुर्वद्दिशो दश । त्रिलोचनेति सततं नाम भक्तैरुदाहृतम् ॥

त्रिविष्टपेति च तथा तयोः कर्णातिथीभवेत् ॥ ६ ॥

चतुर्विधानिवाद्यानि शम्भुप्रीतिकराण्यलम् । तयोःकर्णगुहाम्प्राप्यप्रतिशब्दंप्रतन्वते

मङ्गलारात्रिकज्योतिस्त्रिसन्ध्यं पक्षिणोस्तयोः ।
नेत्रान्तं निर्विशन्नित्यं भक्तचेष्टां प्रदर्शयत ॥ ८ ॥
प्राणयात्रां विहायापि कदाचित्स्थिरमानसौ ।
नोड्डीय वाञ्छितं यातः पश्यन्तौ कौतुकं खगौ ॥ ९ ॥

तत्रासकृज्जनाकीर्णप्रासादंपरितोऽवनौ । तण्डुलादिचरन्तौतौकुर्वन्तौच प्रदक्षिणम्
देवदक्षिणदिग्भागेविष्णुदेहोद्भवञ्जलम् । तृषार्त्तौपिबतोनित्यं स्नात्वाचाजग्मतुश्चतौ
तयोरित्थंविचरतोस्त्रिलोचनसमीपतः । अगाद्बहुतिथःकालोद्विजयोःसाधुचेष्टयोः

अथ देवालयस्कन्धे गवाक्षान्तर्गतौ च तौ ।
श्येनेन केनचिद्दृष्टौ क्रूरदृष्ट्या सुखं स्थितौ ॥ १३ ॥

तच्च पारावतद्वन्द्वं श्येनः परिजिघृक्षया । अवतीर्याम्बरादाशु उपविष्टः शिवालये ॥
ततो विलोकयामास तदागमविनिर्गमौ । केनमार्गेण विशतो दुर्गमेण पतत्रिणौ

केनाध्वना च निर्यातः किंकाले कुरुतश्च किम् ।
कथं युगपदेतौ मे ग्राह्यौ स्वैरं भविष्यतः ॥ १६ ॥

दुर्बलोऽप्याकलयितुं सहसारिर्नशक्यते । करिणां च सहस्रेण वराश्वानां च लक्षतः
न कर्म सिद्ध्येन्नृपतेर्दुर्गेणैकेनयद्भवेत । दुर्गस्थोनाभिभूयेत विपक्षःकेनचित्क्वचित्

स्वतन्त्रं यदि दुर्गं स्यादपमार्गप्रकाशकम् ॥ १८ ॥
इति दुर्गे बलं शंसञ्छ्येनो रोषारुणेक्षणः ।
असाध्वसौ कलरवौ वीक्ष्य यातो नभोङ्गणे ॥ १९ ॥

अथ परावती दक्षा विपक्षक्षपणेक्षणम् । महाबलं दुर्गबलात्प्राह पारावतं पतिम् ॥

कलरव्युवाच

प्रिय पारावत प्राज्ञ सर्वकामसुखारव । तव दृग्विषयं प्राप्तः श्येनोऽयं प्रबलो रिपुः ॥
सचतद्वाक्यमाकर्ण्यपारावत्याश्चसत्पतिः । पारावतीमुवाचेदं काचिन्तेतितव प्रिये

पारावत उवाच

कतिनाम न सन्तीह सुभगे व्योमचारिणः । कतिदेवालयाद्येषु खगानोपवसन्तिहि

कति चैव न पश्यन्ति नौ सुखस्थाविह प्रिये! ।
तेभ्यो यदीह भेतव्यं कुतो नौ तत्सुखं प्रिये! ॥ २४ ॥

रमत्वं च मया सार्द्धंत्यजचिन्तामिमां शुभे !। अस्यश्येनवराकस्य गणनापिनमेहृदि।
इत्थंपारावतवराच्छ्रुत्वापारावतीवचः । मौनमालम्ब्यसन्तस्थेपत्युःपादार्पितेक्षणा

हितवत्योपदिश्यापि प्रियं प्रियचिकीर्षया ।
पत्न्या जोषं समास्थेयं कार्यं पत्युर्वचः सदा ॥ २७ ॥

अन्येद्युरप्यथायातःश्येनःपश्यन्सदम्पती । अपरिच्छन्नयादृष्ट्यायथामृत्युर्गतायुषम्
अथमण्डलगत्यास प्रासादम्परितो भ्रमन् । प्रोवाचप्रेयसीनाथदृष्टोदुष्टस्त्वयाऽहितः

तस्या वाक्यं समाकर्ण्य पुनः कलरवोऽब्रवीत् ।
किं करिष्यत्यसौ मुग्धे! मम व्योमविहारिणः ॥ ३० ॥
दुर्गञ्च स्वर्गतुल्यं मे यत्र नास्त्यरितो भयम् ।
अयं न तां गतिं वेत्ति यां वेदाहं नभोङ्गणे ॥ ३१ ॥
प्रडीनोड्डीनसण्डीनकाण्डव्याण्डकपाटिका ।
स्रंसिनी मण्डलवती गतयोऽष्टावुदाहृताः ॥ ३२ ॥

यथैतासुहिकौशल्यं मयि वर्त्तति च प्रिये । गतिषुक्वापिकस्यापिपक्षिणोनतथाम्बरे

सुखेन तिष्ठ का चिन्ता मयि जीवति ते प्रिये !॥ ३३ ॥

इति तद्वचनं श्रुत्वा आस्थिता मूकवत्सती । अपरेद्युरपि श्येनस्तत्रायातः शिलातले
कियदन्तरमासाद्य उपविष्टोऽतिहृष्टवत् । आयामान्तेचसंस्थित्वातत्कुलायकुलस्यच

पुनः श्येनो विनिर्यातः सापि कान्ताऽब्रवीत्पुनः ।
प्रिय! स्थानमिदं त्याज्यं दुष्टदृष्टिविदूषितम ॥ ३६ ॥
असौ क्रूरोऽतिनिकटमुपविष्टोऽतिहृष्टवत् ।
सावज्ञं स पुनःप्राह किं करिष्यत्यसौ प्रिये !॥ ३७ ॥

मृगाक्षीणां स्वभावोऽयं प्रायशोभीरुवृत्तयः । इतरेद्युरपि प्राप्तः सच श्येनोमहाबलः
तयोरभिमुखंतत्र स्थितो यामद्वयावधि । पुनर्विलोक्यतद्वत्म शीघ्रं यातो यथागतम्

गतेऽथ शकुनौ तस्मिन्सा बभाषे विहङ्गमम् ।
नाथ! स्थानान्तरं यावो मृत्युर्वै निकटेऽन्वगात् ॥ ४० ॥

पुनर्दृष्टेप्रणष्टःस्यादावासश्चसुखंप्रिय!। प्रिययस्यास्तिपक्षस्यगतिःसर्वत्रसिद्धिदा

स किं स्वदेशरागेण नाशं प्राप्नोति बुद्धिमान् ।
सोपसर्गं निजं देशं त्यक्त्वा योऽन्यं तु न व्रजेत् ॥ ४२ ॥

स पङ्गुर्नाशमाप्नोति कूलस्थित इवद्रुमः । प्रियोदितं निशम्येतिसभवित्रीदशार्दितः
तां वाक्यं पुनरप्याह प्रिये माभैःखगार्दिता । अपरस्मिन्नहनिच स श्येनः प्रातरेवहि

तद्द्वारदेशमासाद्य सायंयावत्स्थितोऽचलः ।
अस्ताचलस्य शिखरं याते भानौ गते खगे ॥ ४५ ॥
कुलायाद् बाह्यमागत्योवाच पारावती पतिम् ।
नाथ! निर्गमनस्यायं कालः कालोऽस्ति दूरतः ॥ ४६ ॥
यावत्तावद्विनिर्याहि त्यक्त्वा मामपि शंसिनीम ।
त्वयि जीवति दुष्प्राप्यं न किञ्चिज्जगतीतले ॥ ४७ ॥

पुनर्दाराः पुनः पुत्राः पुनर्वसु पुनर्गृहम् । यद्यात्मा रक्षितः पुंसां दारैरपि धनैरपि
तदा सर्वंहरिश्चन्द्रभूपतेरिव लभ्यते । अयमात्माप्रियोबन्धुरयमात्मा महद्धनम् ॥
धर्मार्थकाममोक्षाणामयमात्मार्जकः परः । यावदात्मनि वै क्षेमं तावत्क्षेमं जगत्त्रये
सोऽपिक्षेमः सुगतिना यशसा सहवाञ्छ्यते । यशोहीनं तुयत्क्षेमंतक्षेमान्निधनंवरम्
तद्यशः प्राप्यतेपुम्भिर्नीतिमार्गप्रवर्तिभिः । अतोनीतिपथंचिन्त्यंनाथस्थानादितोव्रज

न व्रजिष्यसि चेत्प्रातस्ततो मां संस्मरिष्यसि ॥ ५२ ॥

इत्युक्तोऽपिसवै पत्न्यापारावत्यासुमेधया । ननिर्ययौततःस्थानाद्भवित्र्याप्रतिवारतः
अथोषसि समागत्य श्येनेन बलिना तदा । निर्गमद्वारमारुद्धं किञ्चिद्भक्ष्यवता तदा
दिनानि कतिचित्तत्रातिष्ठच्छ्येनोमहाबलः । पारावतमुवाचेदंधिक्त्वांपौरुषवर्जितम्

किं वा युध्यस्व दुर्बुद्धे! किं वा निर्याहि मे गिरा ।
क्षुधाक्षीणो मृतः पश्चान्निरयं पश्यसि ध्रुवम् ।

विधिरेव हि साहाय्यं न कुर्यात्तव नोदितम् ॥ ५६ ॥

इत्थंश्येनेन स प्रोक्तः पत्न्या ससहितःखगः । अयुध्यत्तेनश्येनेनस्वदुर्गद्वारमाश्रितः

क्षुधितस्तृषितः सोऽथ श्येनेनबलिना धृतः । चरणेनदृढेनाशु चञ्च्वासापिधृताखगी

तावादायोड्डयाञ्चक्रे श्येनो व्योमनि सत्वरम् ।

चिन्तयन्भक्षणस्थानमन्यत्पक्षिविवर्जितम् ॥ ५९ ॥

अथपत्न्याकलरवः प्रोक्तस्तत्र सुमेधया । यतोऽवमानितानाथत्वयाहंस्त्रीतिबुद्धितः

अतोऽवस्थामिमां प्राप्तः किं कुर्यामबलायतः । अधुनापिवचश्चैकंकरोषियदिमेप्रिय

तदा हितं तेवक्ष्यामिकुर्वैतदविचारितम् । ममैकवाक्यकरणात्स्त्रीजितोनभविष्यसि

यावदास्यं गतास्म्यस्य यावत्खस्थो न भूमिगः ।

तावदात्मविमुक्तयै त्वं चञ्च्वा पादं दृढं दश ॥ ६३ ॥

इतिपत्नीवचःश्रुत्वा तथा स गतवान्खगः । स पीडितोदृढंपादे श्येनश्चीत्कृतवान्बहु

तेन चीत्करणेनाथ मुक्ता सा मुखसम्पुटात् ।

पादाङ्गुलीनां शून्यत्वे सोऽपि पारावतोऽपतत् ॥ ६५ ॥

विपद्यपिचप्राज्ञैर्न सन्त्याज्यः क्वचिदुद्यमः । क्वचचञ्चुपुटस्तस्यक्वचतत्पादपीडनम्

क्व च द्वयोस्तथाभूतं दूरेमोक्षणमद्भुतम् । दुर्बलेऽप्युद्यमःश्रेयानितिशास्त्रेषु गीयते

तस्माद्भाग्यानुसारेण फलत्येव सदोद्यमः । प्रशंसन्त्युद्यमंचातो विपद्यपिमनीषिणः

अथ तौ कालयोगेन जम्बूमार्गे मृतौ तदा । जम्बूमार्गे मृतायेवैतेषांस्वर्गःसदाऽक्षयः

पुण्यशेषे तदा जातो गन्धर्वतनयः शुभः । मन्दारदामतनयो नाम्ना परिमलालयः ॥

अनेकविद्यानिलयः कलाकौशलभाजनम् । कौमारं वपुरासाद्य शिवभक्तिपरोऽभवत्

नियमं चापिजग्राहविजितेन्द्रियमानसः । एकपत्नीव्रतंनित्यंचरिष्यामीतिनिश्चितम्

परयोषित्समासक्तिरायुः कीर्तिर्बलं सुखम् ।

हरेत्स्वर्गगतिं चापि तस्मात्तां वर्जयेत्सुधीः ॥ ७३ ॥

अपरंचापिनियमं सशुचिष्मान्समाददे । गतजन्मांतराभ्यासात्त्रिलोचनसमाश्रयात्

समस्तपुण्यनिलयः समस्तार्थप्रकाशकः । समस्तकामजनकं परानन्दैककारणम्

यावच्छरीरं निरुजं यावन्नेन्द्रियविप्लवः ।

तावत्त्रिलोचनोऽवन्त्यां मन्तव्यो नात्र संशयः ॥ ७६ ॥

इत्थं मन्दारदामिःसकाश्यांपरिमलालयः । नित्यंत्रिविष्टपंद्रष्टुंसमागच्छेत्प्रयत्नतः

पारावत्यपि सञ्जाता रत्नदीपस्य मन्दिरे । नागराजस्यपाताले नाम्ना रत्नावलीति च

समस्तनागकन्यानां रूपशीलकलागुणैः । एकैव रत्नभूताऽऽसीद्रत्नदीपोरगात्मजा

तस्याःसखीद्वयंचासीदेकानाम्ना प्रभावती । कलावतीतथान्याच नित्यंतदनुगे शुभे

स्वदेहादनपायिन्यौ छायाकान्तीयथातथा । पूर्वं सख्यौभवेतांहिरत्नावल्यामहेश्वरि

सा तु बाल्येव्यतिक्रान्तेकिञ्चिदुद्भिन्नयौवना । शिवभक्तंस्वपितरंदृष्ट्वानियममग्रहीत्

पितस्त्रिलोचनं काश्यामर्चयित्वा दिने दिने ।

आभ्यां सखीभ्यां सहिता मौनं त्यक्ष्यामि नान्यथा ॥ ८३ ॥

एवं नागकुमारीसा सखीद्वयसमन्विता । त्रिलोचनं समभ्यर्च्य गृहानहरहर्व्रजत् ॥

मां प्रत्यग्रैः सकुसुमैः सुशुभैरिष्टगन्धिभिः ।

सुविचित्राणि माल्यानि परिगुम्फ्याऽर्चयेद्विभुम् ॥ ८५ ॥

तिस्रोऽपि गीतं गायन्ति ललितं चैव सुस्वरम् ।

नारीमण्डलभेदेन लास्यं तिस्रोऽपि कुर्वते ॥ ८६ ॥

वीणावेणुमृदङ्गांश्च लयतालविचक्षणाः ।

वादयन्ति मुदा युक्तास्तिस्रोऽपि विरमन्ति वै ॥ ८७ ॥

इत्थमाराधयन्तीशंतिस्रोनागकुमारिकाः। विचित्रभङ्गीमालाभिरर्चयन्त्यस्त्रिलोचनम्

प्रातश्चतुर्थ्यां ताः स्नात्वा तीर्थे पिलिपिले शुभे ।

त्रिलोचनं समर्च्याथ प्रसुप्ता रङ्गमण्डपे ॥ ८९ ॥

सुप्तासुतासु स शिवस्त्रिनेत्रःशशिभूषणः । वामार्द्धविलसच्छक्तिर्नागयज्ञोपवीतकः

लिङ्गादेव हि निर्गत्य गङ्गापन्नगमेखलः । प्रत्युवाच ततः कन्या विभुरुत्तिष्ठतेतिसः

उत्थायता विनिर्मथ्य लोचने श्रुतिसङ्गमे । अङ्गमोटनवत्यश्च तदानिर्घूर्णितेक्षणाः

यावत्पश्यन्ति पुरतःसम्भ्रमापन्नमानसाः । अतर्किततागमस्तावत्ताभिर्दृष्टस्त्रिलोचनः

ववन्दिरेऽथ ता बाला ज्ञात्वा लक्ष्मभिरीश्वरम् ।

तुष्टुवुश्च प्रहृष्टास्ताः सन्नकण्ठ्योऽतिविक्लवम् ॥ ९४ ॥

जयशम्भो जयेशान जयसर्वग सर्वद । जय त्रिपुरसंहर्तर्जयान्धकनिषूदन ॥ ९५ ॥

जय जालन्धरहर! जयकन्दर्पदर्पहृत् । जय त्रैलोक्यजनक जय त्रैलोक्यवन्दित !॥

जय भक्तजनाधीश जय प्रमथनायक !॥ ९६ ॥

नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमोनमः ।

त्रिलोचन! नमस्तुभ्यं त्रिविष्टप! नमोऽस्तु ते ॥ ९७ ॥

इत्युक्त्वा दण्डवद् भूमौ प्रणिपेतुःकुमारिकाः ।

अथोत्थाप्य कुमारीस्ताः प्रोवाच शशिभूषणः ॥ ९८ ॥

सुतो मन्दारदाम्नश्च नाम्ना परिमलालयः । पतिर्विद्याधरवरो भवतीनां भविष्यति

चिरं विद्याधरे लोके भोगान्भुक्त्वा समन्ततः ।

ततो ह्यवन्तिकां प्राप्य मां ध्यात्वा सिद्धिमाप्स्यथ ॥ १०० ॥

जन्मान्तरेऽपिमे भक्तिर्भवतीभिश्चतेन च । विहितातेनवोजन्मनिर्मलम्भक्तिभावितम्

एतत्प्रभावतीस्तोत्रंयेपठिष्यन्तिमे पुरः । तेभ्यःकामान्प्रदास्यामि भवतीनामयंवरः

इत्युक्तवतिदेवेशे ताः कन्या हृष्टमानसाः । प्रणम्यप्रोचुरीशानं प्रबद्धकरसम्पुटाः ॥

नागकन्या ऊचुः

पृच्छामो ब्रूहि नो नाथ करुणाकर शङ्कर !। जन्मान्तरे कथं सेवा चतुर्भिर्भवतः कृता

ततः प्राक्तनवृत्तान्तमेतस्यापिकृतात्मनः । अस्माकमपिचाख्याहि कृपांकुरुकृपानिधे!

इतिश्रुत्वाप्रणयतोबालोदीरितमीप्सितम् । प्रोवाचतासामपिचभवान्तरविचेष्टितम्

ईश्वर उवाच

शृणुध्वं नागतनयास्तिस्रोऽपि हि समाहिताः ।

प्राग्भवं भवतीनाञ्चतस्यापिकथयाम्यहम् ॥ १०७ ॥

एषारत्नावलीपूर्वमासीत्पारावती खगी । स च विद्याधरवरःपतिरस्याःखगोऽभवत्

प्रासादे च ममैताभ्यामुषितं सुचिरं सुखम् ।

रजः प्रासादसँल्लग्नं नुन्नं पक्षानिलैः पुनः ॥ १०९ ॥

उपरिष्टादधस्ताच्चकृताभूरिप्रदक्षिणाः । व्योम्नि सञ्चरमाणाभ्यांसञ्चीर्णंचममाजिरे

स्नातं चतुर्नदे तीर्थे पीतं तत्राम्बुचासकृत् । आभ्यांकलरवाभ्याञ्च कृताःकलरवामुदा

एताभ्यां स्थिरचित्ताभ्यां मुदिता त्वमतीव हि ।

दृष्ट्वा हि कौतुकान्यत्र मम भक्तैः कृतान्यपि ॥ ११२ ॥

अमूभ्यांबहुशो दृष्टा मम मङ्गलदीपिकाः । पीतंश्रुतिपुटाभ्याञ्च नम नामाक्षरामृतम्

तिर्यग्योनिप्रभावेण न मृतौ मम सन्निधौ ॥ ११३ ॥

जम्बूमार्गे मृतौ यस्मात्स्वर्गप्राप्तिकरे ध्रुवम् ।

तस्मात्पारावती ह्येषा रत्नदीपसुताऽभवत् ॥ ११४ ॥

पतिःपारावतोऽस्याश्चजातो विद्याधराङ्गजः । एषाप्रभावतीनागीनागराजस्यसद्मनि

इह जन्मनि कन्यासीत्पूर्वजन्म ब्रवीमि च ॥ ११५ ॥

त्रिशिखस्योरगेन्द्रस्यसुताचेयंकलावती । एतस्याअपिवृत्तान्तंनिशामयतुवच्म्यहम्

भवान्तरेतृतीयेऽतःकन्येचारायणस्यच । आस्तांमहर्षेः शीलाढ्ये प्रेमवत्यौपरस्परम्

पित्रा चारायणेनापि ताभ्यां सम्प्रेरितेन वै ।

आमुष्यायणपुत्राय दत्ते नारायणाय हि ॥ ११८ ॥

अप्राप्तयौवनोऽरण्ये समिदाहरणाय वै । गतो विधिवशादृष्टो दन्दशूकेन कानने ॥

भवानीगौतमीनाम्न्यौ ते तु चारायणाङ्गजे । वैधव्यदुःखमापन्ने दैन्यग्रस्ते बभूवतुः

अत एव प्रयत्नेन परिणेता विवर्जयेत् ।।देवतासरिदाह्वान कन्यापाणिग्रहं सुधीः ॥

अथर्षेः कस्यचिद्दैवादाश्रमे देवसन्निभे । रम्भाफलान्यदत्तानि मोहाज्जग्रहतुस्तदा ॥

कृत्वा नानोपवासादिव्रतानि ब्राह्मणाङ्गजे ।

अध्यास्य निधनं कालाच्छाखामृग्यौ बभूवतुः ॥ १२३ ॥

फलचौर्यविपाकेन वानरत्वं तयोरभूत् । शीलरक्षणभावेनावन्त्यां जनिमवापतुः ॥

स च नारायणोविप्रः पितृशुश्रूषणे रतः । दष्टोऽपिदन्दशूकेन काश्यांपारावतोऽभवत्

एवं भवान्तरे चासीदेतयोःपतिरेव सः । तिसृणांभवतीनां च भावी भर्ता पुनःसवै

प्रासादस्यापि पार्श्वे तु न्यग्रोधश्च महानगः ।
तस्मिञ्छाखिनि वासाढ्ये शाखामृग्यौ बभूवतुः ॥ १२७ ॥
विष्णुदेहजले तीर्थे क्रीडया च ममज्जतुः । पपतुश्चापिपानीयं तस्मिंस्तीर्थेतृषातुरे
जातिस्वभावचापल्यात्क्रीडन्त्यौ च प्रदक्षिणम् ।
चक्रतुर्बहुकृत्वश्च लिङ्गं दद्दशतुर्बहु ॥ १२६ ॥
विचरन्त्यावितः स्वैरं तत्र न्यग्रोधसन्निधौ । केनचिद्योगवेषेण पाशेनचनियन्त्रिते
भिक्षार्थं शिक्षिते तेन न प्लुतिर्ननिवर्त्तनम् । अथ ते क्वापिमर्कट्यौ कालधर्मवशंगते
अवन्तीवासपुण्येन त्रिलोचनस्य सेवया । प्रादक्षिण्यानुरूपेण जाते नागसुते अपि
अधुना तं पतिम्प्राप्य विद्याधरकुमारकम् ।
निर्विश्य स्वर्गभोगांश्चावन्त्यां निर्वृतिमाप्स्यथ ॥ १३३ ॥
यैरल्पमपि चावन्त्यां कृतं कर्म शुभाशुभम् ।
तस्य मोक्षः परीपाको निश्चितं मदनुग्रहात् ।
त्रैलोक्येऽपि च सर्वस्मिञ्छ्रेष्ठाऽवन्तीपुरी सदा ॥ १३४ ॥
ततोऽपि लिङ्गमोङ्कारं ततोऽप्यत्र त्रिलोचनम् ।
तिष्ठमानोऽत्र लिङ्गेऽहं भुक्तिं मुक्तिं ददामि वै ॥ १३५ ॥
अतःसर्वप्रयत्नेनावन्त्यांपूज्यस्त्रिलोचनः । इत्युक्त्वादेवदेवेशस्तत्प्रासादान्तरेऽविशत्
लिङ्गस्वरूपमासाद्य शुभं त्रिभुवनादपि । ताश्चस्वसदनं प्राप्यतद्वृत्तान्तमशेषतः॥
स्वमातुः पुरतश्चोक्त्वा कृतकृत्या इवाऽभवन् ॥ १३७ ॥
एकदा माधवेमासि सहसार्थाः समागताः ।
विद्याधरास्तथा नागा मिलिताः सपरिच्छदाः ॥ १३८ ॥
विरजस्के महाक्षेत्रे त्रिलोचनसमीपतः । देवस्यवरदानाच्चपृष्ट्वाऽन्योन्यं कुलावलिम्
विद्याधरायताः कन्या नागैस्तिस्त्रोऽपि कल्पिताः ।
मन्दारदामा सन्तुष्टः प्राप्य तच्च स्नुषात्रयम् ॥ १४० ॥
रत्नदीपैश्चनागेन्द्रःपद्मी च भुजगेश्वरः । विशिखोऽपिफणीन्द्रश्च दृष्ट्वा एतेत्रयोऽपि

जामातरं समासाद्य शुभं परिमलालयम् ॥ १४१ ॥
अन्योऽन्यं स्वजनास्ते तु मुदा विकसितेक्षणाः ।
विवाहोत्सवमारच्य स्वं स्वं भवनमाविशन् ॥ १४२ ॥
त्रिलोचनस्य लिङ्गस्य वर्णयन्तोऽपि गौरवम् ।
स च विद्याधरः श्रीमान्नागीभिर्विपुलं सुखम् ॥
भुक्त्वाऽवन्तीं ततः प्राप्य संसेव्य च त्रिलोचनम् ॥ १४३ ॥
गायन्गीतंसुमधुरंनागीभिः सहितःकृती । आत्मानंचातिविस्मृत्यमध्येलिङ्गंलयंगतः
त्रिलोचनस्य महिमा कलौ देवेनगोपितः । ततोऽल्पसत्त्वा मनुजान तल्लिङ्गमुपासते
त्रिलोचनकथामेतां श्रुत्वा पापान्वितोऽप्यहो ।
विपापो जायते मर्त्यो लभते च परां गतिम् ॥ १४६ ॥
एष ते कथितो देवि! प्रभावःपापनाशनः । त्रिलोचनस्य देवस्य शृणु वीरेश्वरंपरम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये त्रिलोचनमाहात्म्यवर्णनंनाम
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः

वीरेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

षट्चत्वारिंशकं देवि! वीरेश्वरमथो शृणु । यस्य दर्शनमात्रेणकुलवृद्धिर्भवेद्ध्रुवम्
निशामय महा देवि! वीरेशाविर्भवं परम् । यच्छ्रुत्वा पितरःपुण्यंप्राप्नुयुर्विपुलं शिवे!
आसीदमित्रजिन्नाम राजा परपुरंजयः । धार्मिकः सत्त्वसम्पन्नः प्रजारञ्जनतत्परः ॥३
यशोधनो वदान्यश्च सुधीर्ब्राह्मणदैवतः । सदैवावभृथस्नातः परिक्लिन्नशिरोरुहः ॥

विनीतो नीतिसम्पन्नः कुशलः सर्वकर्मसु । विद्याविशारश्चाथ गुणवान्गुणिवत्सलः

कृतज्ञो मधुरालापः पापकर्मपराङ्मुखः ।

सत्याञ्छौचनिलयः सत्यवाग्विजितेन्द्रियः ॥ ६॥

रणांगणे कृतान्तस्य सङ्ख्यावांश्च सदोजिरे ।

कामिनीकेलिकालज्ञो युवाऽपि स्थविरप्रियः ॥ ७ ॥

धर्मार्थधनकोशश्च समृद्धबलवाहनः । सुभगश्च सुरूपश्च सुमेधाः सुप्रजाप्रियः ॥ ८ ॥

स्थैर्यधैर्यसमापन्नो देशकालविचक्षणः । मान्यानां मानदो नित्यंसर्वदूषणवर्जितः॥

वासुदेवाङ्घ्रियुगले चेतोवृत्तिं निधाय च ।

चकार राज्यं निर्द्वन्द्वं धिग्धिगीतिविवर्जितम् ॥ १० ॥

अलङ्घ्यशासनः श्रीमान्विष्णुभक्तिपरायणः ।

अभुनक्प्रवरान्भोगान्समन्ताद्विष्णुसंस्कृतान् ॥ ११ ॥

हरेराराधनान्युच्चैः प्रतिसौधं पदेपदे । तस्य राज्ये समभवन्महाभागनिधेः शिवे !

गोवृन्दगोपगोपालगोपीजनमनोहर !। गदापाणे ! गुणातीत! गुणाढ्य! गरुडध्वज!

केशिहन्कैटभाराते! कंसारे! कमलापते !॥ १४ ॥

कृष्ण केशव! कञ्जाक्ष! कीनाशभयनाशन !। पुरुषोत्तम पापारे पुण्डरीकविलोचन !॥

पीतकौशेयवसन! पद्मनाभ! परात्पर !। जनार्द्दन! जगन्नाथ! जाह्नवीजलजन्मभूः ॥

जन्मिनां जन्महरण! जंजपूकौघनाशन !। श्रीवत्सवक्षः!श्रीकण्ठ!श्रीकरश्रेयसांनिधे!

श्रीरङ्गशार्ङ्गकोदण्ड! शौरेशीतांशुलोचन !। दैत्यारे! दानवाराते!दामोदर! दुरन्तक!

देवकीहृदयानन्द! दन्दशूकेश्वरेशय । विष्णो ! वैकुण्ठनिलय! बाणारे !विष्टरश्रवः !

विष्वक्सेन! विभो! वीर! वनमालिन्बलिप्रिय !।

त्रिविक्रम! त्रिलोकेश! चक्रपाणे! चतुर्भुज !॥ २० ॥

इत्यादीनि पवित्राणि नामानि प्रतिमन्दिरे । स्त्रीवृद्धबालगोपालवदनोदीरितानितु

श्रूयन्ते यत्र कुत्रापि रम्याणिमधुविद्विषः । सुरम्यकाननान्येवविलोक्यन्ते गृहे गृहे

विचित्राणि चरित्राणि गीयते च गृहे गृहे ।

सौधभित्तिषु दृश्यन्ते चित्राणि कृत्रिमाणि च ॥ २३ ॥

ऋतेहरिकथायास्तु नान्यावार्त्तानिशम्यते । हरिणानैववध्यन्ते हरिणामांसधारिणः

तस्यराज्ञो भयाद्व्याधैररण्ये सुखचारिणः । नमत्स्यानैव च बकावराहाश्चनकेनचित्

हन्यन्ते क्वापि तद्भात्या मत्स्यमांसाशिनाऽपि वै ।

अपुत्रा न नरास्तस्य राष्ट्रेऽमित्रजितः क्वचित् ॥ २६ ॥

स्तनपानं न कुर्वन्ति संप्राप्य हरिवासरम् । पशवोऽपि तृणाहारं परित्यज्य हरेर्दिने

उपोषणपरा जाता अन्येषां का कथा नृणाम् ॥ २ ७ ॥

महामहोत्सवः सर्वैः पुरौकोभिर्वितन्यते । तस्मिन्प्रशासति भुवंसंप्राप्ते हरिवासरे

यो विष्णुभक्तिरहितः प्राणैरपि धनैरपि ।

सएवदण्ड्यो भुङ्क्ते यो राज्ञोऽमित्रजितः क्षितौ ॥ २९ ॥

अन्त्यजा अपि तद्राष्ट्रे शङ्खचक्राङ्कधारिणः ।

सम्प्राप्य वैष्णवीं दीक्षां दीक्षिता इति संस्थिताः ॥ ३० ॥

शुभानि यानि कर्माणिक्रियन्तेऽनुदिनंजनैः । वासुदेवेसमर्प्यन्तेतानितैरफलेप्सुभिः

विनामुकुन्दगोविन्दपरमानन्दमच्युतम । नान्योजप्येत नम्येतसभाज्येतजनःक्वचित्

कृष्ण एव परो बन्धुस्तस्यासीदवनीपतेः ॥ ३२ ॥

एवंतस्मिन्महीपालेराज्येसम्यक्प्रशासति । एकदानारदःश्रीमांस्तंदिदृक्षुःसमाययौ

राज्ञा समर्चितः सोऽथ मधुपर्कविधानतः । नारदो वर्णयामास तममित्रजितं नृपम्॥

श्रीनारद उवाच

धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम् ।

सर्वभूतेषु गोविन्दं परिपश्यन्विशाम्पते !॥ ३५ ॥

यो वेदपुरुषोविष्णुर्योयज्ञपुरुषोहरिः । योऽन्तरात्मास्यजगतःकर्त्ताहर्ताऽविताविभुः

तन्मयं पश्यतो विश्वं तव भूपालसत्तम । दर्शनं प्राप्य शुभदं शुचित्वमगमं परम् ॥

एष एव हि सारोऽत्र संसारे क्षणभङ्गुरे । कमलाकान्तपादाब्जभक्तिभावोऽखिलप्रदः

परित्यज्य हि यः सर्वं विष्णुमेकं सदा भजेत् ।

सुमेधसं भजन्ते तं पदार्थाः सर्व एव हि ॥ ३६ ॥
हृषीकेशेहृषीकाणियस्यस्थैर्यंगतान्यहो । सएवस्थैर्यमाप्नोति ब्रह्माण्डेऽतीवचञ्चले
यौवनं धनमायुष्यं जलं पद्मदले यथा । अतीव चञ्चलं ज्ञात्वाऽच्युतमेव सदाश्रयेत्
वाचि चेतसि कर्णेऽथ यस्य देवो जनार्दनः ।
स एव सर्वदा वन्द्यो नररूपी जनार्दनः ।
निर्व्याजप्रणिधानेन शीलयित्वा श्रियः पतिम् ॥ ४२ ॥
पुरुषोत्तमतां को नप्राप्तस्त्वमिवभूतले । अनयाविष्णुभक्त्यातेसन्तुष्टेन्द्रियमानसः
उपकर्तुमना ब्रूयां तन्निशामय भूपते !॥ ४३ ॥
मालाविद्याधरसुता नाम्ना मलयगन्धिनी । क्रीडन्ती पितुराक्रोडेहृताकङ्कालकेतुना
कपालकेतुपुत्रेण दानवेन बलीयसा । आगामिन्यांतृतीयायां तस्याःपाणिग्रहः किल
पाताले चम्पकावत्यां नगर्यां सास्ति साम्प्रतम् ।
हाटकेशात्समागच्छंस्तयाऽहं साश्रुनेत्रया ॥ ४६ ॥
दृष्टः प्रणम्य विज्ञप्तो यथा तच्च निशामय । ब्रह्मचारिन्मुनिश्रेष्ठ! गन्धमादनशैलतः ॥
बालक्रीडनकासक्तां मां जह्रे त्रस्तमानसाम् ।
कङ्कालकेतुदुर्वृत्तस्तस्य नास्ति च घातकः ॥ ४८ ॥
स स्वत्रिशूलघातेन म्रियते नान्यथा रणे । जगत्पर्याकुलीकृत्य निद्रात्यथविनिर्भयः
यदि कोपि कृतज्ञो मां हत्वेमं दुष्टदानवम् । मद्दत्तेन त्रिशूलेन नयेद्भद्रं च वै कृतम् ॥
यद्यत्रोपचिकीर्षुस्त्वं रक्ष मां दुष्टदानवात् । ममापि हिवरोदत्तोभगवत्योमयापुरा
विष्णुभक्तो युवा धीमान्पुत्रि! त्वां परिणेष्यति ॥ ५१ ॥
आतृतीयातिथि यथा तद्वाक्यं तथ्यतां व्रजेत् ।
तथा निमित्तमात्रं त्वं भव यत्नं समाचर ॥ ५२ ॥
इति तद्वचनाद्राजन्विष्णुभक्तिपरायणम् । युवानं चापि धीमन्तंत्वामनुप्राप्तवानहम्
तद्गच्छ कार्यसिद्ध्यै त्वं हत्वा तं दुष्टदानवम् ।
आनयाऽऽशु महाबाहो! शुभां मलयगन्धिनीम् ॥ ५४ ॥

सातुविद्याधरीबालाविलोक्यत्वांनरेश्वर ।अवश्यमेवतच्छूलंदास्यतीतिविनिश्चितम्
पार्वतीवचनाद् दुष्टं घातयिष्यस्यसंशयम् ॥ ५५ ॥
इतिनारदवाक्यंसनिशम्यामित्रजिन्नृपः । अनल्पोत्कलिकोजातोविद्याधरसुतांप्रति
उपायं चापि पप्रच्छ गन्तुं वै चम्पकावतीम् ॥ ५६ ॥
नारदेन पुनः प्रोक्तः स राजा गिरिराजजे !। तूर्णमर्णवमासाद्य पूर्णिमादिवसे नृप !
भवान्द्रक्ष्यति पोतस्थकल्पवृक्षरथास्थिताम् ।
तत्र दिव्याङ्गनां काञ्चिद्दिव्यपर्यङ्कसुस्थिताम् ।
वीणामादाय गायन्तीं गाथामत्यन्तसुस्वरम् ॥ ५८ ॥
यत्कर्म विहितं येनशुभंवाप्यथवाऽशुभम् । सएवभुङ्क्तेतत्तथ्यं विधिस्तत्रनियन्त्रितः
गाथामिमां तु सङ्गीय सरथा समहीरुहा । सपर्यङ्काक्षणादेवमध्येसिन्धुं प्रवेक्ष्यति
भवानप्यविशङ्कं च ततः पोतान्महार्णवे । तमनुव्रजतु क्षिप्रं यज्ञवाराहसात्मवान् ॥
ततो द्रक्ष्यसि पाताले नगरीं चम्पकावतीम् । महामनोहरांराजन्सनाथांबालयातया
इत्युक्त्वान्तर्हितो देवि स चतुर्मुखनन्दनः । राजाप्यर्णवमासाद्ययथोक्तंपरिलक्ष्य च
विवेशान्तःसमुद्रं चनगरीमाससाद ताम् । सापिविद्याधरीबालानेत्रयोःप्राघुणीकृता
तेन राज्ञा त्रिजगतीसौन्दर्यश्रीरिवैकिका । पाताले देवतेयं वाममनेत्रोत्सवायकिम्
निरमायिममोद्वेशात्स्रष्टृसृष्टिर्विलक्षणा । कुहूराहुभयद्वेषात्कान्तिश्चान्द्रमसीकिमु
योषिद्रूपंसमाश्रित्यतिष्ठत्यत्राकुतोभया ।इत्थंक्षणंचनिर्वर्ण्यसराजाऽगच्छदन्तिकम्
सा विलोक्याथ तं बालं नितरां मधुराकृतिम् ।
विशालोरःस्थलतलप्रलम्बतुलसीस्रजम् ॥ ६८ ॥
शङ्खचक्राङ्कसुभगभुजद्वयविराजितम् । हरिनामाक्षरसुधासुधौतरदनावलिम् ॥
भवानीभक्तिबीजोत्थभूरुहं पुरुषाकृतिम् । अनेनात्र कृतं कस्य भवनं मधुराकृति ॥
इति पर्याकुलीकृत्य चक्षुषीच मुहुर्मुहुः । कङ्कालकेतुदुर्वृत्तस्तवबध्यः परहेतिभिः
तावद्गुप्तं समातिष्ठ शस्त्रागारेऽत्र गह्वरे ।
न मे कन्याव्रतं भग्नं सामर्थ्याच्चण्डिकावरात् ॥ ७२ ॥

आगामिन्यां तृतीयायां परश्वः पाणिपीडनम् ।
स चिकीर्षति दुष्टात्मा गतायुर्मम शापतः ॥ ७३ ॥
मा तद्ब्रवीति कुरु युवंस्त्वत्कार्यं भविताऽचिरात् ।
विद्याधर्येति चोक्तः स शस्त्रागारे निगूढवत् ॥ ७४ ॥
स्थिरो वीरो महाबाहुर्दानवागमनेक्षणः ॥ ७५ ॥

अथसायं समायातोदानवोभीषणाकृतिः। त्रिशूलं कलयन्पाणौमृत्योरपिभयावहम् आगत्य दानवो रौद्रः प्रलयाम्बुदनिस्वनः । विद्याधरीं जगादेति मदाघूर्णितलोचनः गृहाणेमानि रत्नानिदिव्यानिवरवर्णिनि । कन्यात्वंहिपरश्वस्तेपाणिग्राहोभविष्यति दासीनामयुतं प्रातर्दास्यामि तवसुन्दरि !। आसुरीणांसुरीणांच दानवीनांमनोहरम्

गन्धर्वीणां किन्नरीणां सततंपरिचारिकाः ।
विद्याधरीणां नागीनां यक्षीणां च शतानि षट् ॥ ८० ॥

राक्षसीनां शतान्यष्टौशतमप्सरसांवरम् । एतास्तेपरिचारिण्योभविष्यन्त्यमलाशये यावत्सम्पत्तिसंभारो दिक्पालानां गृहेषुवै । मत्परिग्रहतां प्राप्तौतावतस्त्वंमहेश्वरी

दिव्यान्भोगान्मया सार्द्धं भोक्ष्यसे मत्परिग्रहात ।
कदा परश्वो भविता यस्मिन्वैवाहिको विधिः ॥ ८३ ॥

त्वदंगसंगसंस्पर्शसुखस्वादातिमेदुरः । परांनिर्वृतिमाप्स्यामि परश्वोनिकटं यदि मनोरथाश्चिरं यावद्ये मेहृदि समेधिताः । तान्कृतार्थीकरिष्यामि परश्वस्तवसंगमात्

जित्वा देवान्रणे सर्वानिन्द्रादीन्मृगलोचने !।
त्रैलोक्यैश्वर्यसंपत्तेस्त्वां करिष्यामि चेश्वरीम् ॥ ८६ ॥

आधायाङ्केत्रिशूलं सुष्वापेतिप्रलप्यसः । नरमांसस्यस्वादेनप्रमत्तोवीतसाध्वसः वरंस्मरन्ती सागौर्या विद्याधरकुमारिका । विज्ञायतं प्रमत्तंचप्रसुप्तं चातिनिर्भयम्

आहूय तं नरवरं वरं सर्वाङ्गसुन्दरम् ॥ ८८ ॥

विष्णुभक्तिकृतत्राणं प्राणनाथेतिजल्पयच । शूलंतदंकादादाय ददौ तस्मै च सुन्दरी तमादायत्रिशूलंच स तदाऽमित्रजिन्नृपः । संस्मरंश्चक्रिणं चित्ते जगद्रक्षामणिंहरिम्

जगादोत्तिष्ठ रे दुष्ट कन्यादूषणलालस । युध्यस्वच मया सार्द्धं न सुप्तं हन्म्यहं रिपुम् इतिसंश्रुत्यसम्प्राप्तःकस्यदृष्टोऽद्यचान्तकः । कआयुषाद्यसंत्यक्तोयःप्राप्तोममगोचरम् मम प्रचण्डदोर्दण्डकण्डूकण्डूयनक्षमः। मर्त्यो नरोऽयं भविताकिंत्रिशूलेनसुन्दरि मा भैर्मैं कौतुकं पश्य भक्ष्योऽयं ममसांप्रतम् । कालेनमत्तोभीतेनस्वयमेवोपढौकितः

इत्युक्त्वा मुष्टिघातेन तेनोच्चैर्दण्डसूनुना ।
हृदये निहतो राजा शिलातिकठिने द्रुतम् ॥ ६५ ॥
स चक्रिणा कृतत्राणः पीडां नाल्पीयसीमपि ।
विवेद कठिनोरस्कः करस्तस्य प्रपीडितः ॥ ६६ ॥

अथ कोपवता राज्ञाहतो वक्त्रे चपेटया । आघूर्णितशिरा भूमौ पतित्वा पुनरुत्थितः

उवाच च वचोधैर्यमवष्टभ्य महाबली ॥ ६७ ॥

दानव उवाच

ज्ञातं तत्त्वंमनुष्योऽसि नृरूपेणचतुर्भुजः । ततस्त्वंछिद्रमासाद्यहन्तुंमां दानवान्तक एवंविधो हि मधुभिद्यदि त्वंबलवानसि । विहायैतन्महच्छूलं युध्यस्वस्वायुधैर्मया त्वया कपटरूपेण बलिना कैटभादयः । न बलेन हताः सङ्ख्येहता एव च्छलेन हि बलिपातालमनयस्त्वं नृवामनतांदधत् । नृमृगत्वेन भवता हिरण्यकशिपुर्हतः ॥१०१ तथा जटिलरूपेणलङ्केशोविनिपातितः । गोपालवेषमालम्ब्यकंसाद्याघातितास्त्वया

स्त्रीभूय चाहरस्त्वं हि विप्रतार्याऽसुरान् सुधाम ॥ १०२ ॥

यादोरूपेण भवता शंखाद्यानिहता इह । मायाविनात्वयाऽगण्याः सर्वमर्मज्ञ माधव न त्वत्तोऽहं बिभेम्यद्य सद्यःपातः शरीरिणाम् । वरंतव श्रयेमृत्युं बलेनापिछलेनवा

न त्यक्ष्यसि त्रिशूलं त्वं न त्वां योत्स्याम्यहंरणे ।
अवश्यमेव मर्त्तव्यं मया प्रातः शरीरिणा ॥ १०५ ॥

इयंविद्याधधरीकन्यानमया दूषितासती । साक्षाच्छ्रीरिवमन्तव्यातवार्थंरक्षितामया इत्युक्त्वा वामदोर्दण्डप्रहारेणापिनिष्ठुरम् । निजघानदनोःसूनुस्तं शिलोच्चयवातिना नृपतिस्त्वथ संधार्य विषह्य रणमूर्द्धनि । जघानाशु तदा क्रूरं त्रिशूलेनाथ वक्षसि ॥

तत्प्रहारान्महाबाहुः पञ्चत्वमगमत्क्षणात् । लक्ष्यीचकारतद्वक्त्रं त्रिशूलंतोलयन्करे
पश्यतोऽस्य महाबाहोः स च प्राणाञ्जहौ क्षणात् ।
इत्थं कङ्कालकेतुं स निहत्य सुरकम्पनम् ॥ ११० ॥
विद्याधरीं प्रपश्यन्तीं प्राह हृष्टतनूरुहः । नारदस्यमुनेर्वाक्यात्तव सुश्रोणिवाञ्छितम्
कृतं मया कृतज्ञे! किं करवाण्यधुनावद । श्रुत्वेतितस्यसा वाक्यंप्राह गम्भीरचेतसा
मलयगन्धिन्युवाच
अत्युदारमते वीरनिजप्राणैःपणीकृताम् । किमांपृच्छसियुवतींकुलकन्यामदूषिताम्
इति ब्रुवन्त्यां कन्यायां पुनः स्वैरचरोमुनिः ।
अतर्कितागमः प्राप्तो नारदो देवलोकतः ॥ ११४ ॥
ततस्तुष्टुवतुस्तौ तुतंदृष्ट्वा मुनिसत्तमम् । कृतप्रणामौ मुनिनाप्रतिज्ञाप्रापिताशिषौ
पाणिग्रहेण विधिनाऽभिषिक्तौ नारदेनतु । जग्मतुर्नारदादिष्टवर्त्मना कृतमङ्गलौ ॥
तया मलयगन्धिन्या वृतः सोऽमित्रजिन्नृपः ।
पुरीं चोज्जयिनीं प्राप्य पौरैर्विहितमङ्गलाम् ॥ ११७ ॥
तद्वीक्षणादपि नरोनारकीनैव जातुचित् । गतिंप्राप्नोतिमेधावी तां पुरीमविशन्नृपः
यस्यां पुर्यां प्रवेशं न लभन्ते वासवादयः । कैवल्यजयजैत्र्यां हि तांपुरीमविशन्नृपः
सापि विद्याधर्यवन्तीं समृद्धांवीक्ष्यदूरतः । निनिन्दस्वर्गलोकं च पातालनगरीमपि
प्राप्याऽमित्रजितं कान्तं तथा दृष्ट्वा न सा वधूः ।
यथा दृष्ट्वाऽप्यहोऽवन्तीं परमानन्ददायिनीम् ॥ १२१ ॥
सा कृतार्थामिवात्मानं मन्यमाना मनस्विनी ।
तेन पत्योज्जयिन्यां च परां निर्वृतिमाप सा ॥ १२२ ॥
सोऽप्यमित्रजिदासाद्यपत्नींमलयगन्धिनीम् । धर्मप्रधानंसंसेव्यकामंप्रापोत्तमंसुखम्
सा पतिं विष्णुभजने रतं प्रोवाच भामिनी ॥ १२४ ॥
राज्युवाच
भूपाऽभीष्टतृतीयायां चरिष्यामि महाव्रतम् ।

राजोवाच
देव्यभीष्टतृतीयायां व्रतं कीदृग्भवेद्वद ॥ १२५ ॥
इति राज्ञोदिता राज्ञी प्रवक्तुमुपचक्रमे । इतिकर्त्तव्यतां तस्य व्रतस्य सविधानकाम्
राज्युवाच
पुरा देवर्षिणा चेदंव्रतं लक्ष्म्यैप्रतिश्रुतम् । तयाप्राप्तास्तुसकलाःकामाःस्वर्गापवर्गदाः
मार्गशीर्षतृतीयायां शुक्लायां कलशोपरि ।
ताम्रपात्रं निधायैव तन्दुलैः परिपूरितम् ॥ १२८ ॥
अच्छिद्रञ्च नवीनञ्च रजनीरागरञ्जितम् । वासःपात्रोपरिन्यस्यसूक्ष्मासूक्ष्मतरम्परम्
तस्योपरिशुभंपद्मं रविरश्मिप्रकाशितम् । तत्कर्णिकायाउपरिचतुःस्वर्णविनिर्मितम्
विधिं सम्पूजयेद्भक्त्या रक्तमाल्याम्बरादिभिः ॥ १३० ॥
पुष्पैःसुगन्धैः कर्पूरकस्तूर्यादिभिरर्चयेत् । रात्रौजागरणंकार्यं विप्राणांपरमोत्सवैः
होमःकार्यो महाभक्त्या सहस्रपरिसङ्ख्यया ।
नवप्रसूतां कपिलां दद्याच्च सुपयस्विनीम् ॥ १३२ ॥
दद्यादाचार्यवर्यायसालङ्कारांसदक्षिणाम् । उपोष्यदम्पतीभक्त्यानवाम्बरविभूषितौ
प्रातःस्नात्वा चतुर्थ्याञ्च सम्पूज्याचार्यमादितः ।
वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥
सोपस्करां च तां मूर्तिमाचार्याय प्रदापयेत् ॥ १३४ ॥
मन्त्रः
नमोविश्वविधानज्ञे! विद्येविविधकारिणि !। सुतञ्चशङ्करंदेहितुष्टाह्यस्माद्व्रतोत्तमात्
सहस्रंभोजयित्वाथ द्विजानां भक्तिपूर्वकम् । भुक्तशेषेण चान्नेनकुर्याद्धै पारणंततः
इत्थमेतद्व्रतं नाथ! चिकीर्षामि त्वयाज्ञया । कुरुचैतत्प्रियं मह्यमभीष्टफललब्धये ॥
इति भूपालवर्येण श्रुत्वा संहृष्टचेतसा । तदा व्रतं समाचीर्णं सान्तर्वत्नीबभूव ह ॥
तयाऽथ प्रार्थिता गौरी गर्भिण्या भक्तितोषिता ।
पुत्रं देहि महामाये! साक्षाद्विष्णवंशसम्भवम् ॥ १३१ ॥

जातमात्रो व्रजेत्स्वर्गं पुनरायातिचात्र वै । भक्तः सदाशिवेऽत्यर्थं प्रसिद्धःसर्वभूतले

विनैव स्तन्यपानेन षोडशाब्दाकृतिः क्षणात् ॥ १४० ॥

एवम्भूतः सुतो गौरि! यथा स्यान्मे तथा कुरु ।

मृडान्यापि तथेत्युक्ता राज्ञीःभक्त्यातितुष्टया ॥ १४१ ॥

अथ कालेन तनयं मूलर्क्षेसाऽप्यजीजनत् । हितैरमात्यैरथ सा विज्ञारिष्टसंस्थिता

देविराजार्थिनीत्वंतुत्यजदुष्टर्क्षजंसुतम् । सा मन्त्रिवाक्यमाकर्ण्य केवलम्पतिदेवता

अत्याक्षीत्तं तथाप्राप्तं तनयं नयकोविदा । धात्रिकां तु समाहूय प्राहेदं सा नृपाङ्गना

पञ्चमुद्रेमहापीठे विकटानाम मातृका । तदग्रे स्थापयित्वामुं बालं धात्रि!त्विदं वद

गौरि ! दत्तः शिशुरसौ तवाग्रे विनिवेदितः ।

राज्या पत्युः प्रियैषिण्या मन्त्रिविज्ञप्तिनुन्नया ॥ १४६ ॥

सापि राज्युदितं श्रुत्वा बालं शिशुशशिप्रभम् ।

विकटायाः पुरोभागे संस्थाप्य गृहमागता ॥ १४७ ॥

अथ सा विकटादेवीसमाहूय च योगिनीः । उवाच नियतक्षिप्रं शिशुंमातृगणाग्रतः

तासामाज्ञां चकुरुतःरक्षतामुंप्रयत्नतः । योगिन्योविकटावाक्यात्खेचर्यस्तत्क्षणेनतम्

निन्युर्गगनमात्रेण ब्राह्म्याद्यायत्र मातरः । प्रणम्य योगिनीवृन्दंतंशिशुं सूर्यवर्चसम्

पुरोनिधाय मातणां प्रोचुश्च विकटोदितम् ।

ब्रह्माणी वैष्णवी रौद्री वाराही नारसिंहिका ॥

कौमारी चापि माहेन्द्री चामुण्डा चैव चण्डिका ॥ १५१ ॥

दृष्ट्वा तं बालकं रम्यं विकटाप्रेषितं ततः । पप्रच्छुर्युगपद्वाक्यं कस्तेबाल प्रमुख्यकः

मातृभिश्चेतिपृष्टस्तुयदा किञ्चिन्नवक्तिसः । तदाचयोगिनीचक्रंप्राहमातृगणस्त्विवति

राज्ययोग्योभवत्येषमहालक्षणलक्षितः। पुनस्तत्रैवनेतव्योयोगिन्यस्त्वविलम्बितम्

पञ्चमुद्रामहादेवी तिष्ठते यत्र कामदा । यस्याः संसेवनान्नृणां निर्वाणश्रीरदूरतः ॥

तत्पीठसेवनादस्य षोडशाब्दाकृतेःशिशोः । सिद्धिर्भवत्री परमा रुद्रस्यानुग्रहात्परा

एवं मातृगणात्सद्योयोगिनीभिःक्षणेन तु । प्रापितोमातृवाक्येन पञ्चमुद्रान्तिकम्पुनः

सम्प्राप्य तन्महापीठं स्वर्गलोकादिहागतः ।

महाकालवने पुण्ये तताप विपुलं तपः ॥ १५८ ॥

तपसाऽतीव तीव्रेणनिश्चलेन्द्रियमानसः । तस्य राजकुमारस्य प्रसन्नोऽभूदुमाधवः

आविर्बभूव पुरतो लिङ्गरूपेण शङ्करः । उवाच च प्रसन्नोऽस्मि वरं ब्रूहि नृपाङ्गज ।

सर्वज्योतिर्मयं लिङ्गं पुरतो दृष्टवान्स्वयम् । सप्तपातालमुद्भिद्योत्थितं बृहदनुग्रहात्

प्रणम्य दण्डवद्भूमौ परितुष्टाव धूर्जटिम् । सूक्तैर्जन्मान्तराभ्यासात्सुहृष्टो रुद्रदैवतैः

वरञ्च प्रार्थयाञ्चक्रे परिहृष्टतनूरुहः ॥ १६२ ॥

देवदेव महादेव! यदि देयो वरो मम । तदत्र भवता स्थेयं भवतापहृता सदा ॥१६३

अस्मिंल्लिङ्गे स्थितः शम्भो! कुरु भक्तसमीहितम् ।

विना मुद्रादिकरणं मन्त्रेणापि विना विभो! ॥ १६४ ॥

अस्य लिङ्गस्य ये भक्ता मनोवाक्कायकर्मभिः । सदैवानुग्रहस्तेषु कर्त्तव्यो वर एष मे

इति तद्वरमाकर्ण्य लिङ्गरूपोऽवदत्प्रभुः । एवमस्तु यदुक्तं ते वीर! वैष्णवसूनुना ॥

वीर वीरेश्वरंनाम लिङ्गमेतत्त्वदाख्यया ।

अवन्त्यां सम्प्रदास्यामि भक्तानां चिन्तितान्यहो ॥ १६७ ॥

अत्र दत्तं हुतं जप्तं स्तुतमर्चितमेव च । तदक्षयं भवेदत्र भक्तानां नात्र संशयः ॥१६८

त्वं तु राज्यं परम्प्राप्य सर्वभूपालदुर्लभम् ।

भुक्त्वा भोगांश्च विपुलानन्ते सिद्धिमवाप्स्यसि ॥ १६६ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । वीरेश्वरस्य देवस्य नूपुरेशमथो शृणु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

चतुरशीतिलिङ्गमाहात्म्ये वीरेश्वरमाहात्म्यवर्णनं नाम

षट्चत्वारिंशोऽध्वायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः

नूपुरेश्वरमाहात्म्यवर्णनम्

श्रीदेवदेव उवाच

सप्ताधिकं विजानीहि नूपुरेश्वरसञ्ज्ञकम् । यस्य दर्शनमात्रेण प्राप्यन्ते सर्वसिद्धयः
पुराराथन्तरे कल्पे नूपुरोनाम वै गणः । रुद्रभक्तिपरो नित्यं पञ्चमुद्राविभूषितः॥
स एकदा कुबेरस्य सभायां प्राप्य संस्थितः ।
द्रष्टुं महोत्सवं तत्र अप्सरोभिः कृतं तदा ॥ ३ ॥
ननृतुश्चापरास्तत्र ह्युर्वशी योषितां वरा । रम्भा तिलोत्तमा मेना ननृतुर्हर्षसंयुताः॥
तासां नृत्यं तदा वीक्ष्य नूपुरो गणपस्तदा । कामबाणार्दितो नूनं तासां मध्येननर्त्तह
नृत्यमानस्ततो हृष्टः पुष्पगुच्छेन वक्षसि । उर्वशीं ताडयामास कामबाणप्रपीडितः
उर्वशी तु ततः क्रुद्धा पुष्पगुच्छेन ताडिता । जगाम शरणं देवं धनदं सर्वकामदम्
उवाच धनदस्तत्र क्रोधेनाकुलमानसः ॥ ८ ॥
यस्मात्त्वया रङ्गभङ्गः कृतःकामार्दितेन वै । तस्मात्त्वं मानुषे लोके पतस्व पापपूरुष!
कुबेरस्य च शापात्तु जगाम धरणीतलम् । विललापसुदुःखार्त्तःकिंकृतंपापिनामया
विलप्यसुभृशं सोऽथ शरणंपरमेश्वरीम् । जगाम मनसादेवि त्वांसर्वैवरदायिनीम्
त्वं तुष्टा तु तदा जाता प्रत्यक्षा परमेश्वरी । उवाचगणपं प्रीत्या भक्तिनम्रं तदाभुवि
गच्छ पुत्र! ममादेशान्महाकालवनं शुभम् । प्राची सरस्वतीतत्रवाप्याकाराचविद्यते
तस्या दक्षिणतो वत्स विद्यते लिङ्गमुत्तमम् ।
वाप्यां स्नात्वा च तल्लिङ्गं समाराधय भक्तितः ॥ १४ ॥
सा प्राची स च देवेशस्त्वन्नाम्ना ख्यातिमेष्यति ।
इत्युक्तो नूपुरो देवि! महाकालवनं गतः ॥ १५ ॥
त्वया च प्रेरितो देवि! कीर्त्यर्थं तत्र गम्यताम् ।

इत्युक्तो नूपुरो दिव्यो गणो हृष्टःकृताञ्जलिः ॥ १६ ॥
महाकालवनं रम्यं देवगन्धर्वसेवितम् । ददर्श तत्र तल्लिङ्गं सुरगन्धर्वसेवितम् ॥
प्राची सरस्वती तत्र वाप्याकारा च संस्थिता ।
तस्यां स्नात्वा ततो देवं पूजयामास नूपुरः ॥ १८ ॥
ततो देवः प्रसन्नात्मा प्रत्युवाचाथ नूपुरम् । साधुनूपुरभद्रं तेस्वस्तिप्राप्नुहिसर्वदा
भविता वल्लभोदेव्याःपार्वत्याः शङ्करस्य च । इत्युक्तस्तेनलिङ्गेनतत्क्षणान्नूपुरःप्रिये
उदितादित्यसङ्काशोविभावसुसमद्युतिः । तेजोराशिश्चसञ्जातोदुर्निरीक्ष्यस्त्रिविष्टपैः
प्रभावं तादृशं दृष्ट्वा देवैरुक्तं वरानने !। अहो लिङ्गस्य माहात्म्यं दृश्यतेऽत्यद्भुतं भुवि
प्राप्ता च कामिकी सिद्धिर्नूपुरेण च दर्शनात् ।
अतो देवोऽद्यप्रभृति विख्यातो भूतलेऽभवत् ॥ २३ ॥
सर्वकामप्रदो नित्यंनूपुरेश्वरनामतः । दर्शनंयेकरिष्यन्तिस्नात्वावाप्यांसमाहिताः
नूपुरेश्वररुद्रस्य ते यान्ति परमं पदम् । येचपूजांकरिष्यन्ति भक्तिभावसमन्विताः
वसन्ति मुदिताः सर्वे यावदाभूतसम्प्लवम् ॥ २५ ॥
जन्ममृत्युजरारोगदुःखानि विविधानि च । प्रयान्ति विलयं सद्यः पूजितेनूपुरेश्वरे
वापी गङ्गासमा सा तु स्वयमेवशुभेक्षणे । सङ्गमस्तुवितस्तायांयमुनायास्तुसुव्रते
प्रयागमेतज्जानीहि भूधरेन्द्राङ्गसम्भवे !॥ २७ ॥
सोमतीर्थं तदा देवि सर्वपातकनाशनम् । तत्र स्नात्वा पुमान्देविवाजपेयफलंलभेत्
कृष्णाष्टम्यां च यः स्नात्वा पूजयेन्नूपुरेश्वरम् ।
कुलं वै तारयेत्सोऽपि मातृकं पितृकं शतम् ॥ २९ ॥
एष ते कथितो देवि! प्रभावःपापनाशनः । नूपुरेश्वरदेवस्यश्रूयतामभयेश्वरम् ॥ ३०॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽ-
चतुरशीतिलिङ्गमाहात्म्ये नूपुरेश्वरमाहात्म्यवर्णनंनाम
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

———

अष्टचत्वारिंशोऽध्यायः

अभयेश्वरमाहात्म्यवर्णनम्

श्रीरुद्र उवाच

अष्टाधिकं विजानीहि चत्वारिंशत्तमं प्रिये !। यस्य दर्शनमात्रेणन भवस्यभयंभवेत्
कल्पावसाने प्रथमे पाद्मे पद्मनिभेक्षणे। नष्टचन्द्रार्कनक्षत्रे नष्टभूमित्रिविष्टपे।
ब्रह्मा वै चिन्तयामास कथं सृष्टिर्भवेदिति ॥ २।
इत्याकुलितरूपस्य तस्य नेत्रद्वयात्तदा। पपाताश्रुकणः स्थूलोनेत्राद्वामान्महात्मनः
तस्मादश्रुकणाज्जातो हारवोनाम दानवः। तीक्ष्णदंष्ट्रो महाकायो भिन्नाञ्जनचयप्रभः
दक्षिणान्नयनाज्जातः कालकेलीतिविश्रुतः।
कृष्णदेहोऽतिदीर्घश्च महादंष्ट्रोर्ध्वरोमकः ॥ ५ ॥
करालवदनो दुष्टो यमरूपो दुरासदः। कृष्णाञ्जनचयाकारः पाशपाणिर्विभीषणः ॥
तौ तु दैत्यौ समागत्य कृतसङ्केतकौ तदा।
ब्रह्माणं हन्तुमिच्छन्तौ प्रमत्तावभिधावितौ ॥ ७ ॥
ततो ब्रह्मा भयाविष्टः कान्दिशीकश्चचार ह ।
ततोजलेऽतिगम्भीरे सोऽपश्यदमितद्युतिम् ॥ ८ ॥
पुरुषं पीतवसनं शङ्खचक्रगदाधरम्। तमालोक्य ततो ब्रह्मा संत्रासं परमं गतः ॥
उवाच को भवाञ्छेते निःशेषेऽस्मिश्चराचरे ॥ ६ ॥
तमुवाच ततो विष्णुरहमेव जगत्पिता। लोककृल्लोकसंहर्त्तालोकस्थितिविधायकः
इत्युक्तः पद्मजस्तेन कृष्णेनाक्लिष्टकर्मणा। प्रत्युवाच तदा ब्रह्मा स्रष्टाऽहं भुवनत्रये
मया सृष्टं जगत्सर्वं सदेवासुरमानुषम्। अत्रान्तरे च तौदैत्यावायातौ बलदर्पितौ
भोक्तुकामौ क्षुधाविष्टौ दृष्ट्वाब्रह्माब्रवीदिदम्। कृष्णं कमलपत्राक्षंकम्पिताधरपल्लव
यदि त्वं कारणं किञ्चिदस्य लोकस्य कथ्यसे।

तदा तावसुरौ भीमौ हन्तुमर्हसि साम्प्रतम् ॥ १४ ॥
तच्छ्रुत्वा तु तदा विष्णुर्ज्ञात्वा दुःखं परस्परम्।
क्षणं विश्रम्यतां तावत्पश्चाद् द्वन्द्वं भविष्यति ॥ १५ ॥
इत्युक्त्वाकृतसङ्केतौ तौ दैत्यौबलगर्वितौ। ब्रह्मनारायणौहन्तुंधावितौतुत्वरान्वितौ
ब्रह्मविष्णूतदा दृष्ट्वा दानवौ दुर्जयौ रणे। सन्त्रासं जग्मतुस्तत्र स्वेदकम्पपरिप्लुतौ
अन्योन्यमूचतुस्तौ हि देशकालोचितं वचः। कर्तव्यंकिं नुवाकार्यंममवातववाभवेत्
उपस्थितंभयंघोरं तत्र किं कार्यमस्तितौ। आसन्नं मरणं दृष्ट्वा ब्रह्मा प्रोवाचकेशवम्
गम्यतांकृष्ण शीघ्रम्वै महाकालवनोत्तमम्। प्रलयेऽप्यक्षयम्प्रोक्तं तत्ररक्षाभविष्यति
अहं तत्र गमिष्यामि व्रज त्वं तत्र केशव !॥ २० ॥
इत्युक्तो ब्रह्मणाकृष्णो जगाम सह तेन वै। महाकालवनम्प्राप्तौ न च दृष्टो महेश्वरः
तत्रापि दशसाहस्रं कालः पर्यटतोस्तयोः ॥ २१ ॥
ततोज्वालामयं दिव्यंनूपुरेश्वरदक्षिणे। दृष्ट्वातल्लिङ्गमाहात्म्यं ब्रह्मविष्णूततःस्वयम्
प्रार्थयाञ्चक्रतुर्देवमभयं देहि नौ प्रभो! ॥ २२ ॥
शरणं भव देवेश! दानवाभ्यां प्रपीडितौ। अभयं च ततो दत्तं तेन लिङ्गेन पार्वति!
शुश्राव गर्जितं ताभ्यां दानवाभ्यां पितामहः।
प्रत्युवाच भयत्रस्तो लिङ्गं कम्पितकन्धरः ॥ २४ ॥
स एष मृत्युरस्माकमेति शीघ्रं भयावहः। दीयतामभयं देव! कृष्णेनोक्तं तदा प्रिये!
भयार्त्तवचनं श्रुत्वा ब्रह्मणः केशवस्य च। तौ देवौ तेन लिङ्गेन जठरे सन्निवेशितौ
दृष्टं ताभ्यां जगत्सर्वं सार्कचन्द्रमहीधरम्।
ससिद्धगन्धर्वकुलं शैलतालवताकुलम् ॥ २७ ॥
समुद्रपीठसंयुक्तं नानावर्णाश्रमोज्ज्वलम्। सपातालतलं देवी सभुजङ्गमहीरुहम् ॥
ससप्तलोकविन्यासं सदेवासुरराक्षसम्।
पुनस्तौ निःसृतौतस्माज्जठराद्विस्मयान्वितौ ॥ २६ ॥
दृष्टौ भस्मीकृतौ दैत्यौ तेनलिङ्गेन पार्वति !। तुष्टुवातेपरंलिङ्गं भक्त्यापरमयायुतौ

लिङ्गेनोक्तं प्रसन्नेन भवद्भ्यां किं ददाम्यहम् ।
ममामोघमिदं देवौ दर्शनञ्चातिदुर्लभम् ॥ ३१ ॥

ततो ब्रह्मा च विष्णुश्च वरयामासतुर्वरम् । यदि देयो वरोऽस्माकं नृणामभयदोभव
ये तां पूजयिष्यन्ति यक्ष्यन्तिच समाहिताः । संस्मरिष्यन्तिसततंतेषामभयदोभवे

अभयेश्वरसञ्ज्ञस्तु ख्यातो भुवि भविष्यसि ।
ते कृतार्था भविष्यन्ति ये त्वां पश्यन्ति भक्तितः ॥ ३४ ॥

भविष्यति भयं नैव संसारपतनं तथा । धनपुत्रकलत्राणां वियोगोन भविष्यति ॥
दुःखितादुर्भगा नारी दर्शनं याकरिष्यति । सौभाग्यसुखसंयुक्ताभविष्यतिनसंशयः

वीरं तु गुर्विणी कन्या पतिमाप्स्यति शोभनम् ॥ ३६ ॥
यं यं काममभिध्याय ये त्वां पश्यन्ति मानवाः ।
तं तं मनोरथं सर्वं गमिष्यन्ति न संशयः ॥ ३७ ॥
एवं भविष्यतीत्युक्त्वा लिङ्गेन परमेश्वरि !।
विसर्जितौ गतौ देवौ ब्रह्मविष्णू स्वमालयम् ॥ ३८ ॥

एष ते कथितो देवि प्रभावः पापनाशनः । अभयेश्वर देवस्य श्रूयतां पृथुकेश्वरम् ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्येऽभयेश्वरमाहात्म्यवर्णनंनामाऽ-ष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशत्तमोऽध्यायः

पृथुकेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

शृणु पञ्चाशदेकोनं देवेशं पृथुकेश्वरम् । यस्य दर्शनमात्रेण सार्वभौमो नरो भवेत् ॥
वंशे स्वायम्भुवे देवि! ह्यङ्गो राजाबभूव ह । मृत्योस्तुदुहितातेन परिणीतासुदुर्मुखा
वेननामा सुतोजातो नास्तिको धर्मदूषकः । देवब्रह्मस्वहारी च परभार्यापहारकः ॥
स च शप्तो द्विजैर्देवि! तत्क्षणान्निधनंगतः । तदूरोर्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः
शरीरे मातुरंशेन कृष्णाञ्जनचयप्रभाः । पितुरंशात्समुत्पन्नो धार्मिको द्विजसत्तमैः ॥

मथिताद्दक्षिणाद्धस्तात्पृथुः प्रथितविक्रमः ॥ ५ ॥

स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुष्करम् । विष्णोर्वरेण महता प्रभुत्वमगमन्नृपः

स च स्वाध्यायरहिता निर्वषट्कारनिर्द्धनाः ।
हाहाभूताः प्रजा दृष्ट्वा ततोऽभूद्दुःखितो नृपः ॥ ७ ॥
स दोग्धुमैच्छत्त्रैलोक्यं स देवासुरमानुषम् ॥ ८ ॥

एतस्मिन्नन्तरे प्राप्तो नारदो मुनिसत्तमः । क्रोधाविष्टं पृथुं दृष्ट्वा वाक्यं चेदमुवाचह
लोकत्रयविनाशायमाकोपंकुरुभूपते । पृथ्व्याऽनयाग्रासितानि सस्यानिविविधानिच

गिलितानि च अन्नानि विद्ध्यैवैतन्मतं मम ॥ १० ॥

नारदस्यच वाक्येन क्रोधञ्चक्रेपृथुस्तदा । निर्दग्धधुमैच्छत्पृथिवीं सशैलवनकानाम्

मुमोच शस्त्रमाग्नेयं तेन सा धरणी तदा ।
दह्यमाना भयार्त्ता च गौर्भूत्वा पृथुमभ्यगात् ॥ १२ ॥

सा वध्यमाना तेनैव नृपं वचनमब्रवीत् । शरणं समनुप्राप्ता गौरहं नृपसत्तम !॥ १३॥

गौरवध्या महीपाल ! वत्सं कृत्वा च दोग्धि माम् ॥ १४ ॥
तस्यास्तद्वचनं श्रुत्वा दुदोह नृपसत्तमः ।

भास्वद्रत्नानि सस्यानि कृत्वा वत्सं हिमालयम् ॥ १५ ॥
जाताः प्रजाश्च सुमुखाः प्रवृत्तश्च महोत्सवः ।
प्रवृत्ता यागदानादिक्रिया मङ्गलपूर्विकाः ॥ १६ ॥
राजाऽथ चिन्तयामास मया पापमिदं कृतम् ।
अवध्याश्च स्त्रियः प्रोक्ता गौरवध्या द्विजस्तथा ॥ १७ ॥
स्त्रीरूपधारिणी पृथ्वी मोहादेषा मया हता । गोवधेचकृता बुद्धिरहो पापपरम्परा॥
तस्माद्वह्निं प्रवेक्ष्यामि चितां कृत्वा न संशयः ॥ १८ ॥
एवं चिन्तयतस्तस्य पृथोरमिततेजसः । आजगाम पुनस्तत्र नारदो भगवानृषिः ॥
दृष्ट्वा तथाविधं दीनं चिन्तयानं पृथुं प्रिये!। उवाच नारदोधीमान्किमेतदितिपार्थिव
ततः स कथयामास मया पापमिदं कृतम् ।
अवध्या स्त्री हता विप्र कृता बुद्धिश्च गोवधे ॥ २१ ॥
काँल्लोकान्नु गमिष्यामि कृत्वाकर्मसुदारुणम् । मरिष्यामिनसंदेहो ब्रह्महापापपूरुषः
अथ चेष्टोपदेशेन दुःखादुद्धर मां द्विज !।
तस्य तद्वचनं श्रुत्वा कथयामास नारदः ॥
महापापप्रशमनं लिङ्गमाहात्म्यमुत्तमम् ॥ २३ ॥
महाकालवने लिङ्गमभयेश्वरपश्चिमे । महापापक्षयकरं विद्यते तत्र भूपते !॥ २४॥
गच्छ त्वं सहसा राजंस्तत्र पूतो भविष्यसि ॥ २५ ॥
नारदस्यवचः श्रुत्वापृथुस्तत्रजगामसः । दृष्ट्वालिङ्गं च वैरम्यंविपापस्तत्क्षणादभूत्
द्वादशादित्यसङ्काशो बभूव पृथिवीपतिः ॥ २६ ॥
ततोऽन्तरिक्षगैर्देवि! कृतं नाम वरानने । पृथुना पूजितो यस्माद्भविष्यति महीतले
अद्यप्रभृति विख्यातो देवोऽयं पृथुकेश्वरः ॥ २७ ॥
ये च द्रक्ष्यन्ति देवेशं पृथुकेश्वरमीश्वरम् । ते सर्वकामसम्पूर्णा भविष्यन्तिमहीतले
अज्ञानाज्ज्ञानतो वाऽपि यत्पापं जायते नृणाम् ।
तत्पापं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ २९ ॥

वाचिकं मानसं वापि कायिकं गुह्यसम्भवम् । प्रकाशं वाकृतंपापंप्रसङ्गादपियत्कृतम्
तत्सर्वं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ ३० ॥
पूजयिष्यन्ति ये भक्त्या देवं वै पृथुकेश्वरम् ।
राज्यं प्राप्स्यन्ति ते सम्यङ्नृलोके च त्रिविष्टपे ॥ ३१ ॥
भुक्त्वा राज्यं मनुष्याणां देवानां च महीतले ।
यास्यन्ति परमं स्थानं ब्रह्मणः परमेष्ठिनः ॥ ३२ ॥
इत्युक्त्वा देवसङ्घैश्च पूजितः पृथुकेश्वरः । पृथुः शशास पृथिवींसपत्तनांसपर्वताम्
एष ते कथितो देवि ! प्रभावः पापनाशनः । पृथुकेश्वरदेवस्य शृणु वै स्थावरेश्वरम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये पृथुकेश्वरमाहात्म्यवर्णनं
नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः

स्थावरेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

शृणु देवि! प्रयत्नेन पञ्चाशत्तममीश्वरम् । यस्य दर्शनमात्रेण ग्रहबाधा न जायते
संज्ञानामरवेर्भार्यासासुताविश्वकर्मणः । भर्त्तुस्तेजोऽसहन्त्याथकदाचिच्चवसञ्ज्ञया
छायामयी चात्मनस्तु निर्मिता तरसा तया ॥ २ ॥
सा प्रोक्ता सादरेणैव स्थीयतां सूर्यसन्निधौ । पृष्ट्यापि न वाच्यंते मदीयंगमनंरवेः
इत्युक्त्वा सा तदा सञ्ज्ञा जगाम भवनं पितुः ।
सञ्ज्ञेयमिति मन्वानो द्वितीयायां दिवस्पतिः ।
जनयामास तनयं नामतो यः शनैश्वरः ॥ ४ ॥

तस्मिञ्जाते भयं जग्मुः सदेवासुरमानुषाः । त्रैलोक्यं जातमात्रेण क्रान्तं सचराचरम्
इन्द्रोऽपि भयसन्त्रस्तो ब्रह्माणं शरणं गतः । सूर्यपुत्रस्य वृत्तान्तं कथयामास गद्गदम्
भिन्नन्तु रोहिणीचक्रं व्याप्तं नक्षत्रमण्डलम् । जातमात्रेण चाक्रान्तं त्रैलोक्यं रविसूनुना
वासवस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः । आहूय सहसा सूर्यं वचनं चेदमब्रवीत्
मर्यादाक्रियतां भानो वार्यतां पुत्र औरसः । आक्रान्तं तेजसा तेन त्रैलोक्यं भूर्भुवादिकम्

ब्रह्मणो वचनं श्रुत्वा रविणा प्रोक्तमीदृशः ।
असाध्योऽयं मम सुतो वार्यतां स्वयमेव तम् ॥ १० ॥
पश्य मे चरणौ दग्धौ दृष्टिमात्रेण लीलया ।
ब्रह्मापि भयसन्त्रस्तो जगाम मनसा हरिम् ॥ ११ ॥
सूर्यस्य वचनं श्रुत्वा हरिः प्राप्तस्तु तत्क्षणात् ।
ब्रह्मणो वचनं श्रुत्वा भीतः कृष्णोऽब्रवीदिदम् ॥ १२ ॥

गम्यतां तत्र यत्रास्ते देवदेवो महेश्वरः । कृष्णस्य वचनात्सर्वे ममान्तिकमुपागताः

वृत्तान्तः कथितः सर्वा रविपुत्रस्य पार्वति !।
मया स्मृतस्तु सम्प्राप्तः सूर्यपुत्रस्तु तत्क्षणात् ॥ १४ ॥

अधोदृष्टिर्मया दृष्टो वक्राङ्गो रूपतोऽसितः । स्थैर्यं कृत्वा नमस्कृत्य विज्ञनोऽहं शनैःशनैः
किमर्थं वै स्मृतो देव देह्याज्ञां मम शङ्कर । आदेशे तव तिष्ठामि किं करोमि प्रशाधि माम्
इत्युक्तोऽहं तदा तेन रविपुत्रेण पार्वति । मया स वारितोऽत्यर्थं मा पीडय जगत्त्रयम्

तेनोक्तं देहि मे स्थानं पानमाहारमेव च ।
मया दत्तं विशालाक्षि! पूजार्थं स्थानमुत्तमम् ॥ १८ ॥
मेषादिराशिसंस्थः संत्रिंशन्मासान्प्रपीडय ।
मानुषान्क्रमशो वत्स ! तत्र तृप्तिमवाप्स्यसि ॥ १६ ॥

अष्टमश्च चतुर्थश्च द्वितीयो जन्मसंस्थितः । द्वादशराशिसंस्थोपि विरुद्धो भव सर्वदा
एकादशो वा षष्ठो वा तृतीयस्थानगोऽथवा । भव भव्यतरो नृणामतः पूजा भविष्यति
पञ्चमो नवमश्चैव उदासीनस्तु सप्तमः । भव राशिगतो नित्यं मानुषे कर्मभिर्युते ॥२२

पूजां प्राप्स्यसि चात्यर्थं ग्रहाणामधिकं सदा ।
गतिः स्थिरा भवित्री ते वरः श्रेष्ठोऽभिधीयते ॥ २३ ॥
अतस्ते स्थावरं नाम भविष्यति महीतले ।
शनैश्चरस्त्वं राशिस्थो ग्रहाणामधिको यतः ॥ २४ ॥

अतः शनैश्चरो नाम भविष्यसि सदा भुवि । गजगण्डनिभाकारो मम कण्ठसमोपि च
वर्णतो ह्यसितो नाम भविष्यसि महीतले । ग्रहमध्ये ह्यधोदृष्टिर्गतिर्मन्दा भविष्यति

तुष्टो ददासि राज्यं च रुष्टो वै हरसि क्षणात् ॥ २६ ॥

देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः । त्वत्क्रूरदृष्टिनिहिता नाशं यास्यन्ति नान्यथा

तव प्रसादात्प्राप्स्यन्ति मनोऽभीष्टं सुदुर्लभम् ।
अन्यच्च ते प्रदास्यामि स्थानं गुह्यं मनोहरम् ॥ २८ ॥

मनोऽभीष्टकरं पुण्यं देवदानवदुर्लभम् । प्रलयेऽप्यक्षयं प्रोक्तं महाकालवनं परम् ॥
तत्र गच्छ ममादेशात्पृथुकेश्वरपश्चिमे । विद्यते तत्र यल्लिङ्गं तत्ते नाम्ना भविष्यति

कीर्त्तिरेषा त्वदीयाऽपि त्रैलोक्ये भविता ध्रुवम् ॥ ३१ ॥
इत्युक्तः स्थावरो देवि! ममाज्ञापालकस्तदा ।
जगाम त्वरितो रम्यं महाकालवनं शुभम् ॥ ३२ ॥

दृष्ट्वा तत्रैव तल्लिङ्गं स्थानं लब्धं सुशोभनम् । तल्लिङ्गं भुवने ख्यातं नामतः स्थावरेश्वरम्

शनिनोक्तं तदा देवि ! येऽत्र द्रक्ष्यन्ति भक्तितः ।
मया प्रपूजितं लिङ्गं विख्यातं स्थावरेश्वरम् ।
तेषां पीडा मदीया तु न भविष्यति कर्हिचित् ॥ ३४ ॥

मदीये च दिने यो वै नियमेन प्रपश्यति । तस्याहं सकलां बाधां शमयिष्याम्यसंशयम्
भक्ष्यामि सततं पीडामन्यग्रहकृतामपि । मदीयं च भयं तस्य स्वप्नेऽपि न भविष्यति
न ग्रहा न पिशाचाश्च न यक्षा न च राक्षसाः । विघ्नं कुर्वन्ति तस्यापि मयि तुष्टे न संशयः

सङ्क्रान्तौ शनिवारे च व्यतीपातेऽयने तथा ।
ये पश्यन्ति नरा भक्त्या लिङ्गं वै स्थावरेश्वरम् ॥

भविष्यत्यक्षयस्तेषां स्थिरो वासस्त्रिविष्टपे॥ ३८ ॥
नियमेन प्रपश्यन्ति मम वारेऽत्रयेनराः । न तेषांदुष्कृतं किंचिद्दुष्कृतोत्थानचापदः
भविष्यतिन दारिद्र्यं न चैवेष्टवियोजनम् । दास्यामि पुत्रकामस्यफलंपुत्रकृतंसदा
अधनस्यधनंचैव भयार्त्तस्याभयंतथा । स्वर्गंवैस्वर्गकामस्यप्रयच्छामिचवाञ्छितम्
इत्युक्त्वा पूजयामासभूयोलिङ्गंशनैश्चरः । पूजयित्वाशुभैः पुष्पैर्भक्त्यातत्रैवसंस्थितः
एषते कथितो देवि! प्रभावः पापनाशनः । स्थावरेश्वरदेवस्य शूलेश्वरमथो शृणु ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये स्थावरेश्वरमाहात्म्यवर्णनं नाम
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तोऽध्यायः

शूलेश्वरमाहात्म्यवर्णनम्

ईश्वरउवाच

एकाधिकं विजानीहि पञ्चाशत्तममीश्वरम् । देवंशूलेश्वरं देवि!सर्वव्याधिविनाशनम्
आद्ये कल्पे प्रवृत्ते च राज्यहेतोर्वराननने !। देवानां दानवानां च युद्धमासीत्सुदारुणम्
दैत्यनामीश्वरे जम्भे देवानां च शचीपतौ ॥ २ ॥
ततो देवाः पराभूता दैत्या विजयिनोऽभवन् । अन्धकोमन्दरंप्राप्तोदूतंमेप्राहिणोत्तदा
स दूतो मामुवाचोच्चैः सगर्वोदुष्टमानसः । अन्धकेनाहमादिष्टः शृणु शङ्कर मद्वचः
गौरीं मे देहि पत्न्यर्थं मन्दरस्त्यज्यतामयम् ।
एवं कृते कृतार्थस्त्वमन्यथा नास्ति ते गतिः ॥ ५ ॥
उक्तोऽहं तेन दूतेन त्वया सह महागिरौ । स्मितानन:क्षणं भूत्वामयाप्रोक्तमिदंवचः
गच्छदूत ममादेशादन्धकं ब्रूहिसत्वरम् । इहाभ्येत्याहवंकृत्वा जित्वेमां सुन्दरीं नय

इत्युक्तः प्रययौ दूतस्तेनाख्यातं वचो मम ।
अन्धकोऽपि तदा दैत्यः समरार्थी तु मन्दरम् ॥
समायातः सहामात्यो बलेन चतुरङ्गिणा ॥ ८ ॥
मया सहततस्तस्य घोरंयुद्धमभूच्चिरम् । अन्धकस्यरथो घोरश्छिन्नोभिन्नःसमन्ततः
ततः क्रुद्धोऽन्धको देवि! रथात्तस्मादवप्लुतः । मद्रथंबलवान्गृह्यमयासह बलोत्कटः
युयुधे स महादैत्यः शूलेन ताडितो मया ॥ १० ॥
मया धृतोऽन्तरिक्षेसशूलप्रोतोमहासुरः । शूलप्रोतोऽथवैदुष्टस्तावत्सभ्रामितोमया
सुस्राव तस्य गात्रेभ्यः शोणितौघस्ततो महान् ।
बिन्दौ बिन्दौ तु रक्तस्य तत्तुल्या दानवास्तथा ॥ १२ ॥
सम्भूताः कोटिशो देवि! तैरहं पुनरर्द्दितः ।
किं कर्त्तव्यमिति ध्यायन्स्थितोऽहं तत्र भामिनि !॥ १३ ॥
मया चोत्पादिता दुर्गा रक्तदन्तासुभीषणा । अन्धकस्यतदा पीतंरक्तं बहुविधंतया
तस्मिन्पातेततो रक्तेनोत्तस्थुर्दैविचापरे । पूर्वोत्थितास्तयैवाशु निहतादानवाधिपाः
तेन शूलवरेणैव तत्क्षणान्निधनं गताः ॥ १५ ॥
स मामुवाच हृष्टात्मा कृताञ्जलिपुटोऽन्धकः । त्वयिभक्तिःसदामेस्तुदुर्लभंतवदर्शनम्
स्वामिना निहतश्चाहं कोऽन्यो धन्यतरो हि मत् ।
त्वच्छूलेन विनिर्भिन्नो ह्यन्तरिक्षे ततोऽप्यहम् ॥ १७ ॥
संकल्पाक्षेपविक्षेपं कल्पकार्यप्रवर्त्तकम् । सहस्रवक्त्रशिरसं त्वामहं शरणं व्रजे ॥१८
गिरीन्द्रतनयानाथं गिरीन्द्रशिखरालयम् । महालयकृतावासं त्वामहं शरणं व्रजे ॥
एवं स्तुतोऽहंदैत्येनशूलप्रोतेन सुन्दरि !। ततो मे करुणाजाताकृतोऽन्धकोगणस्तदा
स च शूलवरो देवि! मया प्रोक्तोमुदातदा । एहिशूलहतोदैत्यस्त्वयादुष्टोऽन्धकोमृधे
परितुष्टः प्रयच्छामि परमंस्थानमुत्तमम् । न देवैर्न च गन्धर्वैर्नापि तत्परमर्षिभिः ॥
सम्प्राप्यं मामनाराध्य तथा विध्वस्तकल्मषैः ।
मामुवाच ततः शूलः प्रणम्यानतकन्धरः ॥ २३ ॥

यदि प्रसन्नो भगवन्करुणा मयि तेयदि । कथयस्व परं स्थानंमनो मेयत्रशुद्धयति

दुष्टसम्पर्कसञ्जातमन्यत्पातकमात्मनः ॥ २४ ॥

ततो मया समादिष्टः करुणाश्लिष्टचेतसा ।

महाकालवनं रम्यमतिपुण्यफलप्रदम् ॥ २५ ॥

तत्रास्मत्प्राप्तिदं लिङ्गं लोकानुग्रहकारकम् । पृथुकेश्वरपूर्वेणतदाराधय यत्नतः ॥ २६

मदीयं वचनं श्रुत्वा स जगाम त्वरान्वितः । ददर्श तत्रतल्लिङ्गमनेकफलदायकम् ॥

लिङ्गे न च पुनर्दृष्टः शूलः शङ्करवल्लभः ।

सम्भूतोऽनेकवक्त्रस्तु हर्षाद्विस्मितमानसः ॥ २८ ॥

स्नेहात्संश्लेषितोऽत्यर्थं पृष्टस्तु कुशलं पुनः । कथितं तेन शूलेन दुष्टान्धकवधं तदा

प्रभुणा प्रेरितोऽत्यर्थं शुद्ध्यर्थं भवतोऽन्तिके ।

त्वद्दर्शनेन पूतोऽहं यास्यामि शिवसन्निधौ ॥

अद्यप्रभृति भूर्लोके मन्नाम्ना ख्यातिमेष्यसि ॥ ३० ॥

ततो भविष्यत्यधिकं दर्शनात्ते वृणोम्यहम् ।

किं तीर्थैर्विविधैः स्नातैः किं दानैर्विविधैः कृतैः ॥ ३१ ॥

तेप्राप्स्यन्ति फलं सर्वं ये त्वां द्रक्ष्यन्ति भक्तितः ॥ ३२ ॥

यः करिष्यति ते पूजां भक्तियुक्तोऽपि मानवः ।

अष्टम्यां वा चतुर्दश्यां दिने भौमस्य भक्तितः ॥ ३३ ॥

विमानवरमास्थाय कामगं रत्नभूषितम् । उदितादित्यसङ्काशं स मुदा विचरिष्यति

त्वन्नाम ये ग्रहीष्यन्ति सर्वदा भयपीडिताः ।

व्याधिभिः पाडिता नित्यं दुःखैर्वा क्लेशिता भृशम् ॥

न भविष्यति भीस्तेषां घोरसंसारसागरे ॥ ३५ ॥

ये त्वां द्रक्ष्यन्ति पुरुषा भावहीनाः प्रसङ्गतः ।

न पतिष्यन्ति संसारे नरकेचातिदारुणे ॥ ३६ ॥

इत्युक्तं तेन शूलेन लिङ्गमाश्लिष्य यत्नतः । एषते कथितो देवि! प्रभावः पापनाशनः

शूलेश्वरस्य देवस्य अथोङ्कारेश्वरं शृणु ॥ ३८ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये शूलेश्वरमाहात्म्यवर्णनंनामैक-
पञ्चाशत्तमोऽध्यायः ॥ ५१

द्विपञ्चाशत्तमोऽध्यायः

ओङ्कारेश्वरमाहात्म्यवर्णनम्

श्रीविश्वेश्वर उवाच

द्व्यधिकं देवि! जानीहि पञ्चाशत्तममीश्वरम् ।

ओङ्कारेश्वर इत्याख्या यस्याऽस्ति भुवनत्रये ॥ १ ॥

प्राकृते कल्पसङ्ज्ञे तुप्रथमे प्रथमं मया । वक्त्रादुत्पादितो देवि पुरुषः कपिलाकृतिः

ततःस पुरुषो दिव्यः किं करोमीत्युपस्थितः ।

विभजात्मानमित्युक्तो मयान्तर्द्धानगोऽभवत् ॥ ३ ॥

निर्वाणस्यैव दीपस्य गतिस्तस्य न लक्षिता ।

ततस्तस्याऽऽभवच्चिन्ता कथमात्मा विभज्यते ॥ ४ ॥

एवं चिंतयतस्तस्य चतुर्मित्योत्थितस्ततः । त्रिवर्णस्वररूपी च चतुर्वर्गफलप्रदः ॥

ऋग्यजुः सामनामा च ब्रह्मविष्णुशिवात्मकः ।

व्याप्नुवन्सकलाँल्लोकान्प्रभावैः पृथुभिस्तदा ॥ ६ ॥

ओङ्कारइतितस्याख्यामयादत्ताप्रसादतः । तदोकाभिरुदाराभिर्वाणीभिःसमलङ्कृतः

हृदयात्तस्य देवस्य वषट्कारः समुत्थितः । छन्दसांप्रवरा देवि ! चतुर्विंशाक्षरापरा

षट्कुक्षिःसात्रिपादाच पञ्चशीर्षोपलक्षिता । समीपवर्त्तिनीदेवीपार्श्वेतत्रव्यवस्थिता

गायत्रीमधुराभाषासावित्री लोकविश्रुता । सचोकारोमयाप्रोक्तोगायत्र्यासहपार्वति

सृष्टिं कुरु ममादेशाद्विचित्रामनया सह ॥ १० ॥
इत्युक्तस्त्रिशिखो भूत्वा हिरण्यसदृशाकृतिः ।
सृष्टिमुत्पादयामास स्वशरीरान्ममाऽऽज्ञया ॥ ११ ॥

पूर्वं देवगणाश्चैव त्रयस्त्रिंशच्च देवताः । मनुष्याऋषयश्चैव वेदप्रामाण्यतः कृताः ॥ १२
तेषां देहे प्रविष्टानां प्रादुर्भावः पुनर्भवेत् । यथा सूर्यस्य सततमुदयास्तमनं भवेत्
संहृत्योङ्कारमखिलान्सदेवासुरपन्नगान् । कृतात्मगर्भे भगवानोङ्कारो जगतः प्रभुः ॥
ससर्ज सर्वभूतानि कल्पान्ते पर्वतात्मजे । अव्यक्तःशाश्वतश्चैव तस्य सर्वमिदंजगत्
कर्त्ता चैव विकर्त्ता च संहर्ताचमहांस्तुयः । ओङ्कारपूर्वकादेवा यज्ञाश्चोङ्कारपूर्वकाः
ओङ्कारपूर्वकं ज्ञानं तपश्चोङ्कारपूर्वकम् । स्वयम्भूरिति विज्ञेयः स ब्रह्मा भुवनाधिपः

स वायुरिति विज्ञेयः सर्वज्ञः स प्रजाकरः ।
विश्वेदेवास्तथा साध्या रुद्रादित्यास्तथाश्विनौ ॥ १८ ॥

प्रजानां पतयश्चैव सप्त चैव महर्षयः । वसवोऽप्सरसश्चैव गन्धर्वाश्चैव राक्षसाः ॥

दैत्याः पिशाचा रक्षांसि भूतानि विविधानि च ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेच्छादयो भुवि ॥
सर्वे चतुष्पदाश्चैव तिर्यग्योनिगतास्तदा ॥ २० ॥

जङ्गमानिच सत्त्वानियच्चान्यज्जीवसञ्ज्ञकम् । कृत्वासर्वमशेषंच ममान्तिकमुपागतः
प्रणम्य प्रयतो भूत्वा वचनं चेदमब्रवीत् । कृता सृष्टिर्मयादेव! त्वत्प्रसादान्महेश्वर!
देहि मे परमं स्थानं यथा कीर्त्तिर्ध्रुवाभवेत् । ओङ्कारस्यवचः श्रुत्वामयाप्रोक्तंवरानने
ममाभीष्टकरं स्थानं नित्यमव्ययमक्षयम् । महाकालवनं दिव्यंसर्वसम्पत्करं शुभम्
तत्र ते भविताकीर्त्तिः शाश्वती नात्र संशयः । शूलेश्वरस्य देवपूर्वभागेव्यवस्थितम्

त्रिकल्पप्रभवं लिङ्गं त्वन्नाम्ना ख्यातिमेष्यति ।
ओङ्कारेश्वर इत्याख्या भविष्यति जगत्त्रये ॥ २६ ॥

इत्युक्तो हि मया देवि! ओङ्कारोद्धृष्टमानसः । ददर्श तत्रतल्लिङ्गं तस्मिँल्लिङ्गे लयंगतः
ततः प्रभृति वेदेषु ओङ्कारः क्रियते द्विजैः । पुण्यार्थं मङ्गलार्थं च प्रथमं सर्ववस्तुषु

लयंगतो यदोङ्कारस्तदाप्रभृति पार्वति ! मयोच्यमानं लिङ्गस्य प्रभावातिशयं शृणु
युगादिसहस्रेषु व्यतीपातशतेषु च । अयनानां सहस्रेषु यत्पुण्यं समुदाहृतम् ॥

तत्पुण्यमधिकं देवि! ॐकारेश्वरदर्शनात् ॥ ३० ॥

चतुर्ष्वपि च वेदेषु समधीतेषु यत्फलम् । ततोऽधिकं फलं प्रोक्तमोङ्कारेश्वरदर्शनात्
ब्रह्मचर्येण यत्पुण्यं यावज्जीवं कृतेन च । तत्पुण्यमधिकंप्रोक्तमोङ्कारेश्वरदर्शनात् ॥
करीषसाधने पुण्यं यच्चपुण्यमनाशके । तत्पुण्यमधिकं देवि! ॐकारेश्वरदर्शनात् ॥

पूजायां यत्फलं प्रोक्तं तस्य सङ्ख्या न विद्यते ॥ ३४ ॥

किं यज्ञैर्बहुवित्ताढ्यैः किं तपोभिः सुदुष्करैः । ॐकारदर्शनादेव तत्फलंलभतेयतः
पूजनात्स्पर्शनाद्वापि कीर्त्तनाच्छ्रवणात्तथा । ॐकारेश्वरदेवस्यनराःस्युर्मुक्तिभाजनाः
एष ते कथितो देवि! प्रभावः पापनाशनः । ॐकारेश्वरदेवस्य शृणु विश्वेश्वरं परम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्यॐकारेश्वरमाहात्म्यवर्णनं नाम
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

विश्वेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

त्रिपञ्चाशत्तमं विद्धिसुप्रसिद्धमथेश्वरम् । परंविश्वेश्वरं ख्यातं विश्वेषुभुवनेष्वपि
बभूव नृपतिः पूर्वं विदर्भायां विदूरथः । सोऽन्तः पुरायुतोपेतंचक्रे राज्यमकण्टकम्
जघानतापसंसोऽथ प्रमादान्मृगयांगतः । कृष्णाजिनधरंशान्तंध्यायन्तंब्रह्मशाश्वतम्
मृगं मत्वा महारण्ये ब्राह्मणं दैवमोहितः । तेन कर्मविपाकेन देहान्ते रौरवं गतः ॥

तत्रासौ यातना घोरा अनुभूयात्मकालतः ।
तस्मादिहागतो मर्त्ये सर्पो विषधरोऽभवत् ॥ ५ ॥

अदशत्सोऽपि कोपेन ब्राह्मणंचरणे प्रिये !। लकुटेन हतःसोऽपिपञ्चत्वं तत्क्षणाद्गतः च्युतस्तु नरकात्सिहोद्वितीयेऽभूत्सुदारुणः । राजानं भक्षयामासराजलोकैर्निपातितः पुनर्व्याघ्रो बभूवासौ तृतीयेऽपि भवान्तरे । तीक्ष्णपादनखैर्घोरैर्घातयामास सूकरान् तेनापि वैश्यो निधनं नीतःकश्चिद्वनान्तरे । निषादैर्निहतःसोऽपिबाणैःपञ्चत्वमागतः चतुर्थेऽपिगजो जातः सिंहाद्वधमवाप्तवान् । पञ्चमेमकरोजातः क्षाराम्भसिमहोदधौ स्नातुकामामथो रामामाजघानातिपापकृत् । धीवरैःकृतधिक्कारैर्बडिशैःसन्निपातितः पुनः षष्ठे भवेजातः पिशाचः पिशिताशनः । सिद्धमन्त्रैरथोदग्रैरथर्वप्रभवैर्भृशम् ॥ मन्त्री मन्त्रविदां श्रेष्ठो ब्राह्मणस्तं जघानह । सप्तमेसपुनर्जातो दुर्निरीक्ष्यवपुर्भृशम्

तीक्ष्णदंष्ट्रः करालास्यो मांसशोणितभोजनः ।
शुष्काङ्गो मरुभूमीषु (?) पापिष्ठो ब्रह्मराक्षसः ॥ १४ ॥
आक्रम्य निमिराजेन राज्ञा राक्षसशत्रुणा ।
समारोप्य धनुः सङ्ख्ये ब्रह्मास्त्रेण निपातितः ॥ १५ ॥

दारुणः सारमेयोऽभूदतिकृष्णोऽष्टमे भवे । स शूकरखुराघातव्रणैः पञ्चत्वमागतः ॥

नवमे जम्बु कोजातः श्मशाने स च मांसभुक् ।
लौल्यात्स निधनम्प्राप्तो दुःखार्त्तो दाववह्निना ॥ १७ ॥

दशमे त्वभवद्गृध्रस्तीक्ष्णतुण्डो भयावहः । पूतिमांसवसाहारो रोगेण निधनंगतः

एकादशेऽपिचाण्डालो गतोऽवन्त्यां वरानने! ।
द्रव्यस्य हरणार्थं वै प्रविष्टो द्विजवेश्मनि ॥ १६ ॥

स दण्डपाशिकेनैव प्राप्तोबद्धश्च तत्क्षणात् । आनीतोहिवधार्थायवृक्षाग्रेह्यवलम्बितः तत्रैव लिङ्गमासन्नं साध्विशूलेश्वरोत्तरे । तस्य दृष्टिपथं प्राप्तमतिविक्लवचेतसः ॥ क्षणेन निधनं प्राप्तः स गतस्त्रिदशालयम् । तत्र भुक्त्वा वरान्भोगानवतीर्यचभूतले जातःख्यातोविदर्भायांविश्वेशोनामपार्थिवः । जातिस्मरत्वमापन्नोलिङ्गदर्शनपुण्यतः

दुर्लभान्बुभुजे भोगान्प्राप्तं राज्यञ्चकार सः ।
सोऽभिषिच्य सुतं राज्ये विनीतमतिधर्मवित् ॥
संस्मरन्पूर्ववृत्तान्तं जगामाऽवन्तिकां पुरीम् ॥ २४ ॥

तत्र दृष्ट्वा महल्लिङ्गं दुर्दर्शमतितेजसा । दिव्येनचक्षुषाऽपश्यल्लिङ्गमध्ये चराचरम् ॥२५ लिङ्गमध्येस्थिताःसर्वेसागराःसरितस्तथा ।।द्वीपाश्चपर्वताश्चैवतथान्यादिव्यभूतयः चन्द्रमाः सह नक्षत्रैरादित्यश्चाग्निना सह । धनदोवरुणश्चैव यमः शक्रोमरुत्पतिः महतो देवगन्धर्वा ऋषयश्च तपोधनाः । नागायक्षाःपिशाचाश्च राक्षसा भीमविक्रमाः

ब्रह्माद्या देवताश्चान्याः स्कन्दो लम्बोदरस्तथा ।
सर्वं त्रिभुवनं देवि! लिङ्गमध्ये विलोकितम् ॥ २६ ॥
प्रभावं तस्य लिङ्गस्य ज्ञात्वा सम्यङ् महीपतिः ।
संयतः पूजयामास विश्वयोनिं महेश्वरम् ॥ ३० ॥

प्रसन्नश्चाभवत्तस्य वचनंचेदमब्रवीत् । वरं वरय भद्रं ते किमभीष्टं ददामि ते ॥३१॥ तेनोक्तंवचनंराज्ञायदितुष्टोसि मे प्रभो । ये त्वांपश्यन्तिमनुजाःश्रद्धयाऽश्रद्धयाऽथवा मा भूत्तेषां प्रपतनं घोरे संसारसागरे । विश्वेश्वरेति नाम्ना वै प्रसिद्धो भव भूतले इत्युक्ते वचने भूयो विश्वेशोऽलङ्कृतोगणैः । विमानेनसुदीप्तेनगतोलोकं मदीयकम् गणैर्नानाविधैःसार्द्धंस्तूयमाना वरानने!। । किरीटीकुण्डलीचैव मुक्ताहारविभूषितः

विमानं तस्य तद्दिव्यं परिक्रम्य समन्ततः ॥ ३५ ॥

समहेन्द्रधनाध्यक्षनानानाकनिवासिनः । मुनयःसिद्धगन्धर्वास्तथाचाप्सरसांगणाः नृत्येनाऽमरनारीणांविलोकितविनोदकः । युगकोटिसहस्रं तु मत्समीपेव्यवस्थितः अतो देवि भुवि ख्यातोदेवोविश्वेश्वरेश्वरः । दृष्ट्वा लिङ्गञ्चविश्वेशं पातकैर्विप्रमुच्यते सप्तजन्मकृतैर्देही मनोवाक्कायकर्मभिः । दृष्ट्वा विश्वेश्वरं लिङ्गं कृतकृत्यत्वमाप्यते ॥

तस्य नश्यति दौर्भाग्यमलक्ष्मीर्नाशमेति च ।
प्राप्नोति देही कामांश्च समृद्धिं मानसीं सदा ॥ ४० ॥
दुःस्वप्नो व्याधयः क्रूरा ग्रहा भूताश्च दारुणाः ।

प्रणश्यन्ति वरारोहे! विश्वेशे पूजिते सदा ॥ ४१ ॥

ये केचिच्छ्रद्धया युक्ता लिङ्गमाराधयन्ति वै । ते सर्वकामसम्पन्ना जायन्तेच युगेयुगे अन्तेगतिश्चसादिव्याजायतेमत्प्रसादतः। यत्रसम्पूज्यतेलिङ्गं तस्मिन्देशेशुभाःक्रियाः न तत्र दुर्भिक्षभयं नापमृत्युभयं क्वचित् । प्रेतयोनौच वैताला न नागा नच दंष्ट्रिणः एते च विष्णुब्रह्मेन्द्रकुबेरवरुणादयः । लिङ्गार्चनेन सम्प्राप्ता परां सिद्धिं महौजसः

एतु ते कथितो देवि! प्रभावः पापनाशनः ।

विश्वेश्वरस्य देवस्य कण्टेश्वरमतः शृणु ॥ ४६ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये विश्वेश्वरमाहात्म्यवर्णनं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशत्तमोऽध्यायः

कण्टेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

चतुः पञ्चाशतं विद्धि देवं कण्टेश्वरम्प्रिये! । यस्य दर्शनमात्रेण कृतकृत्यो नरोभवेत्

आद्यकल्पे पुरा देवि! राजाऽभूत्सत्यविक्रमः ।

स शत्रुभिर्जितः सङ्ख्ये हृतकोशोऽतिदुःखितः ॥ २ ॥

वनं जगाम गहनमेकाकी श्रमकर्शितः । तत्राऽऽश्रमं ददर्शाऽथ वशिष्ठस्य महात्मनः तेनर्षिणा वसिष्ठेन दृष्टमात्रः स भूपतिः । पूजितो विष्टराद्येन राजार्हेणच सादरम् ज्ञात्वा तपःप्रभावेण सूर्यवंशोद्भवं नृपम् । पप्रच्छागमनं देवि! कुशलं च पुनः पुनः

स नृपः कथयामास वसिष्ठाय सुदुःखितः ।

राज्यं च सकलं ब्रह्मन्! हतं विद्वेषिभिर्मम ॥ ६ ॥

त्वामहं शरणं प्राप्तो दुःखैकायतनो यतः ।

निष्कण्टकं कथं राज्यं भविष्यति पुनः प्रभो !।

उपदेशप्रदानेन प्रसादं कर्त्तुमर्हसि ॥ ७ ॥

तस्यतद्वचनंश्रुत्वा वसिष्ठो भगवानृषिः । ध्यात्वाचकथयामास बहुकौतूहलान्वितः महाकालवनंभूप! व्रज त्वं कार्यसिद्धये । दिव्या नदी वने तत्र विश्रुता भुवनत्रये ॥ तस्यास्तीरे शुभं लिङ्गं पृथुकेश्वरदक्षिणे । द्रक्ष्यसेनृपशार्दूलतपस्यन्तं च तापसम्

अस्थिचर्मावशेषं तु चीरवल्कलधारिणम् ॥ १० ॥

वचनात्तस्य विप्रस्य वसिष्ठस्य महात्मनः ।

जगाम सहसा राजा महाकालवनं शुभम् ॥ ११ ॥

ददर्श तापसं तत्र विरञ्चोविनमव्ययम् । उपवासकृतक्षामं द्वादशादित्यवर्चसम् ॥ तापसेन नृपो दृष्टो मित्रोऽयंमम वल्लभः । प्राप्तोराज्यपरिभ्रष्टो ज्ञात्वा वचनमब्रवीत्

एह्येहि नृपशार्दूल! दिष्ट्या प्राप्तोऽसि मेऽन्तिके ।।

इत्युक्त्वा तापसेनैव हुङ्कारश्च कृतस्तदा ॥ १४ ॥

तद्धुङ्कारात्तु पातालं भित्त्वा पञ्च च कन्यकाः ।

निर्ययुः काञ्चनं पीठमेका तासां प्रगृह्य वै ॥ १५ ॥

भृङ्गारंतुगृहीत्वान्यानिःसृताजलसम्भृतम् । पादप्रक्षालनार्थाय तृतीया समुपस्थिता अन्येद्वे व्यजनेगृह्य पार्श्वाभ्याञ्च व्यवस्थिते । ततो हुङ्कारमकरोत्पुनरेव महातपाः तेन हुङ्कारशब्देन देवलोकात्समागतम् । दृष्ट्वाप्सरसां सङ्घं नृत्यगीतमनोहरम्

अनन्तरं ददर्शाथ लिङ्गं ज्योतिष्करं परम् ।

उत्पन्नं च जगद्यस्मिंल्लीयते सचराचरम् ॥ १९ ॥

तद्दृष्ट्वा विस्मयाविष्टो बभूव नृपसत्तमः । प्रणम्यशिरसाविप्रं किमिदं द्विजसत्तम एवंपृष्टोनृपेणाथ स विप्रो वाक्यमब्रवीत् । सप्तजन्मनिराजेन्द्र! त्वयाऽहंपरितोषितः अतस्ते दर्शितामाया तपसादुष्करेण तु । लिङ्गस्यास्य प्रभावेण पश्यमेतपसोबलम् हुङ्कारेण कृतापृथ्वी जलपूर्णा तु तत्क्षणात् । हुङ्काराच्चजलंग्रस्तं मुखादग्निरजायत

हुङ्कारात्पृथिवी सर्वा जातावह्निमयी तदा । संहृत्य तत्क्षणाद्वह्निमुखाद्वायुर्विनिर्ययौ

हुङ्कारेण कृतं सर्वं तत्क्षणादेव पार्वति !।

न दिशः प्रदिशो वापि न नक्षत्रग्रहास्तदा ॥ २५ ॥

ततो बभ्राम तन्नास्ति स नृपो विस्मयान्वितः ।

चिन्तयामास सहसा क्व लिङ्गं क्व च तापसः ॥ २६ ॥

एवंचिन्तयतस्तस्यततः शब्दो महानभूत् । तस्माच्छब्दाच्चसञ्जातंपुरंप्राकारसम्वृतम्

सुहर्म्यकक्ष्यारचितं विशालं विशुद्धजाम्बूनदभूषितं च ।

दिव्यैर्जनैः सेवितमात्मविद्भिर्ददर्श राजा सहसा पुरं तत् ॥ २८ ॥

भूयोभवन्महाशब्दस्तस्मात्स्त्रीयुगलंबभौ । सितवस्त्रधराचैकाकृष्णवस्त्रधरासिता

पुनः शब्दो बभूवाथ तस्मात्पुरुषसत्तमः । द्विशिराःषण्मुखश्चैव पादैर्द्वादशभिर्युतः

पुनः शब्दाच्च सञ्जज्ञे पुरुषः सप्तधा गतः । संहृतं हि पुरस्तच्च दर्शयित्वाद्विजेन तु॥

प्रोक्तमित्थं विशालाक्षि! जातं कण्टकितं नृपम् ॥ ३१ ॥

पश्य लोकमिमं मह्यं तपसा निर्मितं नृप । त्वत्प्रियार्थमयं लोको दर्शितस्तेनृपोत्तम

एवमुक्तस्तदा तेन तापसेन नराधिपः । विस्मयापन्नहृदयः पप्रच्छ प्रयतः सुधीः ॥

भगवन् सितकृष्णे द्वे के स्त्रियौ द्विजसत्तम !।

कोऽसौ द्वादशपाद्विप्र द्विशिराः षण्मुखः पुनः ॥ ३४ ॥

कश्चासौ पुरुषो ब्रह्मन्य एकः सप्तधाऽभवत् ।

तस्य तद्वचनं श्रुत्वा कथयामास तापसः ॥ ३५ ॥

एते स्त्रियौ त्वया दृष्टे सितकृष्णे नृपोत्तम । ते च रात्र्यहनीप्रोक्तेब्रह्मणानिर्मितेपुरा

शीर्षद्वयञ्च यद्दृष्टं तेऽयने द्वे प्रकीर्तिते । मुखानियानि दृष्टानिषट्चतेह्यृतवः स्मृताः

पादा द्वादश ये दृष्टा मासा द्वादश ते स्मृताः ॥ ३७ ॥

यः पुमान्सप्तधा जात एकीभूतो नरेश्वर !। स समुद्रस्तुविज्ञेयःसप्तधैकोव्यवस्थितः

एतत्सम्वत्सरं चक्रं त्वत्प्रियार्थं निदर्शितम् ।

एवं विदित्वा राजेन्द्र! न शोकं कर्तुमर्हसि ॥ ३६ ॥

सर्वो विनश्वरो लोकः सदेवासुरमानुषः । मया दृष्टोहि बहुशोलिङ्गस्यास्यप्रभावतः

कुरु शत्रुविनाशाय लिङ्गस्यास्य च दर्शनम् ।

राज्यं निष्कण्टकं राजन्भविष्यति न संशयः ॥ ४१ ॥

एवमुक्तस्तदा राजा दृष्टवाँल्लिङ्गमुत्तमम् । दर्शनात्तस्य लिङ्गस्य कण्टका ये महीभृतः

विद्वेषिणो मृतास्तेऽपि श्रुतास्तेन महीभृता ॥ ४२ ॥

गतस्तंविषयं राजा चक्रवर्ती बभूव ह । लिङ्गस्यास्यप्रभावेण राज्यंकृत्वा महाधनैः

यज्ञैश्चविविधैरिष्ट्वा परं निर्वाणमाप्तवान् । तापसेन श्रुतं सर्वं दृष्टं ध्यानेन तेन वै ॥

लब्धं निष्कण्टकं राज्यं लिङ्गस्यास्य च दर्शनात् ।

मम मित्रेण सहसा राज्यभ्रष्टेन तेन वै ॥ ४५ ॥

अतोनाम सुविख्यातंकण्टेश्वरइतिक्षितौ । भविष्यति न सन्देहोदर्शनाद्राज्यदायकः

अद्यप्रभृति पश्यन्ति देवंकण्टेश्वरंशिवम् । तेषाञ्चकण्टकाःसद्योविनश्यन्तिनसंशयः

नैमिषेऽथ कुरुक्षेत्रे गङ्गाद्वारेच पुष्करे । स्नानात्संसेवनाद्वापि यत्पुण्यं च भविष्यति

तत्पुण्यं भविता सम्यक्श्रीकण्टेश्वरदर्शनात ॥ ४८ ॥

गृहिणो लिङ्गिनो वापि ये पश्यन्ति यतव्रताः ।

देवं कण्टेश्वरं भक्त्या तेषां सिद्धिर्भविष्यति ॥ ४६ ॥

जन्मान्तरसहस्रेण यत्पापं पूर्वसञ्चितम् ।

तत्सर्वं यास्यति क्षिप्रं श्रीकण्टेश्वरदर्शनात् ॥ ५० ॥

दत्तंजप्तं हुतं चेष्टं तपस्तप्तं कृत च यत् । ध्यानमध्ययनञ्चैव सर्वं भवति चाक्षयम्

एवं ब्रुवाणं तं वि' तापसं संशितव्रतम् । लिङ्गेनोक्तं विशालाक्षि! तुष्टेन वरपूर्वकम्

जरारोगविनिर्मुक्तः सर्वशोकविवर्जितः । भविष्यति गणाध्यक्षो वरदः सर्वपूजितः

अवध्यश्चापि सर्वेषां योगैश्वर्यसमन्वितः ॥ ५३ ॥

एवमुक्तोऽथ लिङ्गेन तापसो गणतांगतः । गणैः परिवृतो देवि! मम पार्श्वमुपागतः

अन्धकेन पुरा युद्धे सिंहनादो यदा कृतः ।

तदा देवि! मदीयन्तु जातं कण्टकितं वपुः ॥ ५५ ॥

उत्पन्नं च तदालिङ्गमशेषारिविनाशनम् । देवानां कण्टका येचदग्धालिङ्गाग्निनायतः
अतः कण्टेश्वरो देवो विख्यातो भुवनत्रये ॥ ५६ ॥
एष ते कथितो देवि! प्रभावः पापनाशनः ।
कण्टेश्वरस्य देवस्य शृणु सिंहेश्वरम्परम् ॥ ५७ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये कण्टेश्वरमाहात्म्यवर्णनं नाम
चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशत्तमोऽध्यायः

सिंहेश्वरमाहात्म्यवर्णनम्

श्रीईश्वर उवाच

पञ्चाधिकं विजानीहि पञ्चाशत्तममीश्वरम् । सिंहेश्वरंवरारोहे महाभयविनाशनम् ॥
सद्यःकल्पे त्वयादेवि!मदर्थं हिमहत्तपः । कृतं नीलोत्पलापाङ्गि! भीषणंसंशितव्रतम्
तपसा तव रौद्रेण दग्धं हि भुवनत्रयम् ॥ २ ॥
दुष्करं हितपो ज्ञात्वाभगवांश्चतुराननः । आगत्योवाचदेवेशोदेवि! त्वांशुभयागिरा
किं पुत्रि प्राप्तुकामासि किमलभ्यं ददामि ते ।
विरम्यतामतिक्लेशात्तपसोऽस्मान्ममाज्ञया ॥ ४ ॥
त्वया च वचनंश्रुत्वा गुरोर्गौरवगर्भितम् । प्रियंतथ्यंहितंतत्र वर्णनिर्णीतवाञ्छितम्
प्रत्युक्तः स तदाब्रह्माप्रणामनम्रया त्वया । तपसा दुष्करेणाप्तः पतित्वे शङ्करो मया
स मां श्यामलवर्णेति बहुशः प्रोक्तवान्भवः । श्यामाहं काञ्चनाकारावल्लभेनचसंयुता
भर्त्ता भूतपतिर्वश्यः कथं स्यादिति मे तपः ॥ ७ ॥
त्वदीयं वचनं श्रुत्वा वरार्हो वरदः प्रभुः । एवं भविष्यतीत्याह ब्रह्मा लोकपितामहः

कियता चैव कालेन वाञ्छासिद्धिर्भविष्यति ।
गौरीनाम्ना तु ते मूर्त्तिः कान्त्या दीप्ता भविष्यति ॥ ९ ॥
एतच्छ्रुत्वा त्वया वाक्यं ब्रह्मणः परमेष्ठिनः ।
क्रुद्धा त्वं गिरिजेऽत्यर्थंकालेऽभीष्टं भविष्यति ॥ १० ॥
क्रोधात्सिंहः समुद्भूतो वदनात्तेभयावहः । विवृतास्योमहारौद्रोजटाजटिलकन्धरः
प्रोद्धूतवल्गुलाङ्गूलो दंष्ट्रोत्कटमुखोत्कटः ।
तस्याऽऽस्ये पतितुं देवि! व्यवसायःकृतस्त्वया ॥ १२ ॥
सोऽपि सिंहः क्षुधाविष्टस्त्वां भक्षयितुमुद्यतः ।
नचैवासौ समर्थोऽभूद्वीक्षितुं वा तपोधिकाम् ॥ १३ ॥
स दह्यमानः सहसा तेजसा तपसा तव । पराङ्मुखः समभवत्प्राणत्राणपरायणः ॥
ततस्तवाभूत्करुणासिंहंप्रति यतव्रते !। क्षुधितस्य त्वया तस्य क्षीरंह्यमृतसन्निभम्
उत्पादितंस्तनाभ्यांतुतस्यसिंहस्यकारणात् । तथापिदह्यतेऽत्यर्थं दुष्टभावंयतोगतः
तेनोक्तं दह्यमानेन मातर्दग्धोस्मि तेजसा । त्वदीयेन दुराचारोदुष्टोऽहं पापविग्रहः ॥
त्वामत्तुकामोदुष्टात्मात्वयाहं जनितोऽधुना । तस्माद्यास्यामिनरकंमातृहागुरुघातकः
तस्यतद्वचनंश्रुत्वादुःखितस्य सुतस्यतु । ममत्वेन विशालाक्षिसिंहस्यकथितंत्वया
अवघ्नं विद्यते क्षेत्रं महाकालवनं सुत !। तत्र गच्छ ममादेशाच्छीघ्रं देवविनिर्मितम्
कण्टेश्वरस्य देवस्य समीपे लिङ्गमुत्तमम् । सिंहनादात्समुत्पन्नं शङ्करस्य महात्मनः
अन्धकासुरयुद्धे वै पीडिते वासवे पुरा । त्वदीयं वचनं श्रुत्वासिंहस्त्वरितविक्रमः
गतो महाकालवनं दृष्टो देवोऽथ तत्क्षणात् ।
दिव्यदेहो मृगारिस्तु जातोलिङ्गस्य दर्शनात् ॥ २३ ॥
ममत्वात्तस्यलिङ्गस्यत्वंगतातत्रपार्वति । सिंहिकारूपमास्थायशीघ्रंसिंहस्त्वयाप्रिये
दृष्टो दिव्यशरीरस्तु लिङ्गस्यास्य प्रभावतः । तवतुष्टिः पराजाताद्दृष्ट्वासिंहंमहाद्युतिम्
कृतं नाम त्वया देवि! लिङ्गस्यास्य वरानने ।
दिव्यदेहस्तु सिंहोऽयं जातो लिङ्गस्य दर्शनात् ॥ २६ ॥

अतः सिंहेश्वरो देवोभुविख्यातो भविष्यति । एतस्मिन्नन्तरे ब्रह्मासंप्राप्तस्तत्रसुव्रते

उवाच त्वां वरारोहे! देवैः परिवृतस्तदा ॥ २७ ॥

यएषसिंहः संभूतस्तव क्रोधात्सुतोयतः। ततोऽसौवाहनो देवि!भविष्यतिनसंशयः

लिङ्गं सिंहेश्वरं भक्त्या यः पश्यति समाहितः ।

तस्य वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥ २९ ॥

कीर्तनान्मुच्यतेपापाद्दृष्ट्वाभद्राणिपश्यति । स्पर्शनादस्यलिङ्गस्यपुनात्यासप्तमंकुलम्

मनसा चिन्तितान्कामांस्तांश्च प्राप्नोति पुष्कलान् ।

तदैव पुरुषो मुक्तो जन्मदुःखजरादिभिः ॥ ३१ ॥

यदा पश्यति सिंहेशं संसारार्णवतारकम् ।

व्यालव्याघ्रादयश्चौरास्तथा साहसिकाश्च ये ॥ ३२ ॥

तेभ्यो भयं न भवति श्रीसिंहेश्वरदर्शनात् । यज्ञानां तपसां चैवदानादीनांचयत्फलम्

तत्फलं जायते सम्यग्दृष्ट्वा सिंहेश्वरं शिवम् ॥ ३३ ॥

मदीयं लोकमाप्नोति सुरासुरनमस्कृतम् । यः पश्यतिप्रयत्नेन देवं सिंहेश्वरं तदा॥

इत्युक्त्वाऽसौ जगामाऽथ ब्रह्मा लोकं स्वकं प्रिये !।

यद्वपुस्तव पूर्वं स्यात्कालकान्तिकलङ्कितम् ॥

प्रभावात्तपसस्तस्य गौरत्वं प्राप्तमद्भुतम् ॥ ३५ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । सिंहेश्वरस्य देवस्य रेवन्तेशमतः शृणु

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-

चतुरशीतिलिङ्गमाहात्म्ये सिंहेश्वरमाहात्म्यवर्णनंनाम

पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशत्तमोऽध्यायः

रेवन्तेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

षट्पञ्चाशत्तमं विद्धि रेवन्तेश्वरसञ्ज्ञकम् । यस्य दर्शनमात्रेण परा सिद्धिः प्रजायते

असहन्ती पुरा सञ्ज्ञारवेस्तेजोऽतिदुःसहम् । तपःकर्त्तुं गतादेवि! ज्ञातासूर्येणसुव्रता

अश्वरूपं ततः कृत्वा जगामाथोत्तरान्कुरून् । ददृशेतत्र सञ्ज्ञांचवडवारूपधारिणीम्

गता सा सम्मुखं तस्यपृष्ठरक्षणतत्परा । ततोऽभून्नासिकायोगस्तयोस्तत्र समेतयोः

नासत्यदस्रौ तनयावश्ववक्त्रौविनिर्गतौ । रेतसोऽन्तेच रेवन्तः खड्गीचर्मीतनुत्रधृक्

अश्वारूढः समुद्भूतस्ततो बाणधनुर्द्धरः । तेन वै जातमात्रेण अश्वारूढेन लीलया

निर्जितं च जगच्चेदं सदेवासुरमानुषम् ॥ ७ ॥

ततो देवाः पराभूता ब्रह्माणं शरणं गताः । प्रणम्य कथयामासुर्भयकम्पितकन्धराः ॥

अस्माकं विभवं तेजो रविपुत्रेण नाशितम् । रेवन्तेन सुरेन्द्रेण शृणु लोकपितामह

तस्य गात्रसमुद्भूतो वह्निर्धावति कालजित् ।

ज्वलन्ति पादपास्तेन पतन्ति शिखराणि च १० ॥

सर्वतो व्याकुलीभूतंहाहाकारमचेतनम् । तेनैवपीडितं सर्वं ज्वालामालासमाकुलम्

दशदिक्षु प्रवृत्तोऽयं संवृद्धो हव्यवाहनः । सर्वं किंशुकसङ्काशं प्रज्वलन्निव दृश्यते ॥

इति तेषां वचः श्रुत्वा ब्रह्मणोक्तंवरानने !। ज्ञातं मया सुरश्रेष्ठाभवतां कार्यमीदृशम्

भविष्यति च वस्तच्च काङ्क्षितं यत्सुरोत्तमाः ।

गच्छध्वं सहसा तस्माच्छङ्करं शरणं सुराः !॥ १४ ॥

ब्रह्मणो वचनं श्रुत्वा ममान्तिकमुपागताः । त्रिदशा भयसंत्रस्तानत्वामामिदमब्रुवन्

आदित्यतनयेनैव रेवन्तेन महेश्वर !। दग्धं त्रिभुवनं सर्वं शरीरस्थेन वह्निना ॥

तेजसा महता चैव विक्रमेण बलेनच ॥ १६ ॥

असाध्यः किल सोऽस्माकं सर्वेषां देवसत्तम । भवान्प्रभवतेतस्यनान्यःशङ्करकश्चन
त्वां प्रपद्यामहे सर्वे भयार्त्ताः शरणार्थिनः । शरणं वरदं देवं त्रिदशानां महेश्वर !॥
मया स्मृतः सूर्यपुत्रो रेवन्तस्तत्क्षणात्प्रिये । प्राप्तःप्रीतिप्रसन्नात्मावचनंचेदमब्रवीत्
किं मया देव कर्त्तव्यं ब्रूहि सर्वमशेषतः । ततो मया सूर्यपुत्र उत्सङ्गे च कृतस्तदा

स्नेहादाचुम्बितोमूर्ध्नि परिष्वक्तः पुनः पुनः ।
ददामि ते महाभाग! वरं वरय सुव्रत !॥ २१ ॥

परितुष्टोऽस्मि ते कामं यथेष्टंकाममाप्नुहि । इदमाज्ञापयामित्वांश्रेयश्चैवमवाप्स्यसि
ममाभीष्टं परं स्थानं विद्यते पृथिवीतले । अक्षयं प्रलये पुत्र! महाकालवनं शुभम् ॥

तत्र दास्यामि ते स्थानं तत्र कीर्त्तिर्भविष्यति ॥ २३ ॥

पूर्वे कण्टेश्वरस्यापि स्थानं परमदुर्लभम् । तत्र त्वं वसरेवन्तलिङ्गंद्रक्ष्यसिशाश्वतम्

सर्वदा त्रिदशैः पूज्यो भविष्यसि न संशयः ।
गुह्यकाधिपतिस्त्वं च स्वर्गलोके भविष्यसि ॥ २५ ॥

अश्वशालासु सर्वासुपूजनीयोभविष्यसि । नृपतीनां गृहेचैवभविष्यसि सुपूजितः

तेजो मदीयं तत्स्थानं लिङ्गाकारं सनातनम् ।
पूजितं त्रिदशैस्तत्र संसेव्यं यत्नतस्त्वया ॥ २७ ॥

एवमुक्तोमया देवि! रेवन्तोरविजस्तदा । जगामाकाशमाविश्य महाकालवनंक्षणात्
ददर्श तत्र तल्लिङ्गं ज्योतीरूपं सनातनम् । सूर्यपुत्रस्तुरेवन्तोदृष्टो लिङ्गेन पार्वति !॥
प्रोक्तः प्रणयपूर्वेणदिष्ट्यादृष्टोऽसिसूर्यज !। अद्यप्रभृतितेनाम्नाख्यातिंयास्यामिभूतले
स्थातव्यं मत्समीपे तु सूर्यपुत्रत्वयासदा । अक्षया भविताकीर्त्तिस्त्वदीयाभुवनत्रये
रेवन्तेश्वरसञ्ज्ञोऽहं भविष्यामि न संशयः । येमांद्रक्ष्यन्तिरेवन्तभक्त्यापरमयायुताः

तेषामश्वा भविष्यन्ति विजयो यश ऊर्जितम् ॥ ३२ ॥

ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनन्तकम् । गुह्यकानांपतिर्भूत्वा स्वर्गलोकेसवत्स्यति
लिङ्गस्य वचनं श्रुत्वा प्रोक्तं वै रविसूनुना । रेवन्तेन विशालाक्षिसन्तुष्टेनान्तरात्मना

देहि मे ह्यचलां भक्तिं देहि मे स्थानमुत्तमम् ।

देहि मे परमं ज्ञानं ध्रुवां कीर्तिं च देहि मे ॥ ३५ ॥

भगवन्भूतभव्येश भवबन्धभयापह !। संस्कृतार्थोऽस्मिसञ्जातस्तव देवस्य दर्शनात

जन्मकोटिसुसंशुद्धा ये त्वां पश्यन्ति देहिनः ।
न तेषां पुनरावृत्तिर्घोरसंसारसागरे ॥ ३७ ॥

इत्युक्त्वा रविसूनुर्वै रेवन्तो रविवल्लभः । रेवन्तेश्वरदेवस्य समीपे संव्यवस्थितः
एष ते कथितो देवि! प्रभावः पापनाशनः । रेवन्तेश्वरदेवस्य घण्टेश्वरमथो शृणु ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये रेवन्तेश्वरमाहात्म्यवर्णनंनाम-
षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

——:*:——

सप्तपञ्चाशत्तमोऽध्यायः

घण्टेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

सप्तपञ्चाशतं विद्धि घण्टेश्वरमथो शृणु । यस्य दर्शनमात्रेण कामावाप्तिश्च जायते ॥
घण्टोनाम गणश्रेष्ठो बभूव मम वल्लभः । चाक्षुषस्य मनोः काले कौतुकार्थंयदृच्छया

प्रस्थितो ब्रह्मसदनं द्रष्टुं ब्रह्माणमव्ययम् ॥ २ ॥
अथायान्तं समालोक्य गन्धर्वं गीतकोविदम् ।
चित्रसेनं गणश्रेष्ठः पप्रच्छ कुशलं मुदा ॥ ३ ॥

मया तत्रैव गन्तव्यं सदने परमेष्ठिनः । गीतैराराधयिष्यामि ब्रह्माणं जगतां पतिम्
चित्रसेनोऽथतंदेवि! प्रत्युक्तोघण्टमब्रवीत् । पद्मयोनिः सुरैःसार्धंगुह्यंमन्त्रमचीकरत्

एतच्छ्रुत्वा गणो घण्टस्तस्थौ विस्मितमानसः ।
मुहूर्तं चिन्तयामास प्रतिहारनिवारितः ॥ ६ ॥

हित्वा स्वामिनमीशानंद्रष्टुं ब्रह्माणमागतः । प्रवेशोपिनलभ्येतप्रसादोदूरतःस्थितः
एवं चिन्तयतस्तस्य साग्रः संवत्सरो गतः ।
घण्टस्य ब्रह्मणो द्वारि प्रवेशो देवि! नाऽभवत् ॥ ८ ॥
निर्गच्छन्तमथालोक्यवीणाहस्तंसमुत्सुकम् । नारदं सगणश्रेष्ठः पद्मयोनिगृहोदरात्
प्रोक्तो घण्टेन सहसा मां निवेदय नारद !। गणोऽहं गीततत्त्वज्ञो महादेवस्य वल्लभः
दर्शनार्थं समायातो ब्रह्मणः परमेष्ठिनः । घण्टस्य वचनं श्रुत्वा प्रीतिमानभवन्मुनिः
नारदः प्रत्युवाचेदं समाश्वास्य सकंतवम् ॥ ११ ॥
अहं बृहस्पतेः पार्श्वे प्रेषितोऽस्मि गणाधिप !।
किञ्चित्कार्यान्तरं प्रष्टुं ब्रह्मणालोककर्तृणा ।
आयास्यामि क्षणेनैव तावत्कालं प्रतीक्ष्यताम् ॥ १२ ॥
इत्युक्त्वा नारदो देवि! ममपार्श्वमुपागतः । वृत्तान्तंकथयामासघण्टस्यमुनिसत्तमः
ईदृशो दुर्लभो भृत्यो घण्टेनसदृशःप्रभो । यस्त्वांत्यक्त्वागणोदेवसेवार्थंपरमेष्ठिनः
स्थितः संवत्सरं साग्रं प्रवेशं न च लब्धवान् ॥ १४ ॥
तच्छ्रुत्वा वचनं तस्य नारदस्य मुनेस्तदा । मयाशप्तस्तुकोपेन पत घण्ट! महीतले
मां त्यक्त्वा हि गतोन्यत्र सेवार्थं परवेश्मनि ।
मयेत्युक्ते च वचने ब्रह्मद्वारि स्थितोऽपि सन् ॥ १६ ॥
पतितो भूतले घण्टो देवदारुवनान्तिके । आत्मानं पतितं दृष्ट्वा भूमौघण्टेनपार्वति!॥
प्रोक्तं शोकोत्तरेणैव वचनंगद्गदाक्षरम् । सेवार्थं यातियोऽन्यत्रपरिहृत्य स्वकंप्रभुम्
स याति नरकं घोरमपकीर्तिं च विन्दति । नारदेन मम त्वद्य वञ्चितस्यद्वयंगतम्
यस्मात्स्वामी न मे ब्रह्मा न च देवो महेश्वरः ॥ १६ ॥
एवं विलपतस्तस्य नारदो मुनिसत्तमः । आजगाम तमुद्देशं यत्र घण्टोव्यवस्थितः
देवदारुवने देवि! दर्शनार्थं तपस्विनाम् । घण्टेन नारदो दृष्टो भीतेनाऽऽकुलचेतसा॥
अवस्थामीदृशीं कृत्वा किमन्यन्मे करिष्यति ।
एवं तं चिन्तयानं तु नारदो वाक्यमब्रवीत् ॥ २२ ॥

गणाध्यक्ष! नतेकार्योमन्युःपुण्यविनाशनः । कीर्त्यर्थंपतितोघण्टप्रायश्चित्तार्थमेवच
प्रायश्चित्तविशुद्धात्मा प्रभुं प्राप्स्यसि शङ्करम् ।
तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ २४ ॥
रेवन्तेश्वरपूर्वे तु विद्यते लिङ्गमुत्तमम् । सर्वसम्पत्करंदिव्यंत्वन्नाम्नाख्यातिमेष्यति
इत्युक्तो नारदेनैव जैगीषव्यः समागतः । तेनापि कथितं सर्वं सत्यमुक्तमनेन वै ॥
नारदेन गणाध्यक्ष! कीर्त्तिस्ते भविताऽक्षया ।
कश्यपेन मृकण्डेन कण्वेन जमदग्निना ॥ २८ ॥
अत्रिणा भृगुणा देवि!लोमशेनसुरर्षिणा । प्रोक्तोघण्टोगतः शीघ्रं महाकालवनंशुभम्
यत्र घण्टानिनादेन युध्यतो मम संयुगे । पापक्षयकरं देवि! संभूतंलिङ्गमुत्तमम् ॥
दृष्टं तत्र गणेनैव लिङ्गं तेजोमयं शुभम् ॥ २९ ॥
दर्शनात्तस्य लिङ्गस्य भूयो घण्टो गणोऽभवत् ।
लक्ष्म्या कान्त्या समायुक्तः सहस्रकिरणाकृतिः ॥ ३० ॥
घण्टोऽभिनन्दितोऽत्यर्थं विमानैः सार्वकामिकैः ।
मम पार्श्वं समायातो ममातीव प्रियोऽभवत् ॥ ३१ ॥
ये पश्यन्ति विशालाक्षि! देवं घण्टेश्वरं शिवम् ।
ते घण्टाभिर्नादितास्तु विमानैः सार्वकामिकैः ॥ ३२ ॥
यास्यन्तिसुचिरंकालंममलोकंसनातनम् । घण्टेश्वरंपरंलिङ्गंनाख्येयंयस्यकस्यचित्
व्याधितो यदि वादीनो दुःखितो व भवेन्नरः । यःपश्यतिप्रसङ्गेनदेवंघण्टेश्वरंप्रिये
दीप्तकाञ्चनवर्णाभैर्विमानैः सार्वकामिकैः ॥ ३४ ॥
गन्धर्वाप्सरसां मध्ये स्वर्गे मोदति मानवः ।
ईप्सिताँल्लभते कामान्वीणावेणुविनोदितः ॥ ३५ ॥
ततः स्वर्गात्परिभ्रष्टः सर्वैश्वर्यसमन्वितः । हिरण्यधान्यसम्पूर्णे समृद्धेजायते कुले
राजा वा राजतुल्यो वा जम्बूद्वीपपतिर्भवेत् ॥ ३६ ॥
यः पूजयतिदेवेशं श्रद्धया परया युतः । स याति परमं स्थानमपुनर्भवकारणम् ॥

एष ते कथितो देवि! प्रभावः पापनाशनः। घण्टेश्वरस्य देवस्यप्रयागेशमथो शृणु

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये घण्टेश्वरमाहात्म्यवर्णनंनाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशत्तमोऽध्यायः

प्रयागेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

प्रयागेश्वरसञ्ज्ञं तु सर्वकामकरं परम्। अष्टाधिकं विजानीहि पञ्चाशत्तममीश्वरम्

आसीत्प्रथमकल्पे तु मनुः स्वायम्भुवःपुरा। तस्यप्रियव्रतःपुत्रोयज्वापरमधार्मिकः

स चेष्ट्वाबहुभिर्यज्ञैः समाप्तवरदक्षिणैः। सप्तद्वीपेषु सम्प्राप्य भरतादीन्सुतान्प्रिये ॥

स्वयं विशालां बदरीं गत्वा तेपे महत्तपः। कालेन बहुना तत्रनारदः समुपस्थितः

पूजितो विष्टरार्घेण राज्ञा प्रियव्रतेन च। स पृष्टः पूजयित्वा तु किमाश्चर्यंवदस्वमे

इत्युक्तः कथयामास नारदो मुनिसत्तमः। श्वेतद्वीपे मया राजन्कन्यादृष्टा सरोवरे

सा च पृष्टा विशालाक्षी कस्माद्वससि निर्जने।

काऽसि भद्रे! कथं वासि किं वा कार्यमिह त्वया ॥ ७ ॥

कर्तव्यं चारुसर्वाङ्गि तन्ममावक्ष्व शोभने!। एवमुक्तामयासाहिमांदृष्ट्वामीलितेक्षणम्

स्मृत्वा तूष्णींस्थिता यावत्तावन्मे ज्ञानमुत्तमम।

विस्मृताः सर्ववेदाश्च सर्वशास्त्राणि चैव हि ॥ ६ ॥

ततोऽहंविस्मयाविष्टश्चिन्तामोहसमन्वितः। तामेवशरणंगत्वायावत्पश्यामिपार्थिव

तावद्दिव्यःपुमांस्तस्याःशरीरेसमदृश्यत। तस्यापिपुंसोहृदयेद्वितीयस्तस्यचोरसि

तस्यापि हृदये चान्यस्तृतीयस्तु व्यवस्थितः ॥ ११ ॥

ततः पृष्टा मया देवी सा कुमारी कथञ्चन। वेदा नष्टाममाशेषा भद्रेकिंब्रूहिकारणम्

कन्योवाच

माताहंसर्ववेदानां सावित्रीनाम नामतः। मां न जानासियेन त्वमतोवेदा हृतास्तव

एवमुक्ते मया पृष्टा विस्मयेन महीपते!। वेदानां त्वं तु माता वैकथयस्वममानघे

त्वदीयहृदये देवि! क एते पुरुषास्त्रयः ॥ १५ ॥

कन्योवाच

य एष मच्छरीरस्थः शुभाङ्गश्चारुशोभनः। एष ऋग्वेदनामा तु यजुर्वेदो द्वितीयकः

सामवेदस्तृतीयस्तु त्रयो वेदा मयि स्थिताः।

त्रयोऽग्नयस्त्रयो देवा मच्छरीरे स्थिता द्विज!॥ १७ ॥

इत्युक्त्वा सा तदा कन्या पश्यतो मम भूपते!।

अन्तर्द्धानं गता सद्यस्ततोऽहं विस्मितोऽभवम् ॥ १८ ॥

किं करोमि क्व गच्छामि शरणं यामि कं प्रभुम्।

कथमाविर्भविष्यन्ति वेदाः शास्त्राणि साम्प्रतम् ॥ १६ ॥

कामिकस्तीर्थराजस्तुप्रयागःश्रूयते श्रुतौ। अहंतत्रगमिष्यामिज्ञानंसम्यग्भविष्यति

नष्टवेदेन रैभ्येण प्राप्ता सिद्धिरनुत्तमा। सावित्री श्रूयते तत्र अक्षयवटसन्निधौ ॥

एवं मनसि सन्ध्यायगतोऽहं नृपसत्तम!। प्रयागं कामिकं तीर्थं सर्वदेवनमस्कृतम्॥

तपस्तीव्रं मया तत्र तप्तं परमदुष्करम्। अथाजगाम राजेन्द्र प्रयागोमूर्त्तिमान्स्वयम्

उक्तोऽहं प्रणयात्तेन न मांतापय नारद। ब्रह्मपुत्र! प्रयागोऽहं भीषितस्तपसा तव॥

भवतः पार्श्वमायातः प्रणयेन तपोधन!। धन्योऽसिसर्वथा ब्रह्मंस्तपसाचविशेषतः

मया सार्धं त्वयाब्रह्मन्!गतिःकार्याऽविकल्पतः। महाकालवनेरम्येतत्रतेज्ञानमुत्तमम्

भविष्यति न सन्देहो मम कीर्त्तिश्च सुस्थिरा ॥ २६ ॥

एवं हि ब्रुवतस्तस्य प्रयागस्य नृपोत्तम!। प्रादुर्बभूव सहसा पीतवासा जनार्द्दनः ॥

शङ्खचक्रगदापाणिर्गरुडस्थो वियद्गतः। उवाच मेघगम्भीरं वाक्यं स पुरुषोत्तमः ॥

एहि नारद! गच्छामः प्रयागो यत्र यास्यति।

कृष्णस्य वचनं श्रुत्वा मया प्रोक्तो जनार्दनः ॥ २६ ॥
ज्ञानं मे देहि देवेश! कथं यास्यामि तद्वनम् । महाकालं जगन्नाथ श्रुतज्ञानविवर्जितः
इत्युक्तः श्रीधरेणाहं महाकालवनं नृप । आनीतस्तत्क्षणाच्छीघ्रं प्रयागसहितस्तदा
घण्टेश्वरस्य पूर्वे तु नवनद्यास्तु दक्षिणे । तत्र लिङ्गमनादि तु ज्योतीरूपं सनातनम्
प्रयागः पूजयामास पश्यतो मम भूपते । लिङ्गेनोक्तं प्रसन्नेन किमर्थं त्वमिहागतः ॥
प्रयाग! प्रयतो भूत्वा प्रसन्नोऽहं सदा तव । दर्शनं च मदीयं तुविफलं न भविष्यति
इत्युक्तस्तेन लिङ्गेन मदर्थं प्रार्थितस्तदा । ज्ञानंदेहि द्विजायास्मै नारदाय महात्मने ॥
नष्टा वेदाश्च शास्त्राणि सावित्र्या दर्शनात्प्रभो !॥ ३६ ॥
ततो लिङ्गात्समुत्तस्थौब्रह्मा वेदैर्वृतस्तदा । षडङ्गैःसरहस्यैश्च पुराणैःसहितस्तदा
इत्युक्तोऽहं तदा देव्या सावित्र्या नृपसत्तम !।
लिङ्गस्यास्य प्रभावेण प्रयागाभ्यर्थितस्य वै ॥ ३८ ॥
प्रतिभास्यन्ति ते वेदा धर्मशास्त्राणिनारद !। इत्युक्ते वचने भूयःप्राप्ता वेदा मया नृप
ज्ञानं षडङ्गसहितं शास्त्राणिविविधानिच । लब्धज्ञानेन राजेन्द्र मयाप्रोक्तंवचस्तदा
प्रयागेनार्चितो देवो मम ज्ञानस्य कारणात् ।
प्रयागेश्वरसञ्ज्ञस्तु ख्याति लोकेषु यास्यति ॥ ४१ ॥
तदाप्रभृति तल्लिङ्गं तीर्थकोटिशतैर्वृतम् । स्वर्गापवर्गफलदं तत्र त्वं गन्तुमर्हसि ॥
किमनेनाश्वमेधेन इष्टेन नृपसत्तम । अश्वमेधशतफलं जायते तस्य दर्शनात् ॥ ४३ ॥
तपसा किं सुतप्तेन कायक्लेशकरेण तु । वाञ्छितं लभते सद्यःप्रयागेश्वरदर्शनात् ॥

ईश्वर उवाच

नारदस्य वचः श्रुत्वा स्वायंभुवसुतोनृपः । प्रियव्रतोमहादेवि ! महाकालवनं गतः
ददर्श तत्र तल्लिङ्गं नवनद्यास्तु दक्षिणे । दर्शनात्तस्य लिङ्गस्य मत्समीपं समागतः ॥
मया सम्मानितो देवि! गणानामधिपः कृतः ।
ये पश्यन्ति नरा भक्त्या प्रयागेश्वरमीश्वरम् ॥
ते धन्या मानुषे लोके क्लिश्यन्त्यन्ये निरर्थकाः ॥ ४७ ॥

या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः ।
सा गतिर्जायते सम्यक्प्रयागेश्वरदर्शनात् ॥ ४८ ॥
माघमासे समेष्यन्ति प्रयागेश्वरदर्शनम् । कर्त्तुं ये मानुषास्तेषामश्वमेधः पदे पदे ॥
एष ते कथितो देवि! प्रभावः पापनाशनः । प्रयागेश्वरदेवस्य शृणु सिद्धेश्वरं परम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये प्रयागेश्वरमाहात्म्यवर्णनं
नामाऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः

सिद्धेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

एकोनषष्टिकं विद्धि देवं सिद्धेश्वरं प्रिये । तस्य दर्शनमात्रेण सिद्धिःपुंसां प्रजायते
आसीदश्वशिरानाम राजा परमधार्मिकः । सोऽश्वमेधेन यज्ञेन इष्ट्वा स बहुदक्षिणम्
स्नातश्चाऽवभृथे हृष्टो ब्राह्मणैः परिवारितः ।
यावदास्ते स राजर्षिस्तावत्सिद्धोऽतिदीप्तिमान् ॥ ३ ॥
नानौषधिप्रभावज्ञो मन्त्रतन्त्रविशारदः । आययौकपिलःश्रीमाञ्जैगीषव्यश्चसिद्धराट्
तयोस्त्वरितमुत्थाय सराजाभ्यागतक्रियाम् । चकारपरयायुक्तोमुदावैपृथिवीपतिः
तावर्चितावासनस्थौ क्षमाशीलौ शुचिव्रतौ ।
महौजसौ महाभागौ मुमुक्षू मुनिपुङ्गवौ ॥ ६ ॥
विद्याविनयसम्पन्नौब्रह्मचर्यपरायणौ । अनेकसृष्टिसंहारस्थितिकार्यपरायणौ ॥ ७ ॥
उदयादित्यसङ्काशौ विभावसुसमद्युती । तेजोराशिसमायुक्तौ दुर्निरीक्ष्यौपृथग्जनैः
विनयेनोपसङ्गम्य प्रणिपत्याभिवाद्य च । स राजा प्राञ्जलिर्भूत्वा प्रश्नमेनमपृच्छत

अश्वशिरा उवाच

श्रुतंमयामुनिश्रेष्ठौनान्योदेवोजनार्द्दनात् । ध्यातोथपूजितोनृणांमुक्तिदोभवबन्धनात्
संस्मृते तु हृषीकेशे नराणां कोटिजन्मजम् । अशुभंक्षयमाप्नोति कथंनप्रणमेद्धरिम्

समाराध्य जगन्नाथं शक्राद्यास्त्रिदिवौकसः ।

वसन्ति मुदिताःस्वर्गे दिव्यद्युतिसमन्विताः ॥ १२ ॥

जन्ममृत्युजरा रोगैर्दुःखानि विविधानिच । प्रयान्तिविलयंसद्यः प्रसन्ने गरुडध्वजे
इतिपृष्टस्तदातेनप्रार्थितेन यशस्विना । ऊचतुस्तं नृपं सिद्धौसिद्धिविज्ञानकोविदौ
कएषप्रोच्यते राजंस्त्वया नारायणोऽधुना । आवांनारायणौद्वौतुत्वत्प्रत्यक्षंगतौनृप

अश्वशिरा उवाच

भवन्तौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्विषौ ।

युवां नारायणौ कस्मादिति वाक्यमुवाच सः ॥ १६ ॥

शङ्खचक्रगदापाणिः पीतवासा जनार्द्दनः । गरुडस्थो हृषीकेशः कस्तस्यसदृशोभुवि

तस्य राज्ञो वचः श्रुत्वा संसिद्धौ योगकोविदौ ।

दर्शयामासतुस्तौ हि कृत्वा नारायणं वपुः ॥ १८ ॥

कपिलो मन्त्रमाहात्म्यात्स्वयं विष्णुर्बभूव ह ।

शङ्खचक्रगदापाणिः पीतवासाश्च तत्क्षणात् ॥ १६ ॥

जैगीषव्यश्च गरुडस्तत्क्षणात्समजायत । ततः समभवत्तत्र राजवेश्मनिकौतुकम् ॥
दृष्ट्वा नारायणं देवं गरुडस्थं सनातनम् । आश्चर्यं तादृशं दृष्ट्वा स राजाविस्मयान्वितः

उवाच क्ष (क्षा) म्यतां सिद्धौ नायं विष्णुरथेदृशः ॥ २१ ॥

तस्य ब्रह्मा समुत्पन्नो नाभिपङ्कजमध्यतः । तस्मात्तुब्रह्मणो रुद्रः सविष्णुःपरमेश्वरः

इति राज्ञो वचः श्रुत्वा तदा तौ सिद्धसत्तमौ ।

चक्रतुः परमां मायां योगाचार्यौ सुमान्त्रिकौ ॥ २३ ॥

कपिलः पद्मनाभस्तु पद्ममध्ये प्रजापतिः । बभूव स्वयमेवात्र सहसा योगतस्तदा ॥
जैगीषव्योऽथ रुद्रस्तु तस्यैवाङ्केव्यवस्थितः । ददर्शमहदाश्चर्यं सराजायोगमोहितः

कौतुकात्प्रत्युवाचेदं भीतः कम्पितकन्धरः ।

नेत्थं भवति विश्वेशो मायैषा योगिनां तदा ॥

सर्वरूपी हरिः श्रीमान्सर्वगः सर्वदः स्मृतः ॥ २६ ॥

ततोवाक्यावसाने तु तस्यराज्ञश्चसंसदि । मशका मत्कुणायूका भ्रमराःपक्षिणोमृगाः

अश्वा गावो हयाः सिंहा व्याघ्रा गोमहिषास्तथा ।

अन्येऽपि पशवः कीटा ग्राम्यारण्याश्च सर्वशः ॥ २८ ॥

दृश्यन्ते राजभवने कोटिशः पर्वतात्मजे । तं दृष्ट्वाभूतसंघातं राजाविस्मितमानसः ॥
यावच्चिन्तयतेर्किस्यात्तावज्ज्ञातंनृपेणहि । जैगीषव्यस्यमाहात्म्यंकपिलस्यमहात्मनः

कृताञ्जलिपुटो भूत्वा स राजाऽश्वशिरास्तदा ।

पप्रच्छ च द्विजौ भक्त्या किमिदं सिद्धसत्तमौ !॥ ३१ ॥

सामर्थ्यमीदृशं लब्धं कस्माद्वै तपसोबलात् । अद्यमेसफलोत्पत्तिरद्यमेसफलं श्रुतम्
सफला मे मनोवृत्तिर्युवयोर्दर्शनेन वै । तस्य तद्वचनं श्रुत्वा कपिलोवाक्यमब्रवीत्
महाकालवने राजन्विद्यते लिङ्गमुत्तमम् । ख्यातं सिद्धेश्वरं नाम्नासिद्धैरभ्यर्चितंसदा

सौभाग्येश्वरपूर्वे तु सौभाग्यारोग्यदायकम् ।

प्रभावात्तस्य लिङ्गस्य प्राप्ता सिद्धिरनुत्तमा ॥ ३५॥

जैगीषव्येन सिद्धेनमया वै नृपसत्तम !। तस्माद्व्रज महाबाहो महाकालवनं शुभम् ॥
तत्रद्रक्ष्यसि सर्वेशंशङ्खचक्रगदाधरम् । लिङ्गमूर्त्तौस्थितंविष्णुंयस्तेसिद्धिंप्रदास्यति
संसिद्धा बहवस्तत्र सनकाद्या नरेश्वर !। तस्य तद्वचनं श्रुत्वा कपिलस्य महात्मनः
जगाम सहसा तत्र स राजाऽश्वशिरास्तदा । ददर्श चैव तौसिद्धौसिद्धेश्वरसमीपतः

अन्येच बहवः सिद्धाः सिद्धनाथास्तथापरे ।

ज्ञात्वासिद्धेश्वरं देवं सिद्धसङ्घैः समर्चितम् ॥ ४० ॥

लिङ्गमध्ये स्थितं विष्णुं ज्ञात्वास नृपसत्तमः । पूजयामासभावेन परमेणसमाधिना
ततस्तुष्टोऽब्रवीद्देवो वरं वरय सुव्रत !। यत्ते ऽभिलषितं सर्वमहं दास्यामि भूपते
लिङ्गस्यवचनंश्रुत्वानृपेणोक्तंचतच्छृणु । यदिमेऽस्तिदया देवप्रसन्नोऽसिहिचेत्प्रभो

यत्तेरूपं परं नाथ तद्दर्शय ममाऽच्युत!। एतदेव हि मे देव!सदाभिलषितं हृदि ॥ ४४
आजन्मनोजगन्नाथ कदा द्रक्ष्ये जनार्द्दनम् । एतदिच्छाम्यहं देव वराणांप्रवरं वरम्
दीयमानं त्वयाऽभीष्टं ख्यातं सिद्धेश्वरं क्षितौ ॥ ४५ ॥
नृपस्यवचनं श्रुत्वा लिङ्गेनोक्तं वरानने । न मे विदुर्देवगणा नासुरा न महर्षयः ॥
परं रूपं नृपश्रेष्ठ! कृष्णोऽहं लिङ्गतां गतः। ममलोकं तु ये प्राप्तामुनयोमन्त्रभूषिताः
न चैते मां विजानन्ति परमार्थेन पार्थिव । यदेतद्दृश्यतेतेजो लिङ्गरूपेणमामकम्
एतदेव हि ब्रह्माद्याध्यायन्तित्रिदशास्त्वमी। अतोनमे परंरूपंद्रष्टुंकश्चित्क्षमोभवेत्
अनेकजन्मसंशुद्धा योगिनो मदनुग्रहात्। प्रविशन्ति तनौमह्यं मुक्ताःसंसारबन्धनैः
एवं हि ब्रुवतस्तस्य सिद्धिः प्राप्ता नृपेण हि।
विष्णुरूपं समास्थाय तस्मिँल्लिङ्गे लयं गतः ॥ ५१ ॥
अतो देवि! सुविख्यातं लिङ्गं सिद्धेश्वरं परम।
ये पश्यन्ति नरा भक्त्या तेषां सिद्धिश्च शाश्वती ॥ ५२ ॥
अञ्जनंपादलेपंच पादुकासिद्धिरेव च । गुटिका खड्गसिद्धिश्च महासिद्धिःसुदुर्लभा
दिव्यौषधैश्च यासिद्धिर्मन्त्रस्पर्शाद्भवात्रया। एतास्तुसिद्धयःप्रोक्ताअपरालघिमादयः
धर्मार्थकामसिद्धिश्च मोक्षसिद्धिरनुत्तमा। जायतेनात्र सन्देहः श्रीसिद्धेश्वरदर्शनात्
एष ते कथितो देवि! प्रभावः पापनाशनः।
सिद्धेश्वरस्य देवस्य मतङ्गेशमथो शृणु ॥ ५६ ॥
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनं
नामैकोनषष्टितमोऽध्यायः ॥ ५६ ॥

षष्टितमोऽध्यायः

मतङ्गेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

मतङ्गेश्वरसञ्ज्ञं तु षष्टिसङ्ख्याकमीश्वरम्। विद्धिपापहरं देवि!समीहितकरं सदा
सुगतिर्नाम विप्रेन्द्रो बभूव द्वापरे युगे। सत्यवादी सदा दान्तो वेदाध्ययनतत्परः
मतङ्गस्तस्य पुत्रोऽभूद् बाल्याद्दारुणतां गतः।
स बालं गर्द्दभं देवि! तिष्ठन्तं मातुरन्तिके ॥
दण्डकाष्ठेन सहसा ताडयामास चापलात् ॥ ३ ॥
तं तु तीव्राहतं दृष्ट्वा गर्द्दभी पुत्रगृद्धिनी। उवाच माशुचः पुत्र चण्डालोऽयंनवैद्विजः
ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मणउच्यते। तुदन्पापाकृतिरयं बाले न कुरुतेदयाम्
स्वकीयां भजते चाथ प्रकृतिं मानवःसदा। एतच्छ्रुत्वा मन्तगस्तुदारुणं गर्द्दभीवचः
दण्डकाष्ठं परित्यज्य रासभीं प्रत्यभाषत। ब्रूहिरासभि कल्याणि मातामेयेनदूषिता
कथं मां वेत्सि चण्डालं यायावरकुलोद्भवम्।
केन जातोऽस्मि चण्डालो ब्राह्मण्यं येन मे गतम् ॥ ८ ॥

गर्दभ्युवाच

नापितेन प्रमत्तेनब्राह्मण्यां वृषलेन हि। ततस्त्वमसि चाण्डालो ब्राह्मण्यंतेनतेगतम्
एवमुक्तो मतङ्गस्तु पितरं वाक्यमब्रवीत्। तताश्चर्यंश्रुतं मेऽद्य जातोऽहं नापितेनवै
गर्दभ्या कथितं सम्यक्तस्मात्तप्स्ये महत्तपः।
एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ॥ ११ ॥
स गत्वा च ततोऽरण्यमतप्यत महत्तपः। ततःसन्तापयामासविबुधांस्तपसान्वितः
तं तथा तपसायुक्तमुवाचहरिवाहनः। मतङ्ग! तप्यसे किं त्वंभोगानुत्सृज्य मानुषान्
वरं ददामि तेऽहं तं वृणीष्व त्वं यदिच्छसि ॥ १३ ॥

मतङ्ग उवाच

ब्राह्मण्यं कामयानोऽहमिदमारब्धवांस्तपः। देहि मे शाश्वतं शक्र! वर एषवृतोमया
एतच्छ्रुत्वा तु वचनं तमुवाच पुरन्दरः। ब्राह्मण्यं याचसे त्वंहिदुष्प्रापमकृतात्मभिः
नाशमेष्यसि दुर्बुद्धे!तदुपारम मा चिरम्। चण्डालयोनौ जातेन नतत्प्राप्यंकथञ्चन
एवमुक्तो मतङ्गस्तुसंशितात्मा यतव्रतः। अतिष्ठदेकपादेन वर्षाणां शतसङ्ख्यया
तमुवाच ततः शक्रः पुनरेव महायशाः। ब्राह्मण्यं दुर्लभं वीर मा कृथाःसाहसं वृथा
न हि शक्यंप्राप्तुमेवमचिरान्नाशमेष्यसि। वृणुवाकाममन्यं त्वंब्राह्मणत्वंसुदुर्लभम्
एवमुक्तो मतङ्गस्तु संशितात्माद्दृढव्रतः। सहस्रमेकं पादेन ततोऽब्दानामवर्त्तत॥
तदेव च पुनर्वाक्यमुवाच बलवृत्रहा। चण्डालयौनौ जातेन नावाप्यं ते कथञ्चन॥
अन्यं वरं वृणीष्व त्वं मा कृथास्तत्स्वयं श्रमम्।
एवमुक्तो मतङ्गस्तु भृशं शोकपरायणः॥ २२॥
अतिष्ठत गयां गत्वरासोऽङ्गुष्ठेन शतं समाः। सुदुष्करं वहन्योगंप्राणायामपरायणः
त्वगस्थिभूतो धर्मात्मा ततप परमं तपः। तपन्तं तमभिद्रुत्य परिजग्राह वासवः
वराणामीश्वरो दाता सर्वभूतहिते रतः॥ २५॥

शक्र उवाच

मतङ्गब्राह्मणत्वं हि विरुद्धमिह दृश्यते। ब्राह्मण्यं दुर्ल्लभं तातह्यसतांपापशीलिनाम्
ब्राह्मणे सर्वभूतानां योगक्षेमः समाहितः।
तदुत्सृज्येह दुष्प्राप्यम्ब्राह्मण्यमकृतात्मभिः॥ २७॥
अन्यं वरम्वृणीष्व त्वं दुर्लभोऽयं हि ते वरः॥ २८॥

मतङ्ग उवाच

किं मां तुदसि दुःखार्तं मृतं मारयसे च माम्।
तं तु शोचामि यो लब्ध्वा ब्राह्मण्यं नानुपालयेत्॥ २९॥
ब्राह्मण्यं यदि दुष्प्राप्यं त्रिभिर्वर्णैः शतक्रतो!।
तपसा च कथं लब्धं विश्वामित्रेण भूभुजा॥ ३०॥

वीतहव्यश्चराजर्षिस्तपसाविप्रतांगतः। तस्मात्तपःकरिष्यामिनिर्द्वन्द्वोनिष्परिग्रहः
अहिंसादमसत्यस्थः कथंनार्हामि विप्रताम। दैवेन कृतमेतद्धि यद्यहम्मातृदोषतः
एतामवस्थां सम्प्राप्तो दैवयोगात्पुरन्दर। नूनं दैवं न शक्यंतु पौरुषेण निवर्त्तितम्
यदहं यत्नवानेवं न लभेविप्रतां विभो!। एवंज्ञात्वातु देवेश! दातुमर्हसि मे वरम्॥
यदि तेऽहमनुग्राह्यः किञ्चिद्वा सुकृतं मम। सदुपायं हि मेशंसकथंविप्रोभवामि वै
यथाममाक्षया कीर्त्तिर्भवेद्वापि पुरन्दर!। कर्तुमर्हसितद्देव! शिरसा त्वां प्रसादये॥
इत्युक्तो हि मतङ्गेन वासवोबलवृत्रहा। कथयामास सन्तुष्टोलिङ्गमाहात्म्यमुत्तमम्

इन्द्र उवाच

महाकालवने लिङ्गं स्थापितं ब्रह्महापुरा। दिव्यमूर्त्तिधरंदिव्यं श्रीसिद्धेश्वरपूर्वतः
तस्यदर्शनमात्रेण विप्रत्वं समवाप्स्यसि। वासवस्यचवाक्येन मतङ्गो गतवांस्तदा
महाकालवनंरम्यं सिद्धक्षेत्रमथापरम्। ददर्श तत्र तल्लिङ्गमशेषफलदायकम्॥ ४०
दृष्ट्वासम्पूजयामास पुष्पैर्नानाविधैस्तदा। पूजितः प्रत्युवाचेदं मतङ्गं देवसत्तमः॥
अहो महान्सभाग्योऽसि यस्त्वया तोषितोऽस्म्यहम्।
मत्तः सर्वं समुद्भूतं ब्रह्माण्डं भूर्भुवादिकम॥ ४२॥
वरदोऽस्मि वरार्हाणां शापदोऽस्मि दुरात्मनाम्।
ब्राह्मण्यं मत्प्रसादाच्च अक्षयं ते भविष्यति॥ ४३॥
ततोऽसौ विप्रतांयातो मतङ्गोलिङ्गदर्शनात्। पुनः पूजाप्रभावेणब्रह्मलोकंगतोद्विजः
ब्राह्मण्यं दुर्लभं लब्धं लिङ्गस्यास्य प्रभावतः। मतङ्गेनवरारोहे तस्माद्देवोविगीयते
मतङ्गेश्वरको लोके ब्रह्मलोकप्रदायकः। वर्णाश्रमेषु विद्विष्टाः पाषण्डवचने रताः॥
निर्मर्यादा निराचारा निःशङ्काश्चातिलोलुपाः।
निर्घृणाः क्रूरकर्माणो धृष्टाः कलियुगे नराः।
दर्शनात्तस्य लिङ्गस्य तेऽपि यान्ति त्रिविष्टपम्॥ ४७॥
ये विशुद्धा महाभागा ध्यानिनो मुक्तिभागिनः।
ते पश्यन्ति कलौ देवि!'मतङ्गेश्वरमीश्वरम॥ ४८॥

ब्रह्मध्यानपरा ये च यज्ञदानक्रियारताः । ते पश्यन्ति कलौ देवि! मतङ्गेश्वरमीश्वरम् येऽर्चयन्तिमहादेवि! मतङ्गेश्वरमीश्वरम् । कृतपुण्यानरामर्त्त्येतेषां वासोऽक्षयोदिवि एष ते कथितो देवि! प्रभावः पापनाशनः । मतङ्गेश्वरदेवस्यश्रृणुसौभाग्यमीश्वरम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये मतङ्गेश्वरमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥

———

एकषष्टितमोऽध्यायः

सौभाग्येश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

एकषष्टितमं विद्धि सौभाग्येश्वरमीश्वरम् । यस्यदर्शनमात्रेण सौभाग्यमतुलं भवेत् प्रथमे प्राकृते कल्पे राजाभूदश्ववाहनः । प्राग्ज्योतिषपुरे रम्ये धर्मात्मा कीर्त्तिवर्द्धनः अनेकयज्ञकृत्प्राज्ञः सङ्ग्रामेष्वपराजितः । तस्यभार्या विशालाक्षि! नाम्नामदनमञ्जरी काशिराजसुतासुभ्रूरूपेणातीव शोभना । दक्षासुशीलाधर्मिष्ठा गृहव्यापारकोविदा चतुःषष्टिकलायुक्ता सदाभर्तृहिते रता । पूर्णेन्दुवदनासौम्या सदा मधुरभाषिणी पूर्वकर्मवशाद्देवि! दुर्भगासमजायत । सानेष्टा तस्यनृपतेर्नेत्रोद्वेगकरी सदा ॥ ६ ॥ श्रोत्रोद्वेगकरं वाक्यं तस्यराज्ञः करोति सा । ददाहलोचनेराज्ञस्तस्याःसंदर्शनंसदा

मूर्छां प्राप्नोत्यसह्यां स तस्याः स्पर्शेन भूपतिः ।
कदा चालोकितो राजा तया प्रेम्णा वरानने! ॥
दह्यमानोऽतितीव्रेण वह्निना वाक्यमब्रवीत् ॥ ८ ॥

द्वाःस्थैतां दुर्भगां भार्यामादाय विपिने वने । परित्यजाशु नैतत्ते विचार्यं वचनं मम ततोनृपस्यवचनमविचार्यमवेक्ष्य सः । द्वाःस्थस्तत्याज तां सुभ्रूमारोप्यस्यन्दनंवने सा च त्यक्ता वने शून्ये रुदती च मुहुर्मुहुः । सस्मार तं महीपालं तममन्यत दैवतम्

अथसाचारुसर्वाङ्गीतत्रासक्तात्ममानसा । निःश्वासपरमानिन्ये दिनशेषंतथानिशाम् निःश्वसन्त्यनवद्याङ्गी हाहेति रुदतीमुहुः । मन्दभाग्येतिचात्मानं निनिन्दमदिरेक्षणा न विहारे न चाहारे रमणीये न तद्वने । न कन्दरेषु शैलानां सा बबन्ध तदा रतिम्॥

त्यक्ता तेन वरारोहे! निनिन्द निजयौवनम् ॥ १४ ॥

दुर्भगाऽहं क्व जाताऽत्र दुष्टदैववशीकृता । कथं प्राप्तः स मे भर्त्ता तादृशो नृपसत्तमः

धन्योऽयमतिपुण्योऽयं योऽयं यौवनगोचरः ।
अन्यासामसतीनां च रमिष्यति न संशयः ॥ १६ ॥
अभीष्टा कस्यचित्कान्ता कान्तः कस्याश्चिदीप्सितः ।
परस्परानुरागाढ्यं दाम्पत्यमतिदुर्लभम् ॥ १७ ॥

ममाऽयं वल्लभो राजा न चाहं नृपवल्लभा । परस्परानुरागो हि धन्यानामेव जायते यद्यद्य स महीपालो न मया सङ्गमेष्यति । तत्कामाग्निरवश्यंमांक्षपयिष्यतिदुःसहः रमणीयमभूद्यत्तु पुंस्कोकिलनिनादितम् । हीनं हि वल्लभेनैवं दहतीवाद्य मे वनम् इत्थं सा मदनाविष्टा विलपन्ती पुनः पुनः । ददर्श तापसं तत्र त्रिकालज्ञं दृढव्रतम् मेखलाजिनकौपीनदण्डकाष्ठोपजीवनम् । महौजसंमहाभागं मुमुक्षुं मुनिपुङ्गवम्

उदयादित्यसङ्काशं विभावसुसमद्युतिम् ।
तं दृष्ट्वा सहसोत्थाय सा राज्ञी दुर्मता सती ॥ २३ ॥
विनयेनोपसङ्गम्य प्रणिपत्याऽभिवाद्य च ।
वियोगकारणं राज्ञः पप्रच्छ प्रणता सती ॥ २४ ॥

भगवन्काशिराजस्य सुताहमतिवल्लभा । भगिनी शत्रुसेनस्य मातुश्चातीव वल्लभा अश्ववाहनसञ्ज्ञेन नृपेणोढा महामुने! । धर्मतो धर्मकल्पेन प्रजापतिसमेन तु ॥२६॥

सा किमर्थं न चाभीष्टा जाताऽहं तस्य भूपतेः ।
स चातीव ममाभीष्टो नृपतिः सर्वदा विभो !॥ २७ ॥

दुर्भगाहं कथंजाता कर्मणा केन तापस !। कथम्भवति वश्यो मे भर्त्ता नृपतिसत्तमः

सौभाग्यं च कथं मे स्यादिति सत्यं च कथ्यताम् ॥ २८ ॥

तस्यास्तद्वचनंश्रुत्वासमुनिःसंशितव्रतः । ज्ञानेनकथयामास तस्यादौर्भाग्यकारणम्
पाणिग्रहणकालेत्वंग्रहैःपापैर्विलोकिता । भर्तातेनृपतिः पुत्रि!ग्रहैःसौम्यैर्विलोकितः
तेन ते वल्लभो राजा न त्वं भूपस्य वल्लभा ।
इति तस्य वचः श्रुत्वा सा राज्ञी दीनमानसा ॥
पप्रच्छ विनयोपेता भक्तिनम्रात्मकन्धरा ॥ ३१ ॥
भगवन्केन दानेन स्नानेन नियमेन च । कर्मणा केन सौभाग्यं परमं हि कथम्भवेत् ॥
इति तस्या वचः श्रुत्वा स मुनिः संशितव्रतः ।
कथयामास माहात्म्यं सौभाग्यं येन लभ्यते ॥ ३३ ॥
महाकालवनेपुत्रि! लिङ्गंसौभाग्यदायकम् । मतङ्गेश्वरपार्श्वे तु विद्यतेऽभीष्टदायकम्
तस्य दर्शनमात्रेण सौभाग्यं समवाप्स्यसि ॥ ३४ ॥
इन्द्राण्याऽऽराधितं लिङ्गं पुरा सौभाग्यकारणात् ।
सौभाग्यंपरमं लब्धं नष्टः शक्रोऽपि लब्धवान् ॥
तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ ३५ ॥
सौभाग्यं भविता तत्र कान्तेन सह दर्शनम् ।
पुत्रो भविष्यति शुभे! तस्य लिङ्गस्य दर्शनात् ॥ ३६ ॥
इत्युक्ता सा तदा तेन तापसेन वरानने !। विद्यते यत्र तल्लिङ्गं महाकालवनंगता ॥
ददर्शप्रणयोपेतालिङ्गंसौभाग्यदायकम । दर्शनात्तस्यलिङ्गस्यराजासस्मारतांप्रियाम
पप्रच्छजमदग्निं तु क गता मे प्रिया विभो!। भक्षिताविपिनेविप्रसिंहव्याघ्रनिशाचरैः
मया त्यक्ता नृशंसेन अहं तस्यास्तु वल्लभः ।
एवं ब्रुवाणो नृपतिः प्रत्युक्तो जमदग्निना ॥ ४० ॥
न भक्षितासाभूपाला सिंहव्याघ्रनिशाचरैः । साचाविप्लुतचारित्रात्वद्भक्ताचपतिव्रता
महाकालवनंराजन्!गतासौभाग्यकाम्यया । भार्यारक्ष्यामहीपालइतिसाश्रुतिरुत्तमा
भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
आत्मा हि जायते तस्यां सा रक्ष्याऽतो नरेश्वर !॥ ४३ ॥

धर्महानिश्चानुदिनमभार्यस्य भवेन्नृप । नित्यक्रियाया विभ्रंशः स चापिपतनाय वै
पत्न्याऽनुकूलया भाव्यं यथाशीलेऽपि भर्त्तरि ।
दुःशीला दुर्भगा भार्या पोषणीया नरेश्वर !॥ ४५ ॥
इति तस्य वचः श्रुत्वा समायातो नरेश्वरः । महाकालवनेरम्ये ददर्शस्वांप्रियां तदा
सौभाग्यालङ्कृतंसुभ्रं पूजयन्तींमहेश्वरम्।दृष्ट्वास्नेहेनचालिङ्ग्यप्रत्युवाचसतांप्रियाम्
विरहेण त्वदीयेन सन्तप्तोऽहं वरानने!। अद्य मे सफलं चक्षुर्जीवितं च सुजीवितम्
यत्त्वां पश्यामि सुभगे! कृतार्थोऽहं कृतस्त्वया ।
एवं दृष्टाऽतिहर्षेण सा ददर्श तदा पतिम् ॥
उवाच च प्रसीदेति भूयो भूयो मुदान्विता ॥ ४६ ॥
ततः स राजा रभसात्परिष्वज्याऽऽह भामिनीम् ।
प्रिये प्रसन्न एवाहं भूयो भूयो ब्रवीमि किम् ॥ ५० ॥
ततः समागमो जातो जातः पुत्रोऽतिधार्मिकः ।
तस्य लिङ्गस्य माहात्म्याद्दत्तोनाम स गीयते ॥ ५१ ॥
सौभाग्यमतुलं लब्धं तया देव्या हिमात्मजे !।
सौभाग्येश्वरसञ्ज्ञं तु ततः प्रभृति भूतले ॥ ५२ ॥
ये पश्यन्ति विशालाक्षि सौभाग्येश्वरमीश्वरम् ।
तेषां कुले न दौर्भाग्यं जायते पर्वतात्मजे !॥ ५३ ॥
भविष्यति न दारिद्र्यं वियोगो न च बन्धुभिः ।
पुत्रमित्रकलत्राणां लिङ्गस्य च समर्चनात् ॥ ५४ ॥
नोपसर्गभयं तेषां ये पश्यन्ति वरानने !। सौभाग्येश्वरसञ्ज्ञं तु न ग्रहादिभयं भवेत्
सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः । मनुष्योजायतेदेवि!सौभाग्येश्वरदर्शनात्
सम्पूज्यः सर्वलोकेषु सौभाग्यैकनिधिर्भवेत् ॥ ५६ ॥
जायते भूपतिर्लोके सार्वभौमो वरानने । नापुत्रा नाधना नारी न दीनानचदुःखिता
जायते दुर्भगा नैव सौभाग्येश्वरदर्शनात् ॥ ५७ ॥

नवैधव्यं नच व्याधिर्नाकालमरणं प्रिये !। नपुत्रभर्तृजं दुःखं जायते लिङ्गदर्शनात्।

यथा लक्ष्मीर्हरेर्नित्यं सावित्री ब्रह्मणः स्मृता।

रोहिणीवल्लभा चेन्दोः शची शक्रस्य वल्लभा॥

तथा सा जायते नारी सौभाग्येश्वरदर्शनात्॥ ५६॥

एष ते कथितो देवि! प्रभावः पापनाशनः। सौभाग्येश्वरदेवस्य शृणु रूपेश्वरंप्रिये

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये सौभाग्येश्वरमाहात्म्यवर्णनं नामैकषष्टितमोऽध्यायः॥ ६१॥

———

द्विषष्टितमोऽध्यायः

रूपेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

द्विषष्टिकं विजानीहि देवं रूपेश्वरं प्रिये !। यस्यदर्शनमात्रेण रूपवाञ्जायते नरः॥ १

पाद्मकल्पे महादेवि! पद्मोनाम महीपतिः। पद्मगर्भसमुद्भूतो बभूवातिपराक्रमी॥

पृथिव्याश्चतुरन्ताया जातो धर्मरतो बली॥ २॥

सकदाचिन्महाबाहुः प्रभूतबलवाहनः। वनं जगाम गहनं हयनागशतैर्वृतः॥ ३॥

बिल्वार्कखदिराकीर्णं कपित्थधवसङ्कुलम्। मृगसिंहैर्वृतंघोरैरन्यैश्चापि वनेचरैः॥

तत्र वन्यसहस्राणि हत्वा सबलवाहनः। राजा मृगप्रसङ्गेन वनमन्यद्विवेश सः॥ ५

एक एवोत्तमबलः क्षुत्पिपासासमन्वितः। स वनस्यांतमासाद्य महदारण्यमासदत्

तच्चाप्यतीत्य नृपतिर्ददर्शाश्रममुत्तमम्। मनःप्रह्लादजननं दृष्टिकान्तकमतीव च॥ ७

पुष्पितैः पादपैः कीर्णमतीव सुखशाड्वलम्।

ततोऽगच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान्॥ ८॥

तापश्यदाश्रमे तस्मिंस्तमृषिं संशितव्रतम्। उवाच कइहेत्युच्चैर्वनं सन्नादयन्निव

श्रुत्वाऽथ तं तथा शब्दं कन्या श्रीरिव रूपिणी।

निश्चक्रामाश्रमात्तस्मात्तापसाकारधारिणी॥ १०॥

सा तं दृष्ट्वैव राजानं पद्मगर्भसमुद्भवम्। आसनेनार्चयित्वा च पप्रच्छ नाम तं तदा॥

उवाच स्मयमानाथ किं कार्यं क्रियतामिति।

तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम्॥ १२॥

दृष्ट्वा चैवानवद्याङ्गीं यथावत्प्रतिपूजितः। आगतोऽहं महाभागे मुनिश्रेष्ठमुपासितुम्

क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने !। एवमुक्तातुसा कन्या तेन राज्ञा तदाश्रमे

हसन्ती प्रत्युवाचेदं वाक्यं समधुराक्षरम्॥ १४॥

कन्याहं पृथिवीपाल! कौमारब्रह्मचारिणः। तपस्विनोधृतिमतो धर्मज्ञस्यमनस्विनः

सुता कण्वस्य मामेवं विद्धि त्वंमनुजाधिप !। कण्वंहिपितरं मन्येपितरंस्वमजानती

तस्यास्तद्वचनं श्रुत्वा नृपेणोक्तं वरानने !। सुव्यक्तंराजपुत्रीत्वंयथाकल्याणिभाषसे

भार्या मे भव सुश्रोणि ब्रूहि किंकरवाणिते। सुवर्णरत्नवासांसि कुण्डलेपरिहारके

आहरामि तवाद्याहं भार्या मे भव शोभने !। गान्धर्वेणचमां भीरु विवाहेनैवसुन्दरि

विवाहानां च रम्भोरु गान्धर्वः श्रेष्ठ उच्यते॥ १६॥

नृपस्य वचनं श्रुत्वा कन्या वचनमब्रवीत्। मुहूर्त्तंसंप्रतीक्षस्व स मांतुभ्यंप्रदास्यति

राजोवाच

इच्छामि त्वां वरारोहेभजमानमनिन्दिते। तदर्थं मांस्थितंविद्धित्वयामेऽपहृतंमनः

आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः। आत्मनैवात्मनोदानं कर्तुमर्हसिधर्मतः

कन्योवाच

यदि धर्मपथस्त्वेष यदि चात्माप्रभुर्मम। सत्यंमे प्रतिजानीहि दत्तमात्मानमद्य मे॥

इति तस्या वचः श्रुत्वापरिणीता नृपेणहि। गान्धर्वेणविवाहेन कामासक्तेनपार्वति

कामिता सानृपेणैवततोगन्तुं समुद्यतः। एतस्मिन्नंतरे देवि! कण्वश्चाश्रममभ्यगात्

सा कन्या पितरं दृष्ट्वा ह्रिया नोपजगाम तम्।

विज्ञायाऽथ च तां विप्रो दिव्यज्ञानो महातपाः ॥ २६ ॥

उवाचपरमं क्रुद्धस्तांकन्यांकाममोहिताम् । त्वयाऽपिदुष्टे रहसिमामवज्ञाय यत्कृतः

स्वयं स्वयम्वरो मोहात्तस्मात्कृष्णा भविष्यसि ।

कुत्सिता निर्घृणा दीना निर्लज्जा रूपवर्जिता ॥ २८ ॥

अयं ते नृपतिर्भर्त्ता दुष्टरूपो भविष्यति ॥ २९ ॥

इत्युक्ता तत्क्षणाज्जातासा कन्यारूपवर्जिता । कुरूपोनृपतिर्जातःशापात्तस्यमहात्मनः

अथ प्रसादयामास सा कन्यापितरं तदा । बालानभिज्ञामूढाहं मन्मथेन प्रपाडिता

अज्ञानाच्च कृतं पापं तात त्वं क्षन्तुमर्हसि । अयंमहीपतिस्तात प्रत्यग्लीनो महाव्रतः

न चाहं प्रार्थिता तेन मयासौ प्रार्थितोनृपः । तस्मादनुग्रहं तातकर्तुमर्हसि चावयोः

इति तस्या वचः श्रुत्वा स विप्रोऽतिकृपान्वितः ।

उवाच स्वां दुहितरमाश्वास्यैवं पुनः पुनः ॥ ३४ ॥

नैववागनृतं पुत्रि! यावदद्य स्मराम्यहम् । दैवमत्रपरं मन्ये धिग्बुद्धि धिक्पराक्रमम्

अकार्यं कारितो येन बलादहमनिन्दिते !। उपदेशं प्रदास्यामि तत्त्वं कर्तुमिहार्हसि ।

महाकालवने पुण्ये लिङ्गं रूपप्रदायकम् । पशुपेश्वरपूर्वंतु विद्यतेऽभीष्टदायकम् ॥

तत्त्वं गच्छत्वरायुक्ता सह भर्त्रानृपेणहि । रूपंप्राप्स्यसि दुष्प्राप्यं लिङ्गदर्शनमात्रतः

इत्युक्ता सा तदा कन्या सह भर्त्रा गता प्रिये !।

महाकालवने रम्ये यत्र लिङ्गमनुत्तमम् ॥ ३९ ॥

ददर्श परया भक्त्या सच राजा नरोत्तमः । तत्क्षणाद्दिव्यदेहासा रूपेणातिमनोहरा ॥

दिव्यवस्त्रपरिधाना दिव्यालङ्कारभूषिता ॥ ४० ॥

सच राजा तथा जातःकन्दर्पसदृशाकृतिः । रूपेणाप्रतिमो लोकेतस्यलिङ्गस्यदर्शनात्

अतोलोकेषु विख्यातो देवो रूपेश्वरः प्रिये । रूपदोधनदोऽत्यर्थं पुत्रदःस्वर्गदस्तथा

स च राजा स्वकं प्राप्तो राष्ट्रं सस्यादिसंयुतम् ।

प्रियया परया सार्द्धं चक्रे राज्यमकण्टकम् ॥ ४३ ॥

राज्यं कृत्वा गतः स्वर्गं भार्ययासहपार्वति । देदीप्यमानो वपुषाद्वितीय इवभास्करः

विमानेन सुदीप्तेन वन्द्यमानो दिवालये । दर्शनात्तस्य लिङ्गस्य प्राप्तः पदमनामयम्

ये पश्यन्ति विशालाक्षि देवं रूपेश्वरं शिवम् । नतेरूपेण हीयन्ते यशसाचकुलेन च

सदा रूपकरं लिङ्गंभुक्तिमुक्तिफलप्रदम् । ये पश्यन्तिवरारोहे तेषांलोकाःसदाऽक्षयाः

येऽर्चयन्ति नरा नित्यं देवं रूपेश्वरं परम् । तेऽर्चितायान्ति यानेनममलोकंसनातनम्

सएव सुकृती लोके कुलं तेनाप्यलङ्कृतम् । यः पूजयति रूपेशंरूपसौभाग्यदायकम्

यः पूजयति देवेशं प्रसङ्गादपि पार्वति !। धनवान्रूपवान्सोऽपि राजा भवति भूतले

एष ते कथितो देवि! प्रभावः पापनाशनः । रूपेश्वरस्य देवस्य धनुःसाहस्रकं शृणु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

चतुरशीतिलिङ्गमाहात्म्ये रूपेश्वरमाहात्म्यवर्णनंनाम

द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः

धनुःसाहस्रेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

धनुःसाहस्रनामानमीश्वरंशृणु पार्वति !। त्रिषष्टिसङ्ख्यकं दिव्यंदर्शनात्पापनाशनम्

विदूरथोनाम नृपःख्यातकीर्त्तिरभूद्भुवि । तस्यपुत्रद्वयं जातंसुनीतिः सुमतिस्तथा

एकदा तु वनं यातो मृगयां स विदूरथः । ददर्श गर्त्तं सुमहद्भूमेर्मुखमिवोद्गतम्

तं दृष्ट्वा चिन्तयामास किमेतदिति पार्थिवः । पातालविवरं मन्ये वडवानलसन्निभम्

चिन्तयन्निव तत्रासौ ददर्श विजने वने । ब्राह्मणं सुव्रतं नाम तपस्विनमकल्मषम् ॥

स तं पप्रच्छ नृपतिः किमेतदिति भो द्विज !॥ ६ ॥

ब्राह्मण उवाच

दानवः सुमहावीर्यो वसत्युग्रो रसातले ।

कुजम्भोनाम विख्यातो भिनत्ति वसुधामिमाम् ॥ ७ ॥
तमजित्वा कथं राज्यं भोक्ष्यसे वसुधाधिप !।
तेन विध्वंसिता विप्रा रात्रौ निःसृत्य पार्थिव !॥ ८ ॥

उपद्रुतास्तथादेशा ध्वस्ताश्चैवतथाश्रमाः । आप्याययतिदैत्योऽयंसबलीमुशलायुधः
यदि त्वं घातयस्येनं पातालान्तरगोचरम् । ततः समस्तवसुधापतिरेव भविष्यसि

इति विप्रवचः श्रुत्वा मन्त्रयामास पार्थिवः ।
मन्त्रिभिः सहितोऽमोघं श्रुत्वा मुशलमद्रिजे !॥ ११ ॥

तंमन्त्रं क्रियमाणंतुसूनुभ्यांसहमन्त्रिभिः । तत्पार्श्ववर्त्तिनी कन्याशुश्रावाथमुदावती ।

ततः कतिपयाहे तु तां कन्यां जलजेक्षणाम् ।
जहारोपवनाद्दैत्यः कुजम्भः स्वसखीवृताम् ॥ १३ ॥

एतच्छ्रुत्वा महीपालः क्रोधपर्याकुलेक्षणः । उवाच पुत्रौजानेऽहंस कुजम्भो महासुरः
दृष्ट्वा भूमौ पुरा गर्त्ते तत्र संशयिते मयि । कथितो द्विजमुख्येनमया पृष्टेन पुत्रकौ ॥

स हन्यतां सोऽपहर्त्ता मुदावत्याः सुदुर्मतिः ।
प्रस्थितौ नृपभक्तयाऽथ स्वसैन्यपरिवारितौ ॥ १६ ॥

तौ सुतौतत्रसम्प्राप्तौपातालेपितृशासनात् । युयुधातेकुजम्भेनस्वशक्त्यासेनयावृतौ
ततः परिघनिस्त्रिंशशक्तिशूलपरश्वधैः । बाणैश्चिरतरं युद्धं तेषामासीत्सुदारुणम् ॥
ततो मायाबलवता तेन दैत्येनतत्क्षणात् । अमोघेनाद्वितीयेन मुशलेन वरानने !॥१६

हतसैन्यौ रणे बद्धौ राजपुत्रौ महाबलौ ॥ २० ॥

ततः श्रुत्वा महीपालो विवर्णवदनोऽभवत् । बद्धपुत्रः परामार्त्ति जगाम गिरिपुत्रिके
रुरोद बहुधाऽत्यर्थं पुत्रस्नेहेन पार्थिवः । ततो विलपतस्तस्य मार्कण्डेयो महामुनिः

अनेकसृष्टिसंहारदृष्टकार्यपरावरः ॥ २२ ॥

उदितादित्यसङ्काशः सप्तकल्पानुगो वशी । आजगामनृपाभ्याशे विलपन्तं ददर्शसः

राजानं कथयामास त्रिकालज्ञो महामुनिः ॥ २३ ॥
मा शुचस्त्वं महीपाल क्षत्त्रियोऽसि दृढव्रतः ।

क्व शोकः क्व महीपालो दुर्जेयो लोकपालवत् ॥ २४ ॥

शोकं कुपुरुषाचीर्णं त्यजत्वं राजसत्तम !। उद्यमं कुरु राजेन्द्र कुजम्भं घातयिष्यसि
नात्युच्चंमेरुशिखरं नातिनीचंरसातलम् । व्यवसायःसखातस्यनास्तिदूरेमहोदधिः
महाकालवने लिङ्गमाराधय समाहितः । रूपेश्वरस्य देवस्य पार्श्वेदक्षिणतःस्थितम्

धनुः साहस्रतुल्यं तु मुशलस्य निवारणम् ।
धनुः प्राप्स्यसि राजेन्द्र! कुजम्भं विनिपातय ॥ २८ ॥

धनुः साहस्रहस्तैस्तु रक्षितं योधसत्तमैः । लिङ्गंदेवासुरैर्युद्धे सहस्राक्षेण सेवितम्

इन्द्रेण च धनुर्लब्धं जम्भो वै येन पातितः ॥ २६ ॥

तस्य तद्वचनं श्रुत्वा स राजाथविदूरथः । जगामत्वरितो देवि! महाकालवनं शुभम्
ददर्श तत्र तल्लिङ्गं पूजयामास भक्तितः । तस्यतुष्टस्तदा देवोददौदिव्यं धनुस्तदा

धनुः साहस्रतुल्यं च मुशलस्य निवारणम् ।
धनुर्लब्ध्वा तदा राजा बद्धगोधांगुलित्रवान् ॥
जगाम धीरः पातालं तेन गर्तेन सत्वरम् ॥ ३२ ॥

ततो ज्यास्वनमत्युग्रं स चक्रे पार्थिवस्तदा । येनपातालमखिलमासीदापूरितान्तरम्
ततोज्यास्वनमाकर्ण्यकुजम्भोदानवेश्वरः । आजगामातिकोपेनस्वसैन्यपरिवारितः
ततो युद्धमभूत्तस्यसह राज्ञा वरानने !। दिनानि त्रीणिसयदा योधितस्तेनदानवः

ततः कोपपरीतात्मा मुशलायाभ्यधावत ।
गन्धमाल्यैस्तथा धूपैः पूज्यमानः स तिष्ठति ॥ ३६ ॥

यावद्गृह्णाति मुशलं तावत्सा च मुदावती । पस्पर्शचन्दनव्याजैरनेकैश्च पुनः पुनः ॥
ततः स गत्वा युयुधे मुसलेनासुरेश्वरः । तदा मुसलपातास्ते धनुषा निष्प्रभीकृताः
धनुर्ज्याघातशब्देन पतिते भूतले तदा । ततो वैवस्वतं लोकं कुजम्भोनाम दानवः
ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महापतेः । जगुर्गन्धर्वपतयो देववाद्यानि सस्वनुः

स चापि राजा तं हत्वा पुत्रौ लब्ध्वा सुतां तदा ।
मुदावतीं मुदा युक्तो हर्षगद्गदनिर्भरः ॥ ४१ ॥

पुत्राभ्यां सहितो देवि ! सुसम्पूर्णमनोरथः । सान्तःपुरपरीवारः पुनरायाद्वरानने! ॥
महाकालवने रम्ये यत्र तल्लिङ्गमुत्तमम् । पूजयामास रत्नैश्च वस्त्रैराभरणैस्तथा ॥
ततः स पूजितोदेवैःशक्रेण च पुनःपुनः । अस्य लिङ्गस्यमाहात्म्याद्धनुःप्राप्तंनृपेणवै
कुजम्भोऽपि हतोदैत्योदेवविद्वेषकारकः । धनुःसाहस्रनामायमतः ख्यातिंगमिष्यति

भक्त्या ये पूजयिष्यन्ति धनुःसाहस्रमीश्वरम् ।
यास्यन्ति शत्रवस्तेषां क्षयं नैवाऽत्र संशयः ॥ ४६ ॥

अर्चिते देवदेवेशे धनुःसाहस्रिके शिवे । अर्चिताःसर्वदेवाःस्युर्वरदाश्च न संशयः ॥

प्रातर्मध्येऽपराह्णे च धनुःसाहस्रकं शिवम् ।
ये नमन्ति नरा नित्यं न ते नरकभोगिनः ॥ ४८ ॥
तीर्थानां च यथा गङ्गा रक्षिता योधसत्तमैः ।
तथाऽयं रक्षको देवो नाम्ना धनुःसहस्रकः ॥ ४९ ॥
तत्र गङ्गादितीर्थानि विद्यन्ते विविधानि च ।
सुरहस्यातिपुण्यानि सद्यः पापहराणि च ॥ ५० ॥

तेषांफलंविनिर्दिष्टं ये पश्यन्ति तु भक्तितः । धनुःसाहस्रकंनाम सदा शत्रुक्षयङ्करम्
एष ते कथितो देवि! प्रभावः पापनाशनः । धनुःसाहस्रदेवस्य देवं पशुपतिं शृणु ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्रयांसंहितायांपञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये धनुःसाहस्रमाहात्म्यवर्णनंनाम
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

———

चतुःषष्टितमोऽध्यायः

पशुपतीश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

शृणु त्वं पशुपत्याख्यं चतुःषष्टिकमीश्वरम् । यस्यदर्शनमात्रेण पशुयोनिर्न लभ्यते
पशुपालो महादेवि! बभूव भुवि विश्रुतः । राजा परमधर्मिष्ठः पशूनां पालने रतः ॥२

दिदृक्षुः स कदाचिच्च गतस्तोयनिधिं प्रति ।
ददर्श तत्र पुरुषान्पञ्च प्राधान्यतः स्थितान् ॥
एका स्त्री मुक्तकेशा सा भ्रमन्ती च पुनःपुनः ॥ ३ ॥

अथ राजाभयाविष्टोविसञ्ज्ञःसमपद्यत । सम्वेष्टितोदस्युभिस्तैस्तयानार्याविशेषतः
ततोन्येसमपातंचआगत्यनृपसत्तमम् । सम्वेष्ट्य संस्थितैःसवस्ततोरुद्धोमहीपतिः
रुद्धे राजनि ते सर्वे एकीभूतास्तु दस्यवः । पतिताःपशुपालेन न मृताः पुनरुत्थिताः

तस्य तां धृष्टतां ज्ञात्वा स्थैर्यं च नृपतेर्मृधे ।
तस्यैव नृपतेर्देहे लीनास्ते दश दस्यवः ॥ ७ ॥

अमूर्त्ताइवतेसर्वेएकीभूतास्ततोऽभवन् । तान्दृष्ट्वादुःखितोराजापशुपालोऽभवत्क्षणात्
अथापश्यत्तदाऽयान्तं नारदं मुनिपुङ्गवम् । ब्रह्मपुत्रं तपोयुक्तं पप्रच्छ स नृपस्तदा

पशुपाल उवाच

भगवन्ब्रह्मपुत्राद्य मया दृष्टं तु कौतुकम् । अकस्मात्पुरुषाःपञ्च समायाता भयावहाः

तैरहं वेष्टितो दुष्टैर्व्याकुलश्च कृतस्तदा ।
मुष्टिभिर्हन्यमानोऽहं स्वस्थो जातो द्विज! क्षणात् ॥ ११ ॥
ततोऽन्ये पुरुषाः पञ्च समायाता नियुध्य माम् ।
हन्यतां हन्यतामेष मुक्तिकामो नृपाधमः ॥ १२ ॥

एवंतैः पीडितोऽत्यर्थं पुनर्मोहमुपागतः । एतस्मिन्नन्तरे सा स्त्री मामुवाचपुनःपुनः

दृढोभव महाराज मा विषादंकुरु प्रभो!। हीनवीर्या ह्यमीघोराःसमर्थस्त्वंस्थिरो भव
तस्या वाक्येन विप्रेन्द्र! मया धैर्येण संयुगे। दश प्रधानपुरुषाजितास्तेनमृताः प्रभो
प्रलीना मच्छरीरे तु केऽप्यते काऽपि साऽबला।
पशुपालवचः श्रुत्वा नारदो वाक्यमब्रवीत्॥ १६॥
ये त्वया पुरुषा दृष्टास्त्वयि लीना जिता मृधे।
बुद्धीन्द्रियाणि ते पञ्च पञ्च कर्मेन्द्रियाणि च॥
भ्रमन्ती या च नारी सा त्वया दृष्टा नृपोत्तम!॥ १७॥
मनोरूपेण सा बुद्धिर्भ्रमत्येवहि न स्थिरा। जितानितानि पूर्वेणब्रह्मणालोककर्तृणा
सोऽपिक्रोधवशंनीत इन्द्रियैर्विषयैःप्रियैः। पितामहेनस्वेयज्ञेशम्भोर्भागोन कल्पितः
महादेवो जगन्नाथः सृष्टिसंहारकारकः। इन्द्रियैर्मोहितो राजन्क्रोधश्चक्रेसुरान्प्रति
सुरा विभूतयो यस्य क्रीडार्थं भुवनत्रयम्।
तेन भागनिमित्तार्थं चक्रे राज्यं धनुस्तदा॥ २१॥
पूष्णश्च दन्ताः सम्भग्ना मोहितश्च दिवाकरः।
नेत्रे भग्ने भगस्यापि विद्धो यज्ञो मृगाकृतिः॥ २२॥
पशवश्च कृता देवा मुनयो वेदवर्जिताः। ऋषीणांधर्मशास्त्राणि हृतानिविभुनातथा
दुर्जयानीन्द्रियाण्याहुर्मुनयो वेदपारगाः। मनोरूपेण या बुद्धिः सा चातीव सुदुर्जया
तस्माद्राजन्महाबाहो मा विषादं वृथा कृथाः। तस्यतद्वचनंश्रुत्वानारदस्यमहात्मनः
पशुपालो महादेवि वक्तुं समुपचक्रमे॥ २५॥

पशुपाल उवाच

कथंतेभगवन्मुक्तादेवाःशक्रपुरोगमाः। पशुभावाच्च ब्रह्मापिश्रोतुमिच्छामिकथ्यताम्
तस्य तद्वचनं श्रुत्वा नारदः पुनरब्रवीत्।
पशुत्वेऽपि गता देवाः ऋषिभिर्मुनिभिः सह॥ २७॥
ब्रह्माणमग्रतःकृत्वा गताः शरणमीश्वरम्। स्तुतिभिस्तोषितोदेवो भक्तानुग्रहकारकः
उवाच वचनं राजन्यत्कर्तव्यं तदुच्यताम्॥ २८॥

देवा ऊचुः

वेदशास्त्राणि विज्ञानं देहि नो भव मा चिरम्॥
देवस्त्वं पूर्ववद्देव! यदि तुष्टो महेश्वरः॥ ३०॥

ईश्वर उवाच

भवन्तः पशवः सर्वे मया सार्द्धं च गम्यताम्। महाकालवनेक्षेत्रे पशुभावविमोक्षके
अहंपतिर्वोभविता ततोमोक्षमवाप्स्यथ। भवतामनुकम्पार्थं लोकानुग्रहकारणम्
लिङ्गरूपी भविष्यामि नाम्ना पशुपतीश्वरः॥ ३२॥
अथ ते त्रिदशाः सर्वे दृष्ट्वादेवं तमीश्वरम्। पशुभावविनिर्मुक्ता गताहृष्टास्त्रिविष्टपम्
ब्रह्मा पशुपतिं प्राह प्रसन्नेनान्तरात्मना॥ ३३॥
ये त्वां पश्यन्ति देवेश!भक्त्यापरमया युताः। तेषांकुलेपशुत्वं चये गताःपितरःप्रभो
स्वकैः कर्मविपाकैश्च तेषां मोक्षो भविष्यति॥ ३४॥
अज्ञानाज्ज्ञानतो वापि यत्पापं क्रियते नरैः। तत्पापंविलयं यातुतस्यदेवस्यपूजनात्
ते नराः पशवो लोके किं तेषां जीविते फलम्।
यैर्न दृष्टः पशुपतिः पशुयोनिविमोचकः॥ ३६॥
कौमारे यौवने बाल्ये वार्द्धक्येयदुपार्जितम्। तत्पापंविलयंयातिदृष्ट्वापशुपतिंशिवम्
पौषमासे तु सम्प्राप्ते ये त्वां पश्यन्तिमानवाः। तेषांत्वंवरदोदेवसदाभीष्टकरोभवेत्
सूर्यग्रहे यथादत्तं कुरुक्षेत्रेविशेषतः। पात्रे दानं सुवर्णस्य प्रोक्तमक्षय्यमव्ययम्॥ ३९
पौषमासे दिनैकेन नराणामधिकं तथा। तद्दर्शनेन देवेश! भविष्यति न संशयः॥४०
इत्युक्त्वा भगवान् ब्रह्मा ब्रह्मलोकंगतो नृप!। कृतकृत्यःप्रहृष्टात्मामुनिभिःकविभिःसह
तस्मात्त्वमपि राजेन्द्र! यदीच्छसि परां गतिम्।
समाराधय तल्लिङ्गं पशुयोनिविमोचनम्॥
महाकालवनं गत्वा इन्द्रेश्वरस्य दक्षिणे॥ ४२॥
तस्य तद्वचनं श्रुत्वा नारदस्य महात्मनः। जगाम पशुपालोऽपिमहाकालवनंप्रिये॥
दर्शनात्तस्य लिङ्गस्य गतोऽसौ परमां गतिम्॥ ४३॥

एष ते कथितो देवि! प्रभावः पापनाशनः । पशुपत्याख्यदेवस्य शृणु ब्रह्मेश्वरं शिवम्

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये पशुपतीश्वरमाहात्म्यवर्णनंनाम
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः

ब्रह्मेश्वरमहिमवर्णनम्

श्रीहर उवाच

पञ्चषष्टिकसङ्ख्याकं विद्धि ब्रह्मेश्वरं प्रिये। यस्य दर्शनमात्रेण ब्रह्मलोको ह्यवाप्यते
पुलोमानाम दैत्येन्द्रो महाबलपराक्रमः । पौलोमानां सहस्रैस्तु पूज्यमानःसतिष्ठति
आनर्चुस्तेऽपितंदैत्यं सुरेशंत्रिदशा इव । सकदाचित्समक्षं तु दैत्यानामिदमब्रवीत्
अद्यापि लोकपालानामर्केन्दुज्वलनाम्भसाम् ।
शतक्रतोर्द्धनेशस्य यमस्य वरुणस्य च ॥ ४ ॥
यदि नाम ततःकिमेतपसाजीवितेनच। सोऽहंविद्रावयिष्यामि सर्वानेवदिवौकसः
सर्वैरेतैः परिवृतः पौलोमैर्बलवत्तरैः। इत्युक्त्वा गतवान्देवि!सागरं दैत्यसम्वृतः ॥
तावच्छयानं सहसा ह्यपश्यन्मधुसूदनम् ॥ ६ ॥
शारदाभ्रसमाभासं मध्येकालंयथा घनम् । तमालोक्य ततो दैत्यानब्रवीदनुगांस्तथा
अयं स दानवगिरिवज्रोहिमधुसूदनः । कीर्त्तिकान्ताकलाकेलिवैधव्यादेशकोद्विषाम्
दैत्यसीमन्तिनीकान्तपत्रवल्लीप्रभञ्जकः। अयमस्मज्जयवधूवैधव्यादेशकःपरः ॥ ९ ॥
गतशङ्कः स्वपित्येकः सर्वदा कुटिलाशयः ।
हन्तव्यस्त्वरया दुष्टः काङ्क्षितो दर्शनं गतः ॥ १० ॥
इत्युक्त्वा स हि दैत्येन्द्रः पुलोमाऽतिरुषान्वितः ।

अभिदुद्राव वेगेन तावदग्रे पितामहम् ।
ददर्श नाभिकमले चिन्तयानं पुनः पुनः ॥ ११ ॥
अथ व्याकुलतां प्राप्तोब्रह्मा दृष्ट्वातदद्भुतम् । आयान्तंदैत्यसिंहानांसैन्यंरणसुदुर्जयम्
अथ बोधं गतः क्षिप्रं कैटभारिर्महाबलः । ददर्शाग्रे पुलोमं तु स्वसैन्यपरिवारितम्
अजेयः सङ्गरे धीरो ब्रह्माणमिदमब्रवीत् ॥ १४ ॥

विष्णुरुवाच

पुलोमस्यविनाशार्थमुद्योगःक्रियतामिति । असौलब्धवरोदैत्यःसहसामांविजेष्यति
तस्माद्गच्छ त्वरायुक्तो महाकालवने शुभे । लिङ्गं द्रक्ष्यसितत्रैवसप्तकल्पोद्भवम्परम्
उत्तरे च्यवनेशस्य शिवशक्तिसमन्वितम् ।
तस्य लिङ्गस्य माहात्म्याद् ब्रह्म प्राप्स्यति शाश्वतम् ॥ १७ ॥
कुण्डेश्वरकरस्पर्शकारि वारि निरन्तरम् । तदानय गृहीत्वा तु तेनायं वध्यतामिति
इति तस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ।
आजगाम मुहूर्त्तेन यत्र तल्लिङ्गमुत्तमम् ॥ १९ ॥
स्तुतिं चकार सहसा दृष्ट्वा भक्त्या पितामहः ॥ २० ॥

ब्रह्मोवाच

नमस्ते दिव्यरूपाय नमस्ते बहुरूपिणे । नमोऽविषह्यवीर्याय नमो विश्वक्रियात्मने
नमः पिङ्गकपर्द्दायनमः खण्डेन्दुधारिणे । नमः कनकवर्णाय नमो वननिवासिने ॥
वन्दे त्वां भूतभर्त्तारं सदा शत्रुविनाशनम् । रणत्कनककेयूरं धृतपूर्णेन्दुमण्डलम्
वन्दे त्वां त्रिदशाध्यक्षंविश्वाध्यक्षंमहेश्वरम् । क्षीणसंसारदुःखौघंमुनिध्यातपदंसदा
वन्दे त्वां सर्वदा देवं दैत्यसङ्घातनाशनम् । टङ्कपट्टिशशूलाग्रधनुः खड्गगदाधरम् ॥
एवं स्तुतः स भगवाँल्लिङ्गरूपी महेश्वरः ।
किञ्चित्स्मितमुखः प्राह ब्रह्माणं लोककारणम् ॥ २६ ॥
किं तेऽभीष्टं करोम्यद्य किं ददामि पितामह !।
कस्मात्स्तौषि मुनिश्रेष्ठ! कस्मादार्तोऽसि दृश्यसे ॥ २७ ॥

इति लिङ्गवचःश्रुत्वा कथितंब्रह्मणातदा । वृत्तान्तंविस्तरात्सर्वंलिङ्गेनोक्तंतदाप्रिये
जलं गृहाण वाणीश! शस्त्रजं शत्रुवारणम् । हनिष्यसि क्षणेनैव पुलोमंसहसैन्यकम्
इत्युक्तः सत्वरो ब्रह्मागतो यत्र जनार्द्दनः । जलेन तेन तान्दैत्यान्पातयामास भूतले
स पुलोमा महानासीत्स्वारोचिषेऽन्तरे मनौ ।
कृष्णोऽपि ब्रह्मणा सार्द्धमाजगाम कुशस्थलीम् ॥ ३१ ॥
ददर्श तत्र तल्लिङ्गं नाम चक्रे जनार्द्दनः । ब्रह्मणा संस्तुतो देवोममानुग्रहकारणात् ॥
तस्माद्ब्रह्मेश्वरो नाम ख्याति लोकेषु यास्यति ॥ ३२ ॥
येद्रक्ष्यन्तिनराभक्तयादेवं ब्रह्मेश्वरंशिवम् । तेब्रह्मलोकमाक्रम्य समेष्यन्तिममान्तिकम्
यस्तु पश्येत्प्रसङ्गेन देवं ब्रह्मेश्वरंशिवम । कृतकृत्यः सपुरुषो नशोचेन्मरणं सदा ॥
यःपुष्करंनरोगत्वातपो वर्षशतंचरेत् । अन्यो ब्रह्मेश्वरंपश्येत्तस्य पुण्यंततोऽधिकम्
पञ्चपातकसंयुक्तो यो मर्त्यो दुष्टमानसः ।
सोऽपि गच्छेच्छिवं स्थानं दृष्ट्वा ब्रह्मेश्वरं शिवम् ॥ ३६ ॥
चान्द्रायणानांविधिवद्दशानामेव यत्फलम् । तत्फलं समवाप्नोतिब्रह्मेश्वरस्यदर्शनात्
इत्युक्त्वा गतवान्विष्णुर्वैकुण्ठं शाश्वतं प्रिये !।
ब्रह्मलोकं जगामाऽथ ब्रह्मा लोकपितामहः ॥ ३८ ॥
एष ते कथितो देवि! प्रभावः पापनाशनः । ब्रह्मेश्वरस्य देवस्यजल्पेश्वरमथोश्रृणु
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽ-
चतुरशीतिलिङ्गमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनाम
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः

जल्पेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

षट्षष्टितमकं विद्धि देवं जल्पेश्वरं प्रिये !। यस्य दर्शनमात्रेण महापापंशमं व्रजेत् ॥
जल्पोनाम महादेवि!राजाऽभूद्भुवि विश्रुतः । सदाजल्परतोनित्यं जल्पवादप्रवर्तकः
विकल्पबहुलो नित्यं संसारगतिचिन्तकः । सुबाहुप्रमुखाःपञ्च पुत्राजाता महाबलाः
तस्य राज्ञो वरारोहे! मूर्त्ताः पञ्चाग्नयोयथा । सुबाहुः शत्रुमर्द्दीचजयो विजय एव च
विक्रान्तः पञ्चमः पुत्रः सर्वे शस्त्रास्त्रपारगाः ॥ ४ ॥
पित्रा जल्पेनतेराज्ञा पृथग्राज्ये प्रतिष्ठिताः । पृथक्पुत्राहिते सर्वेपृथग्देशाधिपाःकृताः
प्राच्यां सुबाहुर्नृपतिर्याम्यां वै शत्रुमर्द्दनः । पश्चिमायांजयो राजाउत्तरे विजयोनृपः
मध्ये विक्रान्तसञ्ज्ञस्तु स्वपदे विनियोजितः ।
व्यवस्थामीदृशीं कृत्वा स्वयमेववनं ययौ ॥ ७ ॥
बभूवुर्मन्त्रिणस्तेषां हिता वंशक्रमागताः ।
बुभुजुः स्वस्वराज्यानि मन्त्रिभिः सहितास्तदा ॥ ८ ॥
विक्रान्तस्यचयोमन्त्री विकल्पकपरायणः । तेनोक्तंविजने देशेविक्रान्तस्यमहीभृतः
यस्यैषा पृथिवी कृत्स्ना स समर्थः प्रकीर्तितः । उद्यमेन पदंलब्धं वासवेन महात्मना
त्रिदशैश्चाऽमृतं लब्धमुद्यमेन महीपते ॥ ११ ॥
हीनोद्यमा मानवा ये क्षत्त्रियाश्च विशेषतः ।
ते हास्यास्पदतां यान्ति हीनवीर्या दिने दिने ॥ १२ ॥
स्नेहं च कुरुते भ्राता राज्यलुब्धोऽर्थकारणात् । अर्थवीर्येणतेनैव संतोषंकुरुते नृपः
क्रियते न किमर्थंतु भूप! मन्त्रपरिग्रहः । भुज्यतेसकलंराज्यं मया ते मन्त्रिणाबलात्
परोऽपि हितवान्बन्धुर्बन्धुरप्यहितःपरः । अहितोदेहजो व्याधिर्हितमारण्यमौषधम्

भूमिमेते निर्गिलन्ति सर्पा बिलशयानिव ।

राजानमविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १६ ॥

मायया मोहितं सर्वं कोवा कस्य चबान्धवः ।

उद्यमः क्रियतां तस्माद् भ्रातृणां निग्रहे द्रुतम् ॥ १७ ॥

भ्रातृभिर्भ्रातरः सर्वैनिहताराज्यकारणात् । धर्मंच शाश्वतंज्ञात्वा निहताश्चासुराःसुरैः

इति मन्त्रिवचःश्रुत्वा सराजाविस्मयान्वितः । हसित्वाप्रत्युवाचेदंममायंशत्रुरागतः

विक्रान्त उवाच

वयं च भ्रातरः पञ्च पृथिवीं कामयामहे । अतुष्टाः पृथगैश्वर्यं कथंकृत्स्नाभविष्यति

ज्येष्ठो भ्राता सुबाहुश्च द्वितीयःशत्रुमर्द्दनः । जयश्च विजयश्चैव तेषां लघुरहं यतः ॥

मन्त्र्युवाच

राज्ये स्थितं पूजयन्तिज्येष्ठंपूजार्हणैर्वरैः । कनिष्ठज्येष्ठताकेयं राज्यंप्रार्थयतांनृणाम्

तथेति च प्रतिज्ञातेविक्रान्तेनमहीभृता । स मन्त्री कारयामास अभिचारविधिं तदा

अथर्वणेन मन्त्रेण पुरोधाःप्रचकार ह । ज्ञातं पुरोहितैस्तेषां तेऽपि चक्रुः समाहिताः

अथ कृत्यासमुत्पन्ना पश्चात्कृत्याचतुष्टयम् । सपुरोहितभृत्यांस्तानग्रसंस्तुसमंतदा

ततः समस्तलोकस्य विस्मयश्चाऽभवन्महान् ।

यदैककालं नेशुस्ते पृथक्पुरनिवासिनः ॥ २६ ॥

ततः श्रुत्वा च निधनं पुत्राणां जल्पकोनृपः । वने वशिष्ठंपप्रच्छ किमेतद्भगवन्प्रभो

तेनापि कथितं सर्वं वशिष्ठेनमहात्मना । दिव्यज्ञानेनवृत्तान्तंविकल्पं चाऽकरोन्नृपः

राजोवाच

निमित्तोऽहं विनाशस्य धिग्धिग्जन्म मदीयकम् ।

सार्द्धं त्वमात्यपुत्रैश्च मृतं ब्राह्मणपञ्चकम् ॥ २९ ॥

मत्तोऽन्यःकःपापरतोभविष्यति महान्भुवि । यदिजन्म मदीयंस्यान्नच जातुमहीतले

ततस्ते न विनश्येयुर्मम पुत्रपुरोहिताः । धिग्राज्यं धिक्चमेजन्म भूभुजांचमहाकुले

कारणत्वं गतो योऽहं विनाशस्य द्विजन्मनाम् ।

कुर्वन्तः स्वामिनस्तेऽर्थं पुत्राणां मम याजकाः ॥

नाशं ययुर्न दुष्टास्ते दुष्टोऽहं नाशकारणे ॥ ३२ ॥

इत्थमुद्विग्नहृदयः स जल्पः पृथिवीपतिः । पप्रच्छच पुनः प्रह्वोवशिष्ठं ज्ञानिनांवरम्

राजोवाच

भगवन्ब्रूहि मे तीर्थमवियोगकरंसदा । सद्यः पापहरं विप्र!लिङ्गं वा कथय प्रभो !॥

तस्यतद्वचनं श्रुत्वा जल्पस्य पृथिवीपतेः । वशिष्ठःकथयामास दिव्यज्ञानेनपार्वति!

गच्छ जल्प! ममादेशान्महाकालवनोत्तमम् ।

कृत्वा निःक्षत्त्रियां पृथ्वीं यत्र रामस्तपस्यति ॥

तत्र लिङ्गमनाद्यं च कुक्कुटेश्वरपश्चिमे ॥ ३६ ॥

तदाराधयराजेन्द्र जामदग्न्याश्रमेस्थितः । वशिष्ठस्यवचः श्रुत्वाजल्पोऽसौपृथ्वीपतिः

देवदारुवनं त्यक्त्वा महाकालवनंगतः । ददर्श तत्र तल्लिङ्गमनाद्यं देवसंस्तुतम् ॥

पूजयामास विधिवत्परमेण समाधिना ॥ ३८ ॥

तत्र वाणी समुत्पन्ना लिङ्गमध्याद्वरानने!। न त्वंपापसमाचारो न त्वं मरणकारणम्

पुत्राणां नृप! विप्राणामदृष्टं तत्र कारणम् ॥ ३९ ॥

विपाकेन स्वकीयेन गता वैवस्वतम्पुरम् ।

मा शोकं कुरु राजेन्द्र गहना कर्मणो गतिः ॥ ४० ॥

अनेन शुद्धभावेन तुष्टोऽहं नृपसत्तम! । यदभीष्टं वरं ब्रूहि तत्ते दास्यामि नान्यथा ॥

राजोवाच

यदि तुष्टोऽसि मे देव! यदि देयो वरो मम । संसारसागरे घोरेमा भवेन्ममजन्मच

अक्षयां देहि मे कीर्त्तिं नाम्ना मे विश्रुतो भुवि ।

अयं जल्पेश्वरो देवो जल्पेनाऽऽराधितो विभुः ॥ ४३ ॥

वदन्तुत्रिदशाःसर्वेएषमे दुर्लभोवरः । ये त्वांपश्यन्तिमनुजा मन्नाम्ना ख्यातिमागतम्

तेषां वियोगो मा भूयात्पुत्रतो धनतोऽपि वा ॥ ४४ ॥

न संसारभयं तेषां दस्युतो नैव राजतः । न भूतग्रहरोगेभ्यो भयमस्तु कदाचन ॥

शिवमस्तुसदा तेषां येषां त्वंदर्शनंगतः । ते धन्यामानुषेलोके ये त्वां शरणमागताः
सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः । तत्सर्वमधिकं देव! लभ्यते तवदर्शनात्
तावत्पतति संसारे घोरे दुःखशताकुले । यावन्न दृश्यते देवः संसारार्णवतारकः ॥
यदा पापक्षयः पुसां तदा ते दर्शनम्भवेत् । महता सुकृतेनैव नाल्पेन तपसा प्रभो !॥

एवं भविष्यतीत्युक्त्वा तेन लिङ्गेन पार्वति !।
पश्यतां सर्वदेवानां स्वतनौ सन्निवेशितः ॥ ५० ॥

तस्मिँल्लिङ्गेलयम्प्राप्ते नृपे जलपे वरानने !। देवो जलपेश्वरः ख्यातो देवैरुक्तो महीतले

भुक्तिदो मुक्तिदश्चैव सदाभीष्टकरःस्मृतः ॥ ५१ ॥

एष ते कथितो देवि! प्रभावःपापनाशनः । जलपेश्वरस्य देवस्य श्रृणुकेदारसञ्ज्ञकम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये जलपेश्वरमाहात्म्यवर्णनं
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

———

सप्तषष्टितमोऽध्यायः

केदारेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

सप्तषष्टिकसङ्ख्याकं केदारेश्वरसञ्ज्ञकम् । देवं श्रृणु वरारोहे! दर्शनात्पापनाशनम्
सृष्टिकाले पुरादेवि! देवा व्याप्ताहिमेनहि । शीतार्ताविह्वलाःसर्वे ब्रह्माणंशरणंगताः
हिमाद्रिणाऽर्दिताः सर्वे वयंदेवजगत्पते । त्राहिभीतांश्चतुर्वक्त्रपितामहनमोऽस्तुते

देवानां वचनं श्रुत्वा प्रोक्तं वै ब्रह्मणा प्रिये !।
पीडिता हिमशैलेन शङ्करश्वशुरेण च ॥ ४ ॥

नाहं यातुं समर्थोऽस्मि सत्यमेतन्मयोदितम् । महादेवमृतेदेवागतिरन्या न विद्यते

स एव शरणं देवः सर्वेषां नो भविष्यति । तस्याज्ञया मया सर्वे पर्वतारचिताःपुरा
कृतासृष्टिर्विचित्रा च हिमाद्रिश्चमयाकृतः । असेव्यःसर्वजन्तूनामधृष्योदुर्गमोगिरिः

हिमाचलस्य तस्यैव शास्ता देवो महेश्वरः ।
तस्माद्यास्याम हे देवाः! कैलासं पर्वतोत्तमम् ॥ ८ ॥
यत्र तिष्ठति विश्वात्मा देवदेवो महेश्वरः ।
एवमुक्त्वा गतो ब्रह्मा देवैः सार्द्धं ममान्तिकम् ॥
दृष्टोऽहं पूजितस्तैस्तु स्तुतोऽहं विविधैः स्तवैः ॥ ६ ॥

मया सम्मानिता देवाश्चतुर्वक्त्रः प्रपूजितः । पूजयित्वामयापृष्टो ब्रह्मा गमनकारणम्

किं कार्यं त्रिदशैःसार्द्धमागतोऽसि पितामह !।
कथितं ब्रह्मणा सर्वं श्रुतं सर्वं मया प्रिये !॥ ११ ॥

हिमाचलं समाहूय मर्यादा च कृता मया । शैलानांराजराजत्वे हिमाद्रिश्चप्रतिष्ठितः
देवानां विषयाश्चैव गन्धर्वाणां तथैवच । यक्षाणामथ नागानां किन्नराणां तथैव च

विद्याधगणां क्रीडार्थं पृथक्पृथङ्निवेशिताः ।
रूपतो भाति शैलेन्द्रः शुद्धस्फटिकसन्निभः ॥ १४ ॥
जाह्नवीनिर्झरोष्णीषः शर्वाणीजनकस्तथा ॥ १५ ॥

सर्वदेवमयो दिव्यः सर्वतीर्थमयः कृतः । सर्वाश्रमनिवासश्च सर्वामरनिषेवितः ॥
एवं संस्थाप्यशैलेन्द्रं लिङ्गमूर्त्तिरहंस्थितः । विख्यातस्त्रिपुलोकेषु केदारेश्वरनामतः
उदकं निर्मितं तत्र मन्त्रपूर्णं मया प्रिये !। माहात्म्यंविविधंप्रोक्तंलिङ्गस्यचजलस्यच

योऽत्रागत्य नरो भक्त्या सम्यङ् मां पूजयिष्यति ।
जलं योऽत्रैव गृह्णाति विधानेन वरानने !॥
तस्योदरे भविष्यामि लिङ्गरूपी न संशयः ॥ १६ ॥

इत्युक्ते वचने देवि! सदेवासुरपन्नगाः । यक्षरक्षःपिशाचाश्च भूतवेतालकिन्नराः ॥
विद्याधरगणाश्चैव मम दर्शनलालसाः । समायाता वरारोहे! पीत्वा तत्र जलं शुभम्

दृष्टोऽहं विधिना तैस्तु लिङ्गमूर्त्तिगतः प्रिये !॥

मम तुल्याश्च ते जातास्तस्मिन्नद्रिवरे स्थिताः ॥
जनलोकगतैः सिद्धैः पूज्यमाना वरानने!॥ २२ ॥
अथ कालेन बहुना श्रुत्वा माहात्म्यमुत्तमम् ।
केदारेश्वरदेवस्य जलस्य च विशेषतः ॥ २३ ॥
मनुष्याः समुपायातास्ते रजोबहुलायतः । तमःप्राया विशालाक्षि! तदाहंमाहिषंवपुः
कृतवांस्तद्भयार्थाय न च तेभीतिमागताः । इह देवोऽत्र देवोऽत्र बभ्रमुस्तेदिदृक्षवः
न तैर्दृष्टो महादेवि! यतोऽहं महिषाकृतिः ।
स्थितोऽस्म्यलक्ष्यरूपेण ततस्ते दीनमानसाः ॥
उद्विग्ना निश्वसन्तश्च वैराग्यं परमं गताः ॥ २६ ॥
नात्र देवोनतीर्थानि न गङ्गा पुण्यदायिनी । न धर्मो न परो लोकःसर्वमेतद्विडम्बनम्
एवं किल पुराणेषु श्रूयते सर्वदा श्रुतौ । हिमालये च केदारं लिङ्गं मोक्षप्रदायकम्
एवं तु वदतां तेषां मानुषाणां यशस्विनि !।
आकाशादुत्थिता वाणी मया प्रोक्तानुकम्पया ॥ २९ ॥
अमार्गं मा वदन्त्वत्र न निन्द्याः श्रुतयोऽव्ययाः ।
पुराणं नान्यथा प्रोक्तं ब्रह्मणा लोककर्तृणा ॥ ३० ॥
ये निन्दन्ति पुराणानि धर्मशास्त्राणि नास्तिकाः ।
ते यान्ति नरकं घोरं यावदाभूतसम्प्लवम् ॥ ३१ ॥
सदा देवोऽत्रकेदारः स्वर्गमोक्षप्रदायकः । विद्यते त्रिदशैः पूज्यः सततं नैव दृश्यते
करोति पूजां हिमवान्मासानष्टौ च शाश्वतान् ।
हिमाद्रिस्तेन पुण्येन नगेन्द्रस्तु कृतो नगैः ।
सेव्यश्च रमणीयश्च सर्वतीर्थनमस्कृतः ॥ ३३ ॥
सर्वरत्ननिधानश्च देवानां वल्लभस्तथा । ग्रीष्मे चैव वसन्ते च देवदेवोऽत्र दृश्यते ॥
नियतेनैव कालेन मानुषाणां च सर्वदा । यदिबुद्धिः परा जाता सर्वदा मम दर्शने ॥
आख्यास्ये तदुपायं च श्रूयतां सावधानतः ।

मा विकल्पोऽत्रकर्त्तव्यःसर्वान्कामानवाप्स्यथ ॥ ३६ ॥
क्षेत्राणामुत्तमं क्षेत्रं भुक्तिमुक्तिप्रदायकम् । प्रलयेऽप्यक्षयं प्रोक्तंमहाकालवनं नराः ॥
तत्राहं सम्भविष्यामि लोकानामनुकम्पया । लिङ्गरूपेणशिप्रायास्तटेपुण्येसुशोभने
सोमेश्वरस्य देवस्यपश्चिमे स्थानमुत्तमम् । प्रसिद्धमुपयास्यामि केदारेश्वरनामतः
सर्वदा दर्शनं तत्रमयासार्द्धं भविष्यति । सर्वेषां चप्रदास्यामिसर्वान्कामान्नसंशयः
इह यावत्फलंतस्माद्दास्यामि ह्यधिकंततः । इतितेमानवाःसर्वेश्रुत्वावाणींमनोरमाम्
आकाशादुत्थितां दिव्यां मनः प्रह्लादकारिकाम् ॥ ४१ ॥
गता वनं महाकालं संस्मरन्तो महेश्वरम् । विकल्पेन विचित्रेणसत्यमेवेतिनान्यथा
स्नात्वा शिप्राजले पुण्ये यावत्पश्यन्ति भास्करम् ।
तावद्दृष्टिपथोत्पन्नं लिङ्गं पापप्रणाशनम् ॥ ४३ ॥
अथ ते हर्षिताः प्रोचुः केदारोऽयं न संशयः ।
दृष्टोऽस्माकं न सन्देहो गङ्गा शिप्राजले स्थिता ॥ ४४ ॥
ततस्ते पूजयामासुः पुष्पैर्नानाविधैस्तथा । पूजितोऽहं विशालाक्षितेषांतुष्टोवरानने
दुर्लभोऽतिवरो दत्तः कैलासेस्थानमुत्तमम् । अक्षयश्चपदंदत्तम्पुनरावृत्तिवर्जितम् ॥
अतोऽहंत्रिदशैः प्रोक्तःकेदारेश्वरनामतः । प्रार्थितःपरयाभक्त्यालोकानामनुकम्पया
इहागत्य नरा ये च त्वां पश्यन्ति सुभक्तितः ।
तेषां फलं त्वया देव! दातव्यमधिकंयतः ॥ ४८ ॥
हिमाद्रौहिमनाथस्ययात्रायाःप्रत्यहंफलम् । लभन्तेचनरानित्यंनात्रकार्याविचारणा
ब्रह्महा वासुरापोवास्तेयीवागुरुतल्पगः । तत्सम्पर्कीनरोयस्तुत्वांदृष्ट्वाकिल्बिषाकरः
सोऽपि याति परं स्थानं पुनरावृत्तिवर्जितम् ।
चान्द्रायणानां विधिवच्छतानां चैव यत्फलम् ।
तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥ ५१ ॥
ते नराः पशवो लोके तेषां जन्मनिरर्थकम् । यैर्नदृष्टोमहाकालेकेदारेश्वरसञ्ज्ञकः
कौमारेयौवने बाल्ये वार्द्धकेयदुपार्जितम् । तत्पापंसङ्क्षयं यातिकेदारेश्वरदर्शनात्

हिमालयकृता यात्रा तस्याः प्रोक्तं च यत्फलम् ।
तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥ ५४ ॥

इत्युक्तोऽहं तदा देवि! देवैःप्रणतिपूर्वकम् । तथेति चमयाप्रोक्तंतेऽपिदेवादिवं गताः
एष ते कथितो देवि! प्रभावः पापनाशनः । केदारेश्वरदेवस्य पिशाचाख्यमतःश्रृणु ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये केदारेश्वरमाहात्म्यवर्णनंनाम
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः

पिशाचेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

अष्टषष्टिकसङ्ख्याकं पिशाचाख्यमथेश्वरम् । श्रृणु देविप्रयत्नेन दर्शनात्पापनाशनम्
आदौकलियुगेदेविशूद्रोबहुधनोऽभवत् ।सोमोनामसुविख्यातोनास्तिकोवेदनिन्दकः
अब्रह्मण्यो नृशंसश्च कदर्यो निरपत्रपः । विश्वासघातकश्चैव परस्वहरणे रतः ॥ ३ ॥
त्रिवर्गहन्ता चान्येषामात्मकामानुवर्त्तकः । स कदाचिन्मृतो देवि! कष्टेन परमेण च
मरुदेशे पिशाचोऽभून्नग्नोदीनो भयावहः । नाशकृत्सपिशाचानांस्वपक्षोच्छेदकारकः

बहवो मर्द्दितास्तेन पिशाचा बलवत्तराः ॥ ६ ॥

अथतेनैवमार्गेणकदाचिच्छाकटायनः । स्वाध्यायनिरतो विद्वान्वाग्मी शमपरायणः
उदयादित्यसंकाशोविभावसुसमद्युतिः । शकटेन सदा याति स पश्यन्पर्वतात्मजे!

गतो ददर्श तं रौद्रं पिशाचं च भयावहम् ।
स पिशाचः क्षुधाविष्टो भोक्तुकामोऽभ्यधावत ॥ ९ ॥

दृष्ट्वा तं शकटारूढं ब्राह्मणं शाकटायनम् । शकटस्य ध्वनिश्रुत्वा रूपंदृष्ट्वाद्विजस्य च

तथारूपः पिशाचस्तु कर्णाभ्यां बधिरीकृतः ।
आत्मत्राणपरो भूत्वा नष्टः कष्टेन पार्वति !।
तं धावन्तं समालोक्य पिशाचं ब्राह्मणोऽब्रवीत् ॥ ११ ॥
पिशाच! त्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे ।
क्व धावसि समाचक्ष्व कुतस्ते भयमागतम् ॥ १२ ॥

पिशाच उवाच

शकटस्यास्यमहतोघोषंश्रुत्वाभयङ्करम् । कर्णाभ्यांबधिरोजातोविसंज्ञस्तवदर्शनात्

ब्राह्मण उवाच

पिशाचानां बलिष्ठाश्च श्रूयन्ते ब्रह्मराक्षसाः ।
स त्वं मां भोक्तुकामोऽसि विख्यातो ब्रह्मराक्षसः ॥ १४ ॥

पिशाच उवाच

पिशाचानां समर्थोऽस्मि नष्टोऽहं तव दर्शनात् ।
दुःखं हि मृत्युः सर्वेषां जीवितं च सुदुर्लभम् ।
अतो भीतः पलायामि जीवहेतोः सुखार्थतः॥ १५ ॥

ब्राह्मण उवाच

कुतः पिशाचसंख्यंतेमरणंश्रेय एव ते । पैशाची कुत्सितायोनिःपापिनामेवजायते

पिशाच उवाच

सर्वत्र हि गतो जीवोभवत्येवसुखाश्रयः । तस्माज्जीवितुमिच्छामिप्रसीदब्रह्मराक्षस

ब्राह्मण उवाच

नाहं त्वां भोक्तुकामोऽस्मि ब्राह्मणोऽहं न राक्षसः ।
सर्वभूतहितार्थाय विचरामि महीतले ॥ १८ ॥

सर्वेषामेव जन्तूनां मैत्रो ब्राह्मण उच्यते । माकुरुष्वभयं मत्तो मित्रभावगतो ह्यहम्
तस्य तद्वचनंश्रुत्वापिशाचः स्वस्थमानसः । प्रणम्यप्रत्युवाचेदं ब्राह्मणंशाकटायनम्
यदि ते सर्वभूतानां दत्ता ह्यभयदक्षिणा । कर्मणा मनसावाचा मित्रभावं गतो यदि

पृच्छामि त्वां महाभाग! संशयो हृदये स्थितः।

श्रुत्वाऽनुकम्पया सम्यक्तन्मे व्याख्यातुमर्हसि ॥ २२ ॥

केन कर्मविपाकेन पैशाचं याति मानवः। पिशाचत्वात्कथं मुक्तिःप्राप्यतेपापकर्मभिः
इति तस्य वचः श्रुत्वा पिशाचस्यवरानने।ममत्वेनावृतस्तस्मै प्रावोचच्छाकटायनः
अपहृत्य च विप्रस्वं देवस्वं च विशेषतः। तेनपापेन पापिष्ठाः पिशाचत्वंप्रयान्तिच
पितरं मातरं चैव स्त्रियं बालं द्विजं तथा। वञ्चयित्वा हरत्यर्थं स पिशाचो भवेन्नरः
राजद्रव्यं गृहीत्वा तु न यजेन्नददातियः। आत्मानमेव पुष्णातिपिशाचत्वंसगच्छति
विश्वासघातका ये च परदाररताश्चये। प्राप्नुवन्ति पिशाचत्वं तथा ये वेदनिन्दकाः

निन्दन्ति ये पुराणानि धर्मशास्त्राणि सर्वदा।

ते भवन्ति पिशाचाश्च ये सदा पिशुना नराः ॥ २६ ॥

इति ते कथितं सर्वं वेदप्रामाण्यतोऽधुना।

इदानीं कथयिष्यामि यस्त्वं जातोऽसि तच्छृणु ॥ ३० ॥

सोमकोनाम शूद्रस्त्वं परमर्मप्रकाशकः । विश्वासघातको जातो देवब्राह्मणदूषकः
नास्तिको भिन्नमर्यादो जन्मन्यत्रापि सप्तमे। सकुलंपातयित्वात्र नरकेदारुणेभृशम्
पिशाचयोनिं सम्प्राप्तः पुनः प्राप्स्यसिरौरवम्। महारौरवसञ्ज्ञंतुक्रकचंकालसूत्रकम्

यन्त्रपीडनकं रौद्रं मथनं कुम्भवालुकम् ॥ ३३ ॥

इत्येवं वदतस्तस्य ब्राह्मणस्य यशस्विनि !।

सस्मार प्राक्तनं जन्म सत्सङ्गात्कुत्सितं स्वकम् ॥ ३४ ॥

दुःखाभिभूतो निश्चेष्टो धिग्धिगित्यसकृद्ब्रुवन्।

पतितो भूतले देवि! इदं वाक्यमथाब्रवीत् ॥ ३५ ॥

अहोकेनापि पुण्येन भवता सह दर्शनम्। जातं ममाल्पपुण्यस्य दीनस्यकृपणस्य च

नास्ति धर्मसमं मित्रं नास्ति धर्मसमागतिः।

नास्तिधर्मसमं त्राणं स च नास्ति मम प्रभो ॥ ३७ ॥

मग्नोऽहं दुःखजलधौ मग्नोऽहं पापकर्दमे। भ्रान्तोऽहमन्धतमसिततस्त्वांशरणं गतः

नमस्तेऽस्तु महाभाग ! किं करोमि प्रशाधि माम्।

तत्तपोबलनिर्दिष्टमिदं प्राप्तं मयाऽधुना ॥ ३६ ॥

एवं निगदतस्तस्य पिशाचस्य वरानने !। कथयामास माहात्म्यंसविप्रःशाकटायनः
पृथिव्यांयानितीर्थानि आसमुद्रगतानिवै। क्षेत्राणियानिसन्तीहतेषांक्षेत्रंसुपुण्यदम्
महाकालवनं क्षेत्रं प्रलयेऽप्यक्षयं गतम्। लिङ्गं तत्र महाक्षेत्रे पिशाचत्वविनाशनम्
दुण्ढेश्वरस्य देवस्यदक्षिणेत्रिदशार्चितम्। पैशाचं विद्यतेभूयः पिशाचयोनिनाशनम्

तस्य दर्शनमात्रेण पिशाचत्वात्प्रमोक्ष्यसे ॥ ४३ ॥

तस्य तद्वचनं श्रुत्वा स पिशाचो वरानने !। आजगामत्वरायुक्तो नमस्कृत्यद्विजंतदा
महाकालवने पुण्ये समीहितफलप्रदे । ददर्श तत्र तल्लिङ्गंस्नात्वा शिप्राजले शुभे ॥
दर्शनात्तस्य लिङ्गस्यसपिशाचो वरानने !। तत्क्षणाद्दिव्यदेहस्तु दिव्याभरणभूषितः
दिव्यं विमानमारूढो गतो लोके सनातने। उद्धृत्यसकलं गोत्रं मातृकं पैतृकंतथा
दृष्ट्वा तन्महदाश्चर्यंमाहात्म्यातिशयं प्रिये !। प्रोक्तंदेवैर्विमानस्थैःसिद्धैराकाशगैस्तथा

पिशाचोऽपि गतः स्वर्गं मस्य लिङ्गस्य दर्शनात्।

अतो देवः स विख्यातो भविष्यति महीतले ॥

पिशाचेश्वरसञ्ज्ञस्तु सर्वपापप्रणाशनः ॥ ४६ ॥

येपश्यन्तिनरादेवि! पिशाचेश्वरसञ्ज्ञकम्। तेषांहिपितरःसद्योयेचापिनिरयेस्थिताः

पिशाचत्वाद्विमुच्यन्ते स्वर्गं यान्ति न संशयः ॥ ५० ॥

अश्वमेधस्य यज्ञस्य सम्यगिष्टस्य यत्फलम्।

तत्फलं लभते सोऽपि पिशाचेश्वरदर्शनात् ॥ ५१ ॥

गयायां पिण्डदानेनयत्पुण्यं समुदाहृतम्। तत्पुण्यमधिकंज्ञेयं पिशाचेश्वरदर्शनात्
येपश्यन्ति चतुर्दश्यां पिशाचेश्वरसञ्ज्ञकम् । प्रेतत्वंचपिशाचत्वं कुलेतेषांनजायते
न वियोनिं नरो याति नरकं चनपश्यति। प्रसङ्गेनापियःपश्येत्पिशाचेश्वरसञ्ज्ञकम्
सर्वैश्वर्यसमायुक्तः सर्वबन्धुसमन्वितः । मोदतेपितृलोके स पिशाचेश्वरदर्शनात् ॥

कीर्त्तनान्मुच्यते पापाद् दृष्ट्वा स्वर्गं च गच्छति।

स्पर्शनादस्य लिङ्गस्य पुनात्यासप्तमं कुलम् ॥ ५६ ॥
तदैव स नरो मुक्तः संसारनिगडादिभिः । यदैव वीक्षतेलिङ्गं पिशाचेश्वरसञ्ज्ञकम्
यज्ञानां तपसां चैव दानानां चैवयत्फलम् । तत्फलंकोटिगुणितं जायतेतस्यदर्शनात्
यदि पश्येच्चतुर्दश्यां वैशाखे कार्त्तिकेतथा । तस्यपुण्यमसङ्ख्यातंजायतेनात्रसंशयः
एषते कथितो देवि! प्रभावः पापनाशनः । पिशाचेश्वरदेवस्य श्रूयतां सङ्गमेश्वरम् ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये पिशाचेश्वरमाहात्म्यवर्णनंनामाऽष्ट-
षष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः

सङ्गमेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

एकोनसप्ततिं देवि! शृणु पार्वति! यत्नतः । यस्य दर्शनमात्रेण सङ्गमो जायते सदा॥
कलिङ्गविषये देवि! सुबाहुर्नाम पार्थिवः । बभूव भुविविख्यातोयज्वापरमधार्मिकः
तस्य पत्नी विशालाक्षीदुहिता दृढधन्वनः । काञ्चीपुरनिवासस्य क्षात्रव्रतरतस्यच
परस्परानुरागत्वात्पराप्रीतिरभूत्तयोः । तस्यराज्ञःशिरोऽर्त्तिस्तु मध्याह्नेजायतेसदा
आयुर्वेदविदां मुख्यैः शरीरस्य चिकित्सकैः ।
तैः प्रणीता प्रिये! योगा व्यथावृद्धिर्दिने दिने ॥ ५ ॥
एवं बहुतरेकाले गते देवि! महीपतिम् । प्रत्युवाचविशालाक्षी भर्तृदुःखेन पीडिता
कथमेषाशिरोरोगे जरा ते पृथिवीपते !। वैद्याश्च बहवो देव! नानाशास्त्रविशारदाः ॥
प्रयतन्तेऽस्य नाशाय तथाऽप्येष न शाम्यति ॥ ७ ॥
एवं स प्रियया प्रोक्तः सुबाहुः पृथिवीपतिः ।

प्रत्युवाच प्रियां भार्यां प्रेम्णा प्रणयवत्सलाम् ॥ ८ ॥
सुखदुःखाश्रयं देवि शरीरंसर्वदेहिनाम् । पूर्वकर्मानुसारेण सुखं दुःखं च जायते ॥
इति सम्बोधिता राज्ञी तेन राज्ञा वरानने ! ।
पुनः प्रोवाच हार्द्देन तमेवार्थं सुदुःखिता ॥ १० ॥
यदासावारितात्यर्थं पृच्छत्येव पुनःपुनः । तदाराजाप्रहस्यैव तां च राज्ञीमुवाच ह ॥
यदि त्वं श्रोतुकामासि रोगस्याऽस्य समुद्भवम् ।
कारणं तत्त्वतो देवि ! नाख्यास्याम्यहमत्र वै ॥ १२ ॥
महाकालवनंगत्वा सिद्धगन्धर्वसेवितम् । तत्र ते कथयिष्यामि यदि कौतूहलं तव
श्वः प्रभाते गमिष्यामि त्वया सार्द्धं शुचिस्मिते !।
इति तस्य वचः श्रुत्वा सा राज्ञी विस्मिता स्थिता ।
उत्सुका गमनार्थाय महाकालवनं शुभम् ॥ १४ ॥
अथसारजनीवृत्ता प्रभाते नृपसत्तमः । प्रतस्थे भार्यया सार्द्धं सैन्येन महताम्वृतः ॥
आजगाम क्रमेणैव महाकालवनं शुभम् । आवासंविदधेधीमाञ्छिप्रातीरे नृपस्तदा
पातालवाहिनी तत्र गङ्गा त्रिपथगामिनी । द्वितीयानीलगङ्गा च शिप्रया सहसङ्गता
तासां च सङ्गमस्तत्र तल्लिङ्गं सङ्गमेश्वरम् । पूजितं गङ्गयासार्द्धं शिप्रयानीलगङ्गया
अथ प्राप्ते सुबाहौच साराज्ञीविस्मयान्विता । पप्रच्छप्रणयोपेताकथ्यतामत्रकारणम्
यत्त्वयोक्तं पुरा देव! कथयिष्यामि तत्र वै ॥ १९ ॥
एवमुक्तः सुबाहुस्तु प्रियया पृथिवीपतिः । प्रत्युवाच प्रियांप्रेम्णाप्रहस्यच पुनः पुनः
सुखं स्वपिहि भद्राङ्गि! श्रान्ता वयमनिन्दिते ।
प्रभाते कथयिष्यामि शिरोरोगस्य कारणम् ॥ २१ ॥
अथ सा रजनी वृत्ता प्रभाते नृपसत्तमः । कथयामास माहात्म्यं देवस्य परमेष्ठिनः
अहमासं कुशूद्रस्तु सर्वदा वेदनिन्दकः । विश्वासघातकोनित्यं त्वमप्येवं तथाविधा
पुत्रो जातस्तुदुःशीलो देवब्राह्मणवञ्चकः । कुरूपः कर्कशो दुष्टः प्रकृत्या पापपूरुषः ॥
अथदीर्घेणकालेन द्वादशाब्दं भयावहा । अनावृष्टिस्तु सञ्जाता सर्वप्राणिभयङ्करी ॥

वियोगस्तु त्वया प्राप्तो मया सार्द्धं सुतेन च । ततोऽहंदुःखसन्तप्तोवैराग्यंपरमंगतः
इच्छतानिधनंसद्यो मयाप्रोक्तमिदं वचः । मम पुण्यविहीनस्य पापध्यानरतस्य च
सुतेन भार्यया सार्द्धं सङ्गमो दुर्लभः पुनः । कथंस्वपितिपापिष्ठः कृत्वापापंसुदारुणम्
कुटुम्बार्थे करोत्येवमेकाकी निस्तरत्यसौ । धर्म एव परोबन्धुर्धर्मएव परा गतिः
धर्मेण साध्यते सर्वं तस्माद्धर्मं समाश्रयेत् ॥ २६ ॥
इतिचिन्तयतोऽत्यर्थं ममप्राणा गताः प्रिये । विविधा यातनाप्राप्तामयानरककोटिषु
अन्तकालेऽपि धर्मस्य प्रशंसा यामयाकृता । मत्स्योऽहंतेनपुण्येनजातःशिप्राजलेशुभे
त्वं च श्येनी ततो जाता तस्मिन्नेव वनोत्तमे ।
प्रावृट्कालेऽथ सम्प्राप्ते आश्लेषानुगते रवौ ॥ ३२ ॥
नदीत्रयरयेणैव निःसृतोऽहं जलात्ततः ।
त्वया शिरसि सम्प्राप्तो नखैर्विद्धोऽस्मि सुन्दरि !॥ ३३ ॥
आनीतोऽहं त्वयादेवि! सङ्गमेश्वरसन्निधौ । कैवर्तैर्निधनंप्राप्तं त्वया सार्द्धं वरानने !
म्रियमाणेन मे दृष्टो देवोऽसौ सङ्गमेश्वरः । शिप्रयास्नापितोऽत्यर्थं गङ्गयानीलगङ्गया
तस्यदर्शनमात्रेण जातोऽहं पृथिवीपतिः । कलिङ्गविषये देवि ! सर्वभूपालवन्दितः
सुता त्वं वल्लभा जाता काञ्चीपुरनिवासिनः । क्षात्रव्रतरतस्यैव सुभगा दृढधन्वनः
आवां राजत्वमापन्नौ तस्यलिङ्गस्यदर्शनात् । त्वया कररुहैर्विद्धो मारितोलगुडैश्चतैः
मध्याह्ने कदनं स्मृत्वा ततो मे शिरसि व्यथा ।
स्मरामि जातिमात्मीयामस्य देवस्य दर्शनात् ॥ ३६ ॥
एतत्ते कथितं देवि! पृष्टोऽहं यत्त्वया पुरा । गच्छसुन्दरि! भद्रं ते यत्रते वर्त्तते मनः
स्थातव्यं च मयाऽत्रैव सेव्योऽसौ सङ्गमेश्वरः ॥ ४१ ॥
ततः सा निरवद्याङ्गी नीलोत्पलविलोचना । करुणं सुस्वरंकृत्वाभर्त्तारमिदमब्रवीत्
मयाऽपि संस्मृतं देव! पूर्वजन्मनि चेष्टितम् ।
अस्य लिङ्गस्य माहात्म्यात्तिर्यग्योनिगतावपि ॥ ४३ ॥
प्राप्तावावां मनुष्यत्वं निर्मलेषु कुलेषु च । प्राप्ताश्रीरतुलालोके प्राप्तं राज्यमकण्टकम्

प्राप्ताभार्या प्रियाहंतेत्वंच प्राप्तो मया नृप । ख्यातोऽयं त्रिषुलोकेषुनामतः सङ्गमेश्वरः
अस्य देवस्य माहात्म्याद्वियोगो न भविष्यति ।
यथा कृष्णस्य लक्ष्म्या च पार्वत्या च शिवस्य च ॥ ४६ ॥
पुनः प्रणम्य प्रणता सहसा मन्मथाकुला । भर्त्ता सुबाहुर्मेभूयादन्यस्मिन्निहजन्मनि
तव देवप्रसादेन यदि त्वं सङ्गमेश्वरः । ततोविलोक्यसोन्मेषं कुसुमेषु तरङ्गिताम् ॥
कान्तां पिबन्निव दृशा प्राह तां तरलेक्षणाम् ॥ ४८ ॥
सहजेनाभिजन्येन गुणैः कान्त्या विभूषिता ।
मया प्राप्ता विशालाक्षि ! प्राप्तं मज्जन्मनः फलम् ॥ ४९ ॥
तन्मतां भयमन्त्रस्तां कम्पिताधरपल्लवाम् ।
गृहीत्वा च करे कान्तां जगामाऽन्तः पुरं निजम् ॥ ५० ॥
वदन्कन्दर्पसर्पेण दष्टोऽहं दैवतोऽधुना । चचार तत्र निःसारं संसारं कलयन्धिया
पुरे ममवरारोहेचिरंरेमेतया सह । एवं राजाप्रियां प्राप्य निवेद्य च निजां कथाम् ॥
भेजे राज्यं तया सार्द्धं विस्तारितमहोत्सवः ।
अशाश्वतमिदं ज्ञात्वा अर्थिभ्योऽपि ददौ धनम् ॥ ५३ ॥
अपूर्वत्यागिनानेन त्रैलोक्यं विस्मयं ययौ । राज्यंकृत्वाचिरंकालं सभार्यानृपसत्तमः
भुक्त्वा च विपुलान्भोगांस्तस्मिँल्लिङ्गे लयंगतः ।
अतो देवि! सुविख्यातो देवोऽसौ सङ्गमेश्वरः ॥ ५५ ॥
यः पश्येत्परयाभक्त्यातल्लिङ्गंसङ्गमेश्वरम् । नवियोगोभवेत्तस्यपुत्रभ्रातृप्रियादिभिः
नियमेन तु यः पश्येत्तल्लिङ्गं सङ्गमेश्वरम् । राजसूयसहस्रस्य फलं तस्याधिकंभवेत्
गाङ्गं च सफलं पुण्यं यामुनंनार्मदं तथा । जायते चान्द्रभागं च सङ्गमेश्वरदर्शनात्
यः पश्येच्छ्रावणेमासि तल्लिङ्गंसङ्गमेश्वरम् । कार्तिकस्वामिनोयात्राकृतातेन नसंशयः
मासि चाश्वयुजे देवं यः पश्येत्सङ्गमेश्वरम् । कृतं तेन सहस्रं तु वाजपेयं वरानने!॥
यः पश्येत्कार्त्तिके मासि तल्लिङ्गं सङ्गमेश्वरम् । राजसूयसहस्रं तु कृतं तेन न संशयः
चतुरो वार्षिकान्मासान्यः पश्येत्सङ्गमेश्वरम् । सयाति परमं स्थानंममाभीष्टतरंप्रिये

एष ते कथितो देवि! प्रभावः पापनाशनः । सङ्गमेश्वरदेवस्य श्रृणु दुर्द्धर्षमीश्वरम् ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये सङ्गमेश्वरमाहात्म्यवर्णनंनामैकोन-
सप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

दुर्द्धर्षेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

श्रृणु सप्ततिकं देवं दुर्द्धर्षेश्वमीश्वरम् । यस्य दर्शनतो देवि! नरः पापैः प्रमुच्यते ॥
दुर्द्धर्षोनाम राजाऽभून्नेपालविषये पुरा । पुण्यकेतुर्यशस्वी च सत्यसन्धो दृढव्रतः ॥

तिस्रस्तस्याभवन्भार्यास्तत्तुल्याः सुमनोहराः ।
विहरन्स वनोद्याने वसन्ते पृथिवीपतिः ॥ ३ ॥

कदा मृगरसाविष्टो दैवाद्धै वातरंहसा । तुरगेणोहितः प्राप वनं रुचिरपादपम् ॥४॥
गजेन्द्रमृगशार्दूलसिंहसम्बरसङ्कुलम् । ऋक्षवानरवाराहगण्डकादिविराजितम् ॥

तस्मिन्वने सुविस्तीर्णं कदलीखण्डमण्डितम् ।
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ॥ ६ ॥

ददर्श दर्पणस्वच्छं सरो नीरजराजितम् । स्नातसिद्धवधूवृन्दकुचकुङ्कुमपिञ्जरम् ॥
ददर्श कन्यां तत्रैव काननस्यैव देवताम् । स तां दृष्ट्वासुचार्वङ्गीं मन्मथेन प्रपीडितः
चित्रन्यस्तइव क्षिप्रमभूद्विस्मयनिश्चलः । साभुजङ्गीव सङ्क्रुद्धामन्त्रेणेवान्तिकंययौ

कन्दर्पकोटिसदृशम्विभ्रान्तं नृपमब्रवीत् ।
सुतां मां विद्धि राजेन्द्र! कल्पस्य प्राणवल्लभाम् ॥ १० ॥
तपोरतस्य शान्तस्य सर्वदा ब्रह्मचारिणः ।

मदर्थे प्रार्थ्यतां विप्र! स मां तुभ्यम्प्रदास्यति ॥ ११ ॥
इति तस्या वचः श्रुत्वा मन्मथेनाकुलीकृतः ।
लज्जां त्यक्त्वा स भूपालो ययाचे विजने च ताम् ॥ १२ ॥
मम प्राणव्ययः सुभ्रूस्त्वां विना समुपस्थितः ।
कार्याकार्यविचारो हि कस्य जीवितशान्तये ॥ १३ ॥

त्यज्यते प्राप्तममृतंयदेतद्बुद्धिलाघवम् । को जानीतेपरे लोके कस्य किंनुभविष्यति
भज मामनवद्याङ्गि तवैतद्वदनामृतम् । न पाययसि चेन्मह्यं मृतञ्जानीहि मे प्रिये॥

स्वयं पिबामि चेद्विद्धि परलोकगतं हि माम् ।
श्रुत्वेति चकिता तन्वी प्रोवाच विनयान्विता ॥ १६ ॥

भ्रष्टायां मयितातस्यविनष्टेकन्यकाफले । कुलं पततिनःसर्वंतस्मादेतद्विचिन्त्यताम्
यदिते परमं प्रेम ममोपरि महीपते! । मदर्थे प्रार्थ्यतां विप्र स मां नूनं प्रदास्यति॥

तस्यास्तद्वचनं श्रुत्वा नान्यथा मे भविष्यति ।
ज्ञात्वा कन्यां द्विजस्यैव कल्पस्य ब्रह्मचारिणः ॥ १९ ॥

गत्वा ययाचेप्रणतः स्थितंनिजतपोवने । मुनीन्द्रश्चन्द्रवदनां स चास्मैतां ददौमुदा
तत्रैव सङ्गतो राजा मन्मथेन वशीकृतः । रेमे रमणकैर्योगैर्न सस्मार निजं पुरम् ॥

कदलीखण्डकुञ्जेषु रम्यासु वनराजिषु ।
बहुलाम्रकदम्बेषु राजा भेजे नवां वधूम् ।
सिषेवे चारु सुरतं स विदग्धोऽतिमुग्धया ॥ २२ ॥

एवं हि वसतस्तस्य दुर्द्धर्षस्य वरानने !। आजगाम सुदुर्द्धर्षो राक्षसोऽतिभयङ्करः
ज्वलितो विटकाकारो दंष्ट्रोत्कटकटाननः । तं नृपंमोहयित्वा तु तरसातरलेक्षणाम्

जहार मन्मथाविष्टो रूपयौवनशालिनीम् ।
राजा च तां हृतां दृष्ट्वा वियोग विषमूर्च्छितः ।
स्मृत्वा स्मृत्वा सुचार्वङ्गीं विललापाऽऽकुलेन्द्रियः ॥ २५ ॥

हा प्रिये प्रेमपीयूषे प्रणयामृतदीर्घिके । हा सुन्दरि! विशालाक्षिक्वगता मां विहायवै

पुनरिन्दुमिवानन्दंकदाद्रक्ष्यामितेमुखम् । इतिप्रलापमकरोत्स्मरंस्तांचारुहासिनीम्
उन्मत्त इव बभ्राम तत्र तत्र स्मरातुरः ॥ २७ ॥
एवं विलपतस्तस्य दुर्द्धर्षस्य नृपस्य तु । आजगाम तमुद्देशं कल्पो ब्राह्मणसत्तमः
ददर्श नृपतिं तत्र भ्रमन्तं भ्रमरं यथा ॥ २८ ॥
ज्ञात्वा जामातरं सम्यक्समाश्वास्य वचोऽब्रवीत् ।
एहि दुर्द्धर्ष राजेन्द्र ! गहना कर्मणो गतिः ।
क्व गतो हि महीपाल !नेपालविषयस्तव ॥ २९ ॥
कुलीना रूपवत्यश्च तिस्रो भार्याः क्व वै गताः । क्व तेराज्यं गतंभूप कुत्रपुत्रीगताभम
सर्वं विनश्वरं लोके गन्धर्वनगरोपमम् । अनित्यं जीवितंभूप!राज्यं वै बुद्बुदोपमम्
एवमाश्वासितो राजा कल्पेन च पुनः पुनः ।
सस्मार तां सुचार्वङ्गीं मन्मथेन प्रपीडितः ॥ ३२ ॥
ब्रूहि मे भगवन्सम्यग्यदि तेऽस्ति दया मयि ।
कथं राज्यं स्वकीयं स्यात्कथं मे सुहृदागमः ॥ ३३ ॥
तिस्रो भार्याः कथं विप्र! पश्यामि पृथिवीतले ।
लावण्यामृतशालिन्यस्तवपुत्र्या द्विजोत्तम !।
कथं समागमो भूयो भविष्यति मया सह ॥ ३४ ॥
इति तस्य वचः श्रुत्वा विप्रेणोक्तं वरानने !। गच्छ भूपाल नेपालं महाकालंततोव्रज
तस्मिन्क्षेत्रे तीर्थवरे लिङ्गं सर्वार्थसाधकम् ।
विद्यते यत्र सूर्येण तपस्तप्तं सुदुष्करम् ॥ ३६ ॥
शिप्रायास्तु तटे रम्ये पुण्येब्रह्मेशपश्चिमे । तस्य दर्शनमात्रेण तवाऽभीष्टं भविष्यति
कल्पस्यवचनं श्रुत्वा सत्वरोनृपसत्तमः । नेपालं च ततोगत्वासमाश्वास्यसुहृज्जनम्
सान्तःपुरपरीवारो महाकालवनं गतः । सर्वदा सर्वसिद्धीनामाश्रयं विषयं श्रियः ॥
तत्र स्नात्वा जले पुण्ये शिप्रायाश्चाऽऽशु सिद्धिदे ।
सूर्येणाराधितं लिङ्गं ददर्श नृपसत्तमः ॥ ४० ॥

पूजयामास रत्नैश्च दिव्यैर्वस्त्रैः सुभूषणैः । कर्पूरेण सुगन्धेन लिङ्गपूजा कृता तदा
मुक्ताफलैःसुतारैश्चजलधाराभिरेवच । भक्त्या ननर्त्ततस्याग्रे संस्तुवन्विविधैःस्तवैः
शुश्राव श्रोत्रपीयूषं गीतं देवगृहेशुभे । तच्छ्रुत्वाकौतुकाविष्टोध्वनिंश्रुत्वामनोरमाम्
प्रियामपश्यत्तत्रस्थां लावण्यललनावधिम् ॥ ४३ ॥
तां दृष्ट्वा विस्मयोत्फुल्ललोचनस्तन्मयोऽभवत् ।
क्षिप्रं तद्दर्शनेनैव स्मरेण तरलीकृतः ॥ ४४ ॥
ज्ञात्वा मे सैव पत्नीयं दृष्टादेवप्रसादतः । सापि लावण्यनलिनीराजहंसंविलोक्यतम्
क्षिप्रं पुलकिता तस्या विरराज कुचस्थली ।
एतस्मिन्नन्तरे देवि! वाणी लिङ्गात्समुत्थिता ॥ ४६ ॥
विश्वावसोः सिद्धपतेः सुतैषा प्राणवल्लभा । कल्पेनपालिता सम्यक्त्वदर्थंनृपसत्तम!
आनीता ते मया पत्नी हत्वा तं राक्षसाधिपम् ।
गृहाण च मया दत्तां भुङ्क्ष्व राज्यमकण्टकम् ॥ ४८ ॥
इत्युक्तोऽसौ गतो देवि! लब्ध्वा भार्यां प्रियां तदा ।
सान्तःपुरपरीवारो लिङ्गस्याऽस्य प्रभावतः ॥ ४९ ॥
आराधितो नरेन्द्रेण दुर्द्धर्षेण महात्मना । तदाप्रभृति देवोऽयं दुर्द्धर्षेश्वरसञ्ज्ञकः ॥
त्रिषु लोकेषु विख्यातो वाञ्छितार्थफलप्रदः ॥ ५० ॥
ये पश्यन्तिविशालाक्षि दुर्द्धर्षेश्वरसञ्ज्ञकम् । ते दुर्द्धर्षाभविष्यन्तिशत्रूणांसमरेसदा
सङ्क्रान्तौरविवारे च ग्रहणेचन्द्रसूर्ययोः । गत्वाऽर्चयन्ति ये देवि देवं दुर्द्धर्षमीश्वरम्
ते प्रयान्ति विमानेन मदीयं स्थानमुत्तमम् ॥ ५२ ॥
पापाचाराश्च ये जीवा दुष्कर्मनिरता नराः ।
मुच्यन्ते पातकात्सद्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५३ ॥
दर्शनात्स्पर्शनात्सद्यो नामसङ्कीर्त्तनादपि । ब्रह्महत्यासहस्रं हि तत्क्षणादेव नश्यति
कृतघ्नो निन्दको दुष्टः पापकर्मा दुरात्मवान् । परदाररतश्चौरो ब्रह्मघ्नो गुरुतल्पगः
मुच्यते सर्वपापेभ्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५५ ॥
अयने विषुवेचैव सम्प्राप्ते सोमपर्वणि । ये पश्यन्ति च दुर्द्धर्षं स्नात्वाशिप्राजलेशुभे

गङ्गायास्त्रिगुणं पुण्यं जायते नात्र संशयः ॥ ५६ ॥
तत्रतद्दीयतेदानंतस्यसङ्ख्यानविद्यते । पितरस्तोषितास्तेनआत्मावैतोषितस्ततः
कल्पकोटिसहस्रं तु मत्पुरे पूजितो वसेत् ।
यदा याति च भूलोके तदाऽसौ भूपतिर्भवेत् ॥ ५८ ॥
अधृष्यः शत्रुवर्गेण फलं प्राप्नोति चाऽक्षयम् ।
पदं यत्त्रिदशैर्वन्द्यं पुनरावृत्तिवर्जितम् ॥ ५६ ॥
एषतेकथितोदेवि! प्रभावःपापनाशनः । दुर्द्धर्षेश्वरदेवस्य प्रयागेशमतः शृणु ॥ ६० ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-चतुरशीतिलिङ्गमाहात्म्ये उमामहेश्वरसम्वादे दुर्द्धर्षेश्वरमाहात्म्यवर्णनंनाम-सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः

प्रयागेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

एकसप्ततिकं विद्धि प्रयागेश्वरसञ्ज्ञकम् । अद्वितीयं विजानीहि महापातकनाशनम्
हास्तिनेऽभूत्पुरे श्रीमाञ्छन्तनुर्नृपसत्तमः । वैवस्वतेऽन्तरे कल्पे युगे द्वापरसञ्ज्ञके
स चाद्भुतमहावीर्यो वज्रसंहननो युवा । सर्वशास्त्रेषु कुशलः कलापुञ्जविचक्षणः ॥३
बलेनविष्णुसदृशस्तेजसा भास्करोपमः । गङ्गामेष चचारैकः सिद्धचारणसेविताम्
स कदाचिन्महाबाहुः प्रभूतबलवाहनः । वनं जगाम गहनं हयनागशतैर्वृतः ॥ ५ ॥
गत्वा तत्र मृगान्व्याघ्रान्घातयामास लीलया ।
महिषाश्ववराहांश्च विनिघ्नन्राजसत्तमः ॥ ६ ॥

स कदाचिद्वने तस्मिन्ददर्श परमां स्त्रियम् ।
जाज्वल्यमानां वपुषा साक्षात्पद्मामिवापराम् ॥ ७ ॥
तां दृष्ट्वा हृष्टरोमाभूद्विस्मितो रूपसम्पदा । पिबन्निवच नेत्राभ्यां नातृप्यतनराधिपः
सा दृष्ट्वैव च राजानं विचरन्तंमहाद्युतिम् । स्नेहादागतसौहार्दान्नातृप्यतविलासिनी
तामुवाच ततो राजा सान्त्वयञ्छ्लक्ष्णया गिरा ।
देवी वा दानवी त्वं च गन्धर्वी यदि वाप्सरा ॥ १० ॥
पक्षी वा पन्नगी वा त्वं मानुषी वा सुमध्यमे !।
याचे त्वाऽम्भोजगर्भाभे भार्या मे भव शोभने !॥ ११ ॥
एतच्छ्रुत्वा वचोराज्ञः संस्तुतं मृदु वल्गु च । अङ्गीकृतंतया देवि समयंप्रार्थतो नृपः
वारिता विप्रिये वापि त्यजेयं त्वामसंशयम् ।
न प्रष्टव्या त्वया राजन्काऽसि कस्येति सर्वथा ॥ १३ ॥
एवमस्त्विवतितेनोक्तं सत्येन सुकृतेन च । स तस्याः शीलवृत्तेन रूपौदार्यगुणेन च
उपचारेण च रहस्तुतोष जगत्पतिः । दिव्यरूपा हि सा देवी गङ्गा त्रिपथगा नदी
मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनि !।
राजानं रमयामास यथा रेमे तथैव च ॥ १६ ॥
स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः । सम्वत्सरानृतून्मासान्न बुबोधबहून्गतान्
रममाणस्तयासार्द्धं यथाकामं नरेश्वरः । अष्टावजनयत्पुत्रांस्तस्याममरवर्णिनः ॥
जातं जातं च सा पुत्रं क्षिपत्यम्भसि मुक्तये ।
प्रीणामि त्वामहमिति गङ्गास्रोतसि पावने ॥ १६ ॥
नास्यतत्तुप्रियं राज्ञःशन्तनोर्ह्यभवत्तदा । नोवाचकिञ्चित्तांदेवींत्यागाद्भीतोमहापतिः
अथैनामष्टमे पुत्रे जाते प्रहसतीमिव ।
उवाच राजा दुःखार्त्तः परीप्सन्पुत्रमात्मनः ॥ २१ ॥
मा वधीः कस्य काऽसीति किं विध्वंसि सुतानिति ।
पुत्रहिंसा महत्पापं मा प्राप्सीस्तिष्ठ गर्हिते !॥ २२ ॥

गङ्गोवाच

पुत्रकामा न ते हन्ति पुत्रं पुत्रवतांवर !। जीर्णस्तु मम वासोऽयं यथामे समयःकृतः
अहं गङ्गा जह्नुसुता महर्षिगणसेविता॥ देवकार्यार्थसिद्ध्यर्थमुषित्वाऽहं त्वया सह
इमेऽष्टौ वसवो देवा महाभीमा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः॥
तेषामानयिता नान्यस्त्वद्दृते भुवि विद्यते। मद्विधा मानुषीधात्रीनवैवास्तिकदाचन
तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता। स्वस्तितेऽस्तु गमिष्यामिपुत्रं पाहिमहाव्रत

सैवमुक्त्वा तदा गङ्गा विष्णुमायाविमोहिता।
रुरोद मानुषं भावमाश्रिता तनुमध्यमा॥ २८॥

अहो बतमहत्कष्टंयदमी घातिताःसुताः। मया नृशंसयामोहाज्जले क्षिप्तास्तुबालकाः
हा वत्साहासुताःपुत्राहा तातास्तनयाःक्व वै। मां विहाय गताः कुत्रहृदयंकिंनदीर्यते
मातर्मातेति करुणंब्रुवाणाःस्वयमागताः। उपगुह्योकदा पुत्रान्वत्सवत्सेति सौहृदात्
कस्य जातु प्रणीतेन पिङ्गेन क्षितिरेणुना। ममोत्तरीयमुत्सङ्गं कदाङ्गामलयिष्यति॥
अङ्गप्रत्यङ्गसम्भूता मनोहृदयनन्दनाः। मया तु मात्रा हा वत्सा मारिता निधनंगताः

काँल्लोकान्नु गमिष्यामि कृत्वा कर्म सुदारुणम्।
कथं पुण्या भविष्यामि पुत्रघ्नी निर्दया सती॥ ३४॥

इत्येवं करुणं कृत्वा रुदित्वा चपुनःपुनः। मूर्छितापतिताप्यार्ता निश्चेष्टाधरणीतले
एतस्मिन्नन्तरे देवि! नारदो मुनिसत्तमः। तस्या विलापशब्दं तमाकर्ण्यसहसातदा
विस्मयोत्फुल्लनयनः किमेतदितिचिन्तयत्। एषासाजाह्नवीगङ्गापावनी देववन्दिता
समुद्रमहिषीदिव्यापुण्यात्रिपथगा नदी। मानुषंभावमाश्रित्य कस्माद्रोदितिविह्वला
इत्येवं चिन्तयित्वा च समीपमगमन्मुनिः। गङ्गायाविलपन्त्याश्च ब्रह्मपुत्रस्तुनारदः

उवाचोच्चैर्वियत्स्थोऽसौ देवि! गङ्गे नमोऽस्तु ते॥ ३६॥

नारदोऽहं महापुण्येकस्माद्रोदिषिपावनि !। हिमाद्रिपुत्रीविख्यातादेवगन्धर्वसेविता

धृता शिरसि देवेन शिवेन परमेष्ठिना॥ ४१॥

नारदस्यवचःश्रुत्वा दिव्यादेवनदीतथा। अवलोक्यविमानस्थं प्रत्युवाचमहामुनिम्

मयानारद मोहेन कृतोऽधर्मोजुगुप्सितः। जानन्त्या सुमहत्पापं सप्तपुत्रा हता मया
समुद्रेण वियोगस्तु संजातो ममदैवतः। भार्याजाता मनुष्यस्य पुत्राजाताहताश्चमे
अतो मया विलपितं मग्नयाशोकसागरे। कथ्यतां मम देवर्षे! येन पुण्या भवामि वै
इतितस्यावचः श्रुत्वानारदो मुनिसत्तमः। त्रिकालवेदीशुद्धात्मा गङ्गां वचनमब्रवीत्

नारद उवाच

किं विस्मृतोजगद्वन्द्येदेवानां समयःशुभः। प्रतिज्ञातंत्वया देवि! वसूनांमोक्षकारणे
प्राप्तास्तेवसवोलोकान्प्रसादात्तवसुव्रते !। त्वयावतारितोदेवि! समुद्रःशन्तनुःस्मृतः
इतितस्यवचःश्रुत्वा नारदस्य महात्मनः। गङ्गात्रिपथगापुण्या प्रत्युवाचमहामुनिम्
सत्यमुक्तंत्वया ब्रह्मञ्ज्ञातंसर्वंमयाऽधुना। किन्तुयोनिर्यतोलब्धा मानुषीतेनमोहिता
अपवादभयाद्भीता भवन्तं शरणं गता। दीयतामुपदेशो मे कथ्यतां स्थानमुत्तमम्॥

नारद उवाच

किं विस्मृतो जगद्वन्द्ये देवानां समयःकृतः। अपवादभयाद्भीतायदित्वंदेवि! पुण्यदे

मां पृच्छसि परं स्थानं शृणु त्वं वच्मि सुव्रते !॥ ५२॥
अवन्ती तु समाख्याता सप्तकल्पसनातनी।
तस्यां सखी त्वदीया तु शिप्रा विप्रप्रिया सदा॥ ५३॥

तस्यास्तीरेशुभंलिङ्गं दुर्द्धर्षेश्वरदक्षिणे। विद्यतेत्रिदशैः पूज्यं सर्वतीर्थैश्चसेवितम्
तस्य दर्शनमात्रेण कृतकृत्या भविष्यसि। तस्माद्गच्छमहापुण्येगङ्गे देवर्षिसेविते
इत्युक्ता सा त्रिपथगा नारदेन महात्मना। गता तत्रमहापुण्या सखीं शिप्रां ददर्श ह
संश्लेषं चतदा कृत्वा लिङ्गं दृष्ट्वासुपावनम्। पूजयामास भावेन तत्रैवचचिरं स्थिता
अथ सूर्यसुता देवी यमुना पापनाशिनी। तत्रायातासुहार्द्देनयत्र गङ्गा व्यवस्थिता
ददर्शदेवीतांगङ्गां ध्यायन्तीशङ्करं शिवम्। सापितत्रैवतिष्ठन्तीपूजयन्तीपरंशिवम्
अथ तेनैव कालेन प्राचीदेवी सरस्वती। समायाता सुगुप्ताच गङ्गायमुनयोर्जले॥
एतस्मिन्नन्तरे देवि! शक्रं प्राह स नारदः। न दृश्यते प्रयागस्तु महाकालवनं गतः॥
गङ्गायमुनयोर्मध्ये यत्र गुप्ता सरस्वती। प्रयागः स तु विज्ञेयः सर्वपापप्रणाशनः॥

स साम्प्रतं प्रयागस्तु महाकालवनोत्तमे । केनापि कारणेनैव गतो न ज्ञायते मया ॥
इति तस्यवचः श्रुत्वानारदस्य महात्मनः । शक्रेण सहिताःसर्वे ह्यवन्तींतुसमागताः
स्तुवन्तो विविधैः स्तोत्रैर्गङ्गां त्रिपथगां शुभाम् ।
गङ्गे देवि! नमस्तुभ्यं सर्वपापप्रणाशिनि !॥ ६५ ॥
वसूनांजननी देवि! वसूनां मोक्षदायिनि !। त्रैलोक्यपावनीनित्यं हरेण शिरसाधृता
सेविता वालखिल्यैश्च कृष्णस्य परमा कला ।
यमुने! त्वां नमस्यामः कालिन्दीं वरवाहिनीम् ॥ ६७ ॥
सुता त्वं पाविनीदेवि! मार्त्तण्डस्यदिवस्पतेः । शिप्रेदेवि!नमस्तुभ्यंब्रह्मदेहोद्भवेशुभे
प्राची त्वमेव विख्याता पुण्यदेहा सरस्वती ।
या प्राची कौरवक्षेत्रे पुष्करे या महालये ॥
सा त्वं शिप्रा प्रसिद्धा च सर्वपातकनाशिनी ॥ ६६ ॥
त्वं दया सर्वजन्तूनां त्वं स्वर्गः शरणं नृणाम् ।
त्वं माता सर्वजन्तूनां त्वं प्राची भुवि गीयसे ॥ ७० ॥
बहुजन्मकलङ्काङ्कं दृष्ट्वायादेहिनांभुवि । करोषिक्षालनं देवि सात्वंत्रैलोक्यसंस्थिता
आसां च सङ्गमो यस्तु स प्रयागो बुधैः स्मृतः ।
अत्रागत्य तु युष्माभिः स्थापितः स्नापितोऽधुना ॥ ७२ ॥
सोऽद्यप्रभृति देवोऽयंप्रयागेश्वरसञ्ज्ञकः । त्रिषु लोकेषुविख्यातःस्मरणात्पापनाशनः
अत्रागत्य प्रपश्यन्ति येप्रयागेश्वरं ततः । तेकृतार्था भविष्यन्ति सर्वपातकवर्जिताः
कुलं च तारितं तेषां पैतृकं मातृकं तथा । गङ्गायास्त्रियुगं पुण्यं चतुर्वर्गफलप्रदम् ॥
जायते नात्र सन्देहः प्रयागेश्वरदर्शनात् ॥ ७५ ॥
गङ्गायां च प्रयागे च देवदारुवने शुभे । नैमिषे पुष्करे चैव श्रीशैले च त्रिपुष्करे ॥
त्र्यम्बके धौतपापेच महेन्द्रे भैरवे तथा । गोकर्णेच सुवर्णाख्ये रेवाकपिलसङ्गमे ॥
एतेषां दर्शनेनैव या सिद्धिर्द्वादशाब्दिका । सालभ्या मासमात्रेण प्रयागेश्वरदर्शनात्
येपश्यन्ति चतुर्दश्यामष्टम्यां च विशेषतः । भक्त्या च नियमंकृत्वाप्रयागेश्वरसञ्ज्ञकम्

न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि । भोगदं मोक्षदं लिङ्गं भविष्यति महीतले
कलास्तिस्रो भविष्यन्ति लिङ्गेऽस्मिन्मोक्षदे शुभे ।
गङ्गा च यमुना प्राची सर्वपातकनाशिनी ॥ ८१ ॥
एवमुक्त्वा स्तुता गङ्गा यमुना च सरस्वती ।
देवैः प्रणतिपूर्वेण गताः स्थानं स्वकं तदा ॥ ८२ ॥
देवाः प्रहृष्टाः शक्राद्याः प्रयागेश्वरसञ्ज्ञकम् ।
स्तुत्वा च विविधैः स्तोत्रैः पूजयित्वा दिवं गताः॥ ८३ ॥
एष ते कथितो देवि! प्रभावः पापनाशनः । प्रयागेश्वरदेवस्य चन्द्रादित्येश्वरं शृणु
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये उमामहेश्वरसम्वादे प्रयागेश्वरमाहात्म्य-
वर्णनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः

चन्द्रादित्येश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

द्विसप्ततीश्वरं विद्धि चन्द्रादित्येश्वरंप्रिये । यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत्
शम्बरेण पुरा देवि! निर्जिताः सङ्गरे सुराः । नग्रा रणं परित्यज्य प्राणत्राणपरायणाः
ग्रस्तं च राहुणा दृष्ट्वा शशाङ्कं भयविह्वलम् ।
विनतायाः सुतो ज्येष्ठः प्रोक्तः सूर्येण सारथिः ॥ ३ ॥
वहाऽरुण! रथं शीघ्रंयत्र युद्धं न विद्यते । श्रूयते चन्द्रसूर्यौ तौ दैत्यानां बलवत्तरौ
राहुर्दंष्ट्राकरालस्तु स तृतीयो भयङ्करः । न ज्ञायते रणे चन्द्रो मृतो नष्टोऽथवापुनः
स च न ज्ञायते शक्रः क गतो वरुणो रणे । यमो न ज्ञायते कुत्र धनदस्य च का कथा

एवमुक्तोऽरुणो रुणो रविणा रणमध्यतः । रथं सम्प्रेरयामास यत्र युद्धं न विद्यते॥

एतस्मिन्नन्तरे चन्द्रः समायातस्तु तत्क्षणात् ।

राहुग्रहगृहीतोऽपि यत्र देवो दिवस्पतिः ॥ ८ ॥

सन्त्रस्तः स विलोलाक्षःक्षणमात्रमचेतनः । बभूव सहसा चन्द्रोदृष्ट्वादेवं दिवाकरम्

शम्बरेण रणे रुद्धा रुद्राश्च भयविद्रुताः । जग्मुर्दिशो दश भयादसुरेन्द्रविभीषिताः॥

साध्याः सर्वे भयत्रस्ता गता यत्र न दानवाः । तेषु भग्नेषु देवेषु हतशिष्टेषु सङ्गरे॥

व्यधमत्सर्वगात्राणि वर्माणि च जनक्षये ।

पलायमानदेवानामसुरो बलवच्छरैः ॥ १२ ॥

पृष्ठतो निजघानाऽथ निकृत्ताश्च सहस्रशः । अहं नष्टश्छलेनैव व्यग्रीभूतेऽसुरे तदा

आसुरं रूपमास्थाय प्राणत्राणपरायणः । शीघ्रं च गम्यते तावद्यावन्नायाति शम्बरः

इत्युक्तं निशिनाथेन भयभीतेन पार्वति !। चन्द्रादित्यौ क्षणान्नीतावरुणेन रथेन वै ॥

यत्र देवो जगन्नाथो गरुडस्थो जनार्दनः । सुरसङ्घातसङ्केतकिन्नराकीर्णकन्दरे ॥

मन्दरे सुरनारीणां नन्दने वरचन्दने । दृष्ट्वा तत्र जगन्नाथं शङ्खचक्रगदाधरम् ॥

स्तुतिं तौ चक्रतुर्देवौ चन्द्रसूर्यौ यशस्विनि !॥ १७ ॥

नमो लोकत्रयाध्यक्ष! स्वप्रभाजितभास्कर !।

नमो विष्णो! नमो जिष्णो! नमस्ते कैटभान्तक !॥ १८ ॥

नमः सर्वक्रियाकर्त्रे जगत्त्रात्रे! च ते नमः । नमश्चक्रायुधाधृष्य! नमो दानवघातिने!

नमः क्रमत्रयाक्रान्तत्रैलोक्यान्तर्हितोद्भव । नमः प्रचण्डदैत्येन्द्रकुलकाल! महाबल !

नमो नाभिहृदोद्भूतपद्मगर्भमहाप्रभो !। जनिताशेषलोकेशविरिञ्चाय महाद्युते !॥२१॥

अमरारिविनाशाय महासमरशालिने । नमस्ते विबुधाधीश!शरणं भव नः प्रभो !॥

चन्द्रसूर्यकृतं स्तोत्रं श्रुत्वा देवो जनार्दनः ।

आश्वास्य स्तुतिपूर्वेण प्राह देवो ह्यधोक्षजः ॥ २३ ॥

विष्णुवाच

स्वागतं चन्द्रसूर्यौ भो भवन्तौ स्तुतिभाजनौ ।

किं कारणमिह प्राप्तौ तद्ब्रूतां विगतज्वरौ ॥ २४ ॥

नारायणेनैवमुक्तौप्रोचतुश्चन्द्रभास्करौ । समरे निर्जिता देवाः शम्बरेण दुरात्मना ॥

न ज्ञाताः क्व गतास्ते च आवां नष्टौ प्रयत्नतः ।

अरुणेन इहानीतौ दृष्टस्त्वं देव! दैवतः ॥ २६ ॥

शम्बरेण जिता देवाः स च सर्वत्र दृश्यते । स्थले चैव जले चैव शम्बरः क्रूरपौरुषः

नश्यतां त्रिदशेन्द्राणां पृष्ठतःशरवृष्टिभिः । चिच्छेदनरवर्माणिच्छत्राणिचधनूंषि च

वर्माणि च विचित्राणि मुकुटानि महान्ति च ।

पृथूनि चापि चापानि चर्माणि विविधानि च ॥ २९ ॥

गजाश्च मदसम्भिन्नकपोलाः कोटिशःसुराः । वाजिनश्चामरापीडा रत्नपर्याणभूषणाः

विबुधाध्वस्तसन्नाहा विगजा विपदातिनः । विपदामाकराकारा बभूवसुरवाहिनी

ततो दैत्याधिपो मानी परिवृत्तो महारणात् ।

निर्जितारिर्महातेजा ज्वालावानिव पावकः ॥ ३२ ॥

वन्द्यमानोमुनिगणैः स्तूयमानो महर्षिभिः । आनन्दितोजयाशीर्भिः प्रवरैर्दैत्यपुङ्गवैः

तत्र सर्वर्द्धिसम्पूर्णमासनं हेमभूषणम् । अध्यतिष्ठत दैत्येन्द्रस्तत्र मङ्गलवेश्मनि ॥

तत्रोपविष्टः शुशुभे दैत्यराजो महायशाः ॥ ३४ ॥

दिव्यचन्दनपुष्टाङ्गः सुरपुष्पसमुज्ज्वलः । मुकुटाकारजुष्टाङ्गः सितचामरवीजितः ॥

मूर्तोत्थितैस्तथा दैत्यैर्दैत्यार्धीशैरधिष्ठितः ॥ ३५ ॥

ऋतुभिर्मूर्त्तिमद्भिश्च सेव्यमानो महाबलः । सर्वपुष्पोत्करयुतैर्नानाविहगनादिभिः ॥

तत्र श्रीरतुलालोके तत्र लक्ष्मीर्निरर्गला । तत्र कान्तिर्द्युतिःशोभा शम्बरोयत्रदानवः

एवंसदैत्यनृपतिःसभृत्यस्तत्र मोदते । स्वयमिन्द्रस्तु सञ्जातश्चन्द्रसूर्यौ कृतौस्वकौ

तयोरिति वचः श्रुत्वा स देवः पुरुषोत्तमः ।

चिरं ध्यात्वा स्वमनसि तदाऽवोचदिदं प्रिये !॥ ३९ ॥

चन्द्रसूर्यौ मया ज्ञातं शम्बरस्य विचेष्टितम् ।

ब्रह्मणो वरदानेन भोक्तव्यं तपसः फलम् ॥ ४० ॥

शम्बराय पुरा क्षिप्तं वज्रं कुलिशपाणिना । हृदये निहतःसोऽपि तथापिनमृतोऽसुरः
गम्यतां च मयाज्ञप्तौ महाकालवनोत्तमे । चन्द्रसूर्यौममादेशात्तत्रसिद्धिश्चलप्स्यथः

तत्राऽनन्तो महाकालो लिङ्गरूपो महेश्वरः ।
तस्य चोत्तरतो देशे लिङ्गं कामप्रदं शिवम ॥ ४३ ॥

तस्य दर्शनमात्रेण कृतकृत्यौ भविष्यथः । तस्य ज्वालासमूहेन मरणं शम्बरस्य च

भविष्यति न सन्देहस्तस्मात्तत्रैव गम्यताम् ॥ ४४ ॥
इत्युक्तौ वासुदेवेन चन्द्रसूर्यौ यशस्विनि !।
सत्वरं हृष्टरोमाणौ महाकालवनं गतौ ॥ ४५ ॥

तत्र दृष्ट्वा महादेवं तेजसो राशिमव्ययम् । स्तुतंत्रविविधैः स्तोत्रैःपूजितंकुसुमैःशुभैः

एतस्मिन्नन्तरे वाणी लिङ्गमध्यात्समुत्थिता ।
आश्वासयन्ती तमसाचन्द्रसूर्यौ हिमात्मजे !॥ ४७ ॥
हतः स शम्बरो दैत्यो गतौ तौ चन्द्रभास्करौ ।
दैत्यानां निर्मितौ दुष्टौ पातालान्तरसंस्थितौ ॥ ४८ ॥

राहुकेतू ग्रहान्ते तु कृतौ समयपूर्वकौ । स्थापितः स्वपदे शक्रो देवैःसह न संशयः

स्वं स्वं स्थानं गताः सर्वे लोकपाला मुदा युताः ।
कान्तिप्रतापसंयुक्तौ भवन्तौ भुवनत्रये ॥ ५० ॥

गगने ग्रहनक्षत्रैः सहितौ विचरिष्यथः । पूर्ववत्पुण्यपापानां साक्षिभूतौभविष्यथः

इत्युक्तौ चन्द्रसूर्यौ तु तया वाण्या वरानने !।
सन्तुष्टौ कृतकृत्यौ तु सञ्जातौ लिङ्गदर्शनात ॥ ५२ ॥

एतस्मिन्नन्तरे देवाः विमानस्थाः समागताः । यत्रचन्द्रश्च सूर्यश्च महाकालवनेशुभौ

ज्ञात्वालिङ्गस्य माहात्म्यं नाम चक्रुः समाहिताः ।
सेवितं चन्द्रसूर्याभ्यां लिङ्गं तेजोमयं परम ॥ ५४ ॥
चन्द्रादित्येश्वरं नाम ख्याति यास्यति भूतले ।
लिङ्गस्यास्य समुत्थेन ज्वालासङ्घेन शम्बरः ॥

दग्धो भृत्यजनैः सार्द्धं चन्द्रसूर्यानुसेवनात् ॥ ५५ ॥
इत्युक्त्वा त्रिदशाः सर्वे समीपे सर्वतःस्थिताः ।
स्तुवन्तो विविधैः स्तोत्रैश्चन्द्रादित्येश्वरं शिवम् ॥ ५६ ॥
चन्द्रादित्यौ च तत्रस्थौ स्थितौ लिङ्गसमीपतः ।
आराधयन्तौ देवेशं पदम्प्राप्तौ च पूर्ववत् ॥ ५७ ॥
ये पश्यन्ति नरा भक्त्या चन्द्रादित्येश्वरं शिवम् ।
ते यान्ति सूर्यलोकं तु चन्द्रलोकं तथैव च ॥ ५८ ॥

विमानैःसूर्यसङ्काशैस्तथाचन्द्रप्रभैः शुभैः । यावच्चन्द्रश्च सूर्यश्च तावत्तेषां सुखम्भवेत्

चन्द्रसूर्यपरागे तु चन्द्रादित्येश्वरं शिवम् ।
ये पश्यन्ति नरा भक्त्या स्नात्वा शिप्राञ्च पावनीम् ॥ ६० ॥

तेषांकुलशतं यावत्पैतृकं मातृकं तथा । लोके चन्द्रस्यसूर्यस्य मोदतेशाश्वतीःसमाः

अमासोमसमायोगे ये पश्यन्ति प्रसङ्गतः ।
चन्द्रादित्येश्वरंदेवं न ते यान्ति यमालयम् ॥ ६२ ॥

एष ते कथितोदेवि प्रभावःपापनाशनः । चन्द्रादित्येश्वरेशस्य श्रूयतां करभेश्वरम् ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये उमामहेश्वरसम्वादे चन्द्रादित्येश्वरमाहात्म्यवर्णनं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः

करभेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

त्रिसप्ततीश्वरं विद्धि करभेशं वरानने !। यस्य दर्शनमात्रेण कुयोनिर्नैव लभ्यते ॥१॥
वीरकेतुरभूद्धीमानयोध्याया महीपतिः । विद्याविनयसौभाग्यलावण्यामृतपूरितः
स सम्यक्पालयामास प्रजाःपुत्रानिवौरसान् । अतीतानागतज्ञानपरिनिष्ठितमानसः
अथैकस्मिन्दिने राजा जगाम गहनं वनम् । मृगसिंहगजाकीर्णंव्याघ्रसम्बरसङ्कुलम्
स तत्र विविधान्वन्यान्विव्याधपरवीरहा । मृगांश्च महिषांश्चैव वराहंश्च सहस्रशः
लोडितं तद्वनं सर्वं पशुपक्षिमृगाकुलम् । रहितं श्वापदैः सर्वैः कृतं तेन महीभृता ॥

यदा न श्वापदास्तस्मिन्दृश्यन्ते गहने वने ।
तदा विद्धस्तु करभो बाणेनाऽऽनतपर्वणा ॥ ७ ॥
स चापि करभो देवि! बाणमादाय सत्वरन् ।
विद्धोऽपि निःसृतोऽत्यर्थं राज्ञस्तस्यैव पश्यतः ।
स च राजा बली तूर्णं ससार करभम्प्रति ॥ ८ ॥

ततो निम्नस्थलञ्चैव स घोग्रोऽद्रवदाशुगः । मुहूर्त्तेनततोदेवि! योजनानिबहून्यपि॥
ततः स राजा तारुण्यादौरसेन बलेन च । ससार बाणासनधृक्सखड्गःसहयोनृपः
ततो नदान्नदीश्चैव पल्वलानि वनानि च । अतिक्रम्यानतिक्रम्य ससारैव वनेचरम्

स चापि करभो देवि! आसाद्यासाद्य तं नृपम् ।
पुनरप्येति जवनो जवेन महता ततः ॥ १२ ॥

स तस्य बाणैर्बहुभिः करभोविह्वलीकृतः । पृष्ठतःपार्श्वतश्चैव पुनरभ्येतिचान्तिकम्

पुनश्च जवमास्थाय पार्श्वे चाग्रे च दृश्यते ॥ १३ ॥
अथाऽरण्यं महारौद्रं प्रविष्टः करभस्तदा ।

अन्तर्धानं जगामाऽऽशु स च राजा वनेऽविशत् ॥ १४ ॥

प्रविश्यचमहारण्यंतापसानामथाश्रमम् । आससादततोराजाश्रान्ताश्वोपाविशत्पुनः
तं कामुककरं दृष्ट्वा श्रमार्त्तं क्षुधितंतदा । समभ्येत्यर्षयस्तस्मैपूजां चक्रुर्यथाविधि
सपूजामृषिभिर्दत्तांप्रतिगृह्ययथाविधि । अपृच्छत्तापसान्सर्वांस्तपसोवृद्धिमुत्तमाम्

ते तस्य राज्ञो वचनं प्रतिगृह्य तपोधनाः ।
ऋषयो राजशार्दूलं पप्रच्छुस्तत्प्रयोजनम् ॥ १८ ॥

केन भद्र! सुखार्थेन सम्प्राप्तोऽसितपोवनम् । पदातिर्बद्धनिस्त्रिंशोधन्वीबाणीनरेश्वर
एतदिच्छामहेश्रोतुंकुतःप्राप्तोऽसिमानद !। कस्मिन्कुलेचजातस्त्वंकिंनामाब्रूहिपार्थिव
ततः स राजासर्वेभ्योद्विजेभ्यः पुरुषर्षभः । आचख्यौतद्यथान्यायंकुलंगोत्रंचतत्त्वतः
इक्ष्वाकूणां कुले जातोवीरकेतुर्द्विजर्षभाः । चरामिमृगयूथानि निघ्नन्बाणैःसहस्रशः
बलेन महता युक्तः सामात्यःसपरिच्छदः । यदा नलब्धोगहने मृगो वासूकरोऽपिवा
महिषश्चित्तलो वापि शशो वा शम्बरोवने । तदामे करभो विद्धो बाणेनानतपर्वणा

स प्रणष्टः क्षणेनैव स बाणो मम पश्यतः ।
तं द्रवन्तमनुप्राप्तो वनमेतद्यदृच्छया ॥ २५ ॥

भवत्सकाशं नष्टश्रीर्हताशः श्रमकर्शितः । भवतां विदितं सर्वं सर्वज्ञा हि तपोधनाः

भवन्तः सुमहाभागास्तस्मात्पृच्छामि संशयम् ॥ २६ ॥

क्वगतःकरभोविद्धोमयाबाणेन साम्प्रतम् । क्वप्राप्स्यामिसहसाब्रूततत्सुसमाहिताः
ततस्तेषां समस्तानामृषीणामृषिसत्तमः । ऋषभोदेवि!करभं स्मरन्निदमथाब्रवीत्
गतः स करभो भूप!महाकालवने शुभे । गच्छ त्वं च महाराज! महाकालवने शुभे ॥

यत्र देवो महादेवः कारभं रूपमास्थितः ।
विनोदार्थं च देवानां लिङ्गमूर्त्तिरभूत्पुरा ॥ ३० ॥

पश्चिमे क्षेत्रपालस्यकैलासस्य महीपते । समीपे तस्य विघ्नेशोमोदकप्रियसञ्ज्ञकः
ब्रह्मणा पूजितो राजन्देवानामर्थसिद्धये । स च धर्मध्वजो राजा हैहयानां कुलोद्वहः

तुरगेण कदाचित्तु नीतो बदरिकाश्रमम् ।

प्रसिद्धं त्रिषु लोकेषु नरनारायणाश्रमम् ॥ ३३ ॥

तत्र वीराजिनधरं कृशं विप्रं ददर्श ह । शरीरमपि राजेन्द्र ! न केनापि समं तदा

दृष्ट्वा च हसितो विप्रस्तेन राज्ञा प्रमादतः ॥ ३४ ॥

यस्माद्धससि मां दृष्ट्वा तस्मादुष्ट्रो भविष्यसि ।

लम्बोष्ठो लम्बदन्तश्च विस्वरो विकृताकृतिः ॥ ३५ ॥

इत्युक्तस्तेन विप्रेणशप्तोऽपिनृपसत्तमः । तं विप्रं प्रार्थयामास स चतुष्टोऽब्रवीदिदम्

न मे वागनृताभूप! कदाचिदपिविद्यते । अवश्यंकरभोभूत्वापश्चान्मुक्तिमवाप्स्यसि

यदा त्वं करभो जातो विद्धो वै वीरकेतुना ।

अयोध्याधिपभूपेन गमिष्यसि शराहतः ॥ ३८ ॥

महाकालवनं दिव्यंतत्र त्वं लिङ्गदर्शनात् । गमिष्यसि परं स्थानंयत्रदेवो महेश्वरः

स चेक्ष्वाकुकुलोद्भूतो वीरकेतुर्महाबलः । लिङ्गदर्शनतो भूप!चक्रवर्तित्वमाप्स्यति

इत्युक्तो नृप! भूपालः करभत्वंसमागतः । स त्वयाऽभिहतो भूप! बाणेनानतपर्वणा

द्रक्ष्यसि त्वं विमानस्थं विमुक्तं लिङ्गदर्शनात ॥ ४१ ॥

इत्युक्तो नृपतिस्तेन ऋषभेण द्विजेन तु ।

आजगाम त्वरायुक्तो महाकालवनं शुभम् ॥ ४२ ॥

ददर्श तत्र तल्लिङ्गं पूजितं त्रिदशैः सदा । एतस्मिन्नन्तरे वाणी श्रुता तेन महीभृता॥

विमानस्थेन या प्रोक्तातूष्ट्रे ण मधुरस्वरा । भोभोराजेन्द्रमांपश्यविमानेचोद्धृतेशुभे

दर्शनादस्य लिङ्गस्य प्राप्ता मे परमागतिः । त्वयाहतोऽहं बाणेनतेनाऽहं त्वागतोवने

समीपमस्य लिङ्गस्य त्वं मे बन्धुः परो यतः ॥ ४५ ॥

इत्युक्त्वा सनृपं देविवचः समधुराक्षरम् । गतस्तु परमं स्थानं नित्यमव्ययमक्षयम्

ततो देवगणाव्योम्नि सकिन्नरमहोरगाः । यक्षराक्षसगन्धर्वाःसपिशाचाप्सरोगणाः

ब्रह्मेन्द्रहरिमुख्याश्च विमानैर्देवि ! संस्थिताः ।

आजग्मुर्मुदितास्तत्र द्रष्टुं कौतुकमानसाः ॥ ४८ ॥

विलोक्य करभं मुक्तं विमानस्थं विराजितम् ।

लिङ्गदर्शनमात्रेण संस्तुतं विविधैः स्तवैः ॥ ४९ ॥

अच्छरत्नसमूहेन मुकुटेनोज्ज्वलत्विषा । भासन्तं रविकोटीनां जगदानन्दकारकम्

नामचक्रुस्ततोदेवा दृष्ट्वा माहात्म्यमुत्तमम् । दर्शनादस्यलिङ्गस्यमुक्तोऽयंकरभोयतः

तस्मात्त्रिष्वपि लोकेषु विख्यातः करभेश्वरः ।

भविष्यति न सन्देहः पशुयोनिविमोचकः ॥ ५२ ॥

इत्युक्त्वा त्रिदशाः सर्वे गताः स्वं धिष्ण्यमुत्तमम् ।

अयोध्याधिपतिर्वीरो वीरकेतुः स्वमालयम् ।

समृद्धं निःसपत्नं च ततो राज्यं चकार सः ॥ ५३ ॥

यः पश्यतिनरोदेवि! करभेश्वरसञ्ज्ञकम् । सप्रयात्यक्षयाँल्लोकान्पूज्यमानोगणाधिपैः

यदा कालादिहायातो राजराजेश्वरो महान् ।

पृथिव्यामेकराड् भूत्वा क्रमान्मोक्षमवाप्नुयात् ॥ ५५ ॥

नदुःखं जायतेतस्य व्याधिशोकभयं तथा । ये पश्यन्ति प्रसङ्गेन तल्लिङ्गं करभेश्वरम्

सर्वमेधेषु यत्पुण्यं सर्वदानेषु यत्फलम् । तत्फलं त्वधिकं देवि ! करभेश्वरदर्शनात्

व्याधयो नोपजायन्ते दारिद्र्यं न कदाचन । ऐश्वर्यंचातुलंतेषां जायते दर्शनात्सदा

पशुयोनिगता ये च पितरो(दुःखितास्तु ये ।

तिष्ठन्ति चाम्बरे ते तु चिन्तयन्तः स्वगोत्रजम् ॥ ५९ ॥

आगमिष्यति नः पुत्रोनस्तावासन्ततताविह । कदा पश्यति देवेशं करभेश्वरमीश्वरम् ॥

तेन दर्शनमात्रेण मुक्तिर्नो भविता ध्रुवम् ॥ ६० ॥

यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति ।

तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ ६१ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । करभेशस्य देवस्य शृणुराजस्थलेश्वरम्

इतिश्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसम्वादे करभेश्वरमाहात्म्य-

वर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः

राजस्थलेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

चतुःसप्ततिकं विद्धि शिवं राजस्थलेश्वरम् । यस्यदर्शनमात्रेण सर्वपापैःप्रमुच्यते
विष्णुकल्पे पुरा वृत्ते मन्वन्तरमुखप्रिये । अराजके महीपृष्ठे ब्रह्मा चिन्तापरोऽभवत्
न मनुष्यैर्विना देवाः समर्था लोकधारणे । दानेज्यजपतो देवा भजन्तेपुष्टिमुत्तमाम्
योग्यो राजा प्रजापालः को भवेज्जनवत्सलः ।
सोऽपश्यदथ राजर्षिस्तपस्यन्तं रिपुञ्जयम् ॥ ४ ॥
पृथ्व्यां सर्वगुणाकीर्णं धर्मनिष्ठं महाव्रतम् ।
तमुवाचाऽथ देवेशो ब्रह्मा लोकपितामहः ॥ ५ ॥

ब्रह्मोवाच

रिपुञ्जय! निबोधेदं वचनं मम पुत्रक !। राज्यं च पालयतां वत्स! एककल्पेन चेतसा
अलं ते तपसा तात! कष्टेनानेन साम्प्रतम् । धर्मेण विजिताःसर्वेत्वया लोकानरोत्तम
क्रियतामधुना लोकपालनं तु ममाज्ञया । यतः परोपकारोहि फलं देहस्य देहिनः ॥
न धर्मस्तादृशोऽन्योऽस्ति न चान्योऽर्थस्य साधकः ।
निरयात्तिरपि श्रेय उपकृत्य परस्य वै ॥ ६ ॥
नाऽपकारेण भूतानामपि स्याद्भुवनेशता । सततं लोककार्यार्थं मदाज्ञागौरवेण च
पृथ्वीं समुद्रवसनां प्रजाश्चैव प्रपालय ॥ १० ॥
इत्युक्तः स तु राजर्षिर्ब्रह्मणा पर्वतात्मजे !। प्रोवाच प्राञ्जलिर्भूत्वाब्रह्माणंतुरिपुञ्जयः
स्वभावेनाचला पृथ्वीत्वयापूर्वंविनिर्मिता । विनैवपालकं ह्येषाकुत्रयास्यतिमेदिनी
यद्यवश्यं मया पृथ्वीपालनीया पितामह !। देहि मे नगरीं रम्यामवन्तींसप्तकल्पगाम्
मनुष्यलोके विख्याता सकले साऽमरावती ।

स्वर्गच्युतानां देवानां निवासार्थं प्रतिष्ठिता ॥ १४ ॥
मर्यादामनुवर्त्तेयुर्यदि मे नाकवासिनः । अदत्ते चमया स्थाने न वासःकस्यचिद्भवेत्
अनेन विधिना पृथ्वीं पालयिष्याम्यहं प्रभो !॥ १५ ॥

ब्रह्मोवाच

भविष्यत्येष तेकामोयस्त्वयोक्तो नरोत्तम !। येकेचित्त्रिदशाः सन्तिमद्गौरववशेनते
तवादेशं करिष्यन्ति सदा त्वद्वशवर्त्तिनः ॥ १६ ॥
देवनाथेतिवै नाम भविष्यति चसुव्रत । इत्युक्त्वान्तर्दधे ब्रह्मा हंसयानंसमास्थितः
अथ राजा प्रतिज्ञाय ब्रह्मणा भूमिपालनम् ।
पृथ्व्यामुद्घोषयामास प्रोवाच त्रिदिवौकसाम् ॥ १८ ॥
भवतांविहितः स्वर्गो मनुजानांचभूतलम् । येचात्र कन्दररताः स्थले वाभूधरेषु च
येस्थितायान्तुतेदेवामनुजानामियंधरा । तच्छ्रुत्वाघोषितं तस्यराज्ञोभयनिपीडिताः
त्रिदशा ब्रह्मणो वाक्याद्गौरवात्त्रिदिवंगताः ॥ २० ॥
अथ प्रजाः स नृपतिर्धर्मेणावर्धयत्तदा । पुत्रवत्स्नेहयुक्तेन हृदयेनातिनिर्वृताः ॥ २१
प्रजास्ततसुखसम्वृद्धा जरामृत्युविवर्जिताः ।
पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ॥ २२ ॥
यौवनस्थाश्च निर्द्वन्द्वाः सततं धर्मसंश्रयाः ।
नासीत्पृथिव्यां शैलस्तु स्थलो वा द्वीप एव च ॥ २३ ॥
अकृष्टपच्यापृथिवीस्वादवद्भिःफलैर्युता । देवलोक इवासीद्भूःसर्वकामगुणोज्ज्वला
एवं व्रजति काले वै राज्ञि राज्यं प्रकुर्वति । महामर्षपरादेवाविप्रकार्यार्थमुद्यताः ॥२५
प्रजानां बहुदुःखानि मुहुः कुर्वन्त्यनेकशः । अथानावृष्टिमकरोत्सुदीर्घांपाकशासनः
तथा संह्रियमाणेषु लोकेषु नृपसत्तमः । मेघो भूत्वा दिवं प्राप्य सुवृष्टिमकरोन्नृपः ॥
तेनैवाऽऽप्यायितो लोकः सुखी जातो यशस्विनि !।
ततः काले तु कस्मिंश्चिद्वर्षत्पाकशासनः ॥
सम्वर्त्तो वारिदो भूत्वा मेघान्वै विन्यपातयत् ॥ २८ ॥

ततस्तुमारुतोभूत्वानृपतिस्तामधारयत् । ततोऽनलःप्रनष्टोऽभूत्सर्वतःपृथिवीतलात्
नयज्ञान जपोहोमो नचपक्तिरवर्त्तत । लोकश्च व्याधिसङ्क्षुब्धस्तदाभूद्विषमेस्थितः
ततःस राजातं दृष्ट्वा त्वभवद्धव्यवाहनः । सोऽधारयत्प्रजाः सर्वायज्ञांश्चत्रिदिवौकसः
एतस्मिन्नन्तरे देवि! त्वया सार्द्धंसमागतः । दर्शनार्थं स्वनगरीमहं भूतगणैर्वृतः ॥
ततो देवगणाः सर्वे सकिन्नरमहोरगाः । सयक्षरक्षोगन्धर्वाः सिद्धविद्याधरोरगाः ॥
भूताः प्रेताःपिशाचाश्चयेचान्ये गगनेचराः । चत्वारःसागराश्चैवक्षारक्षीरादिसिन्धवः
गङ्गा च यमुना सिंधुश्चन्द्रभागा सरस्वती । चर्मण्वतीभीमरथी पुण्यागोदावरीनदी

विपाशा देविका पुण्या शरयूः कौशिकी तथा ।
गोमती धूतपापा च बाहुदा च दृषद्वती ॥ ३६ ॥

पारावेदस्मृतिश्चैववेत्रघ्नीनर्मदाशिवा । तापीपयोष्णीनिर्विन्ध्यासर्वास्तत्रसमागताः
पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा । पृथुतीर्थोदकश्चैव तथैवाऽमरकण्टकः ३८
गङ्गाद्वारः कुशावर्त्तो बिल्वको नीलपर्वतः । वाराहपर्वतश्चैव तीर्थं कनखलं तथा ॥
भृगुतुङ्गः सुकुक्षश्चाप्यजगन्धश्च पार्वति !। कालिञ्जरः सकेदारो रुद्रकोटिर्महालयः ॥
स्थानानिचसमस्तानि पुण्यान्यायतनानि च । मेरुर्महेन्द्रो मलयोमन्दरोगन्धमादनः
मुनयो वालखिल्याश्च वेदाश्चत्वार एवच । एते चान्ये च बहवः समायाता मया सह

अनन्तरं मया मेरुः स्थलाकारः कृतस्ततः ।
तस्मिन्स्थले स्थितो देवि! उपविष्टः सुरैर्वृतः ॥
नियुक्ताः सागराः पार्श्वे चत्वारो लवणादयः ॥ ४३ ॥

अथव्याकुलतांप्राप्तः सचराजारिपुञ्जयः । स्वस्थलस्थंच मांदृष्ट्वासमायातस्तुमांप्रति

तेजसा दह्यमानोऽपि मदीयेन वरानने !।
भीतोऽपि तोषयामास कोऽसि देव !नमोऽस्तु ते ॥ ४५ ॥

स्थलेऽस्मिन्नृपराजाहंमयाप्युक्तंविनोदतः । चतुर्भर्गश्चतुर्मूर्त्तिश्चतुर्द्धासंस्थितोनृपः
तेनाहं सर्वतो दृष्टो वाङ्मये सचराचरे । अनन्तरं स्तुतस्तेन भक्त्या परमयाप्रिये
प्रभावमतुलं दृष्ट्वा मदीयं व्यापकं परम् । भक्त्या परमया देवि! स च मां शरणंगतः

भूयः स्तुतोऽपि तेनाऽहं तुष्टो वै तस्य भूपतेः ।
तेनोक्तं यदि मे देव! तुष्टस्त्वं परमेश्वर !॥ ४६ ॥

भक्तिर्मे सुदृढाभूयात्त्वयि सर्वेश! शाश्वती । तुष्टोऽहं तेन वाक्येनपुनः प्रोक्तोमयानृप

एवं भविष्यतीत्युक्त्वा पुनर्मां ब्रूहि पार्थिव !।
हृदि स्थितश्च ते कामःसर्वकालं भविष्यति ॥ ५१ ॥

अधृष्यः सर्वदेवानांसर्वदा सम्भविष्यसि । तेनाऽहं प्रार्थितो देविभूयोवरमनुत्तमम्
अतीव राजते देव स्थलोऽयं तव सन्निधौ । मेरुरेष न सन्देहो वल्लभः सर्वदा तव
राजस्थलेश्वरोऽसि त्वंविख्यातोभुवनत्रये । भविष्यसियथा देवतथात्वंकर्तुमर्हसि
अत्रागत्य च यो देवभक्त्यापरमया युतः । यात्रां करोतिभावेनपुराणोक्तविधानतः

तस्य त्वया प्रदातव्यं सर्वं मनसि चिन्तितम् ।
अणिमादिगुणाः सर्वे गुटिकासिद्धिरञ्जनम् ॥ ५६ ॥
खड्गं च पादुकां चैव जलवासं रसायनम् ।
राजस्थलेश्वरं यस्तु भक्त्या पश्यति मानवः ॥ ५७ ॥

दशम्यां तु विशेषेण कृत्वानियमपूर्वकम् । देवानामपि देवत्वं सम्प्राप्नोति महेश्वरः
पूजनीयस्तु त्रिदिवैर्यथा देवः पुरन्दरः । दृष्ट्वा राजस्थले देवं योऽत्रयात्रांकरिष्यति
तस्य श्रीर्विजयश्चैवभवत्येव वरोमम । शत्रवः सङ्क्षयं यान्तु सम्पद्यन्तां मनोरथाः
वृद्धिर्भवतु वंशे च दर्शनात्तव शङ्कर !। सर्वेऽत्र देवास्तिष्ठन्तु मेरुरत्रैवतिष्ठतु

तिष्ठन्तु सागराः सर्वे तव देव! समीपतः ॥ ६१ ॥

इत्युक्तोऽहं तदा तेन मया चोक्तं वरानने !। सुद्युम्नोनामभूपालोयदात्रैवागमिष्यति

पुत्रार्थं भार्यया सार्द्धं तदा दास्यामि वाञ्छितम् ।
तदा समुद्राश्चत्वारः स्थास्यन्ति सफलाः स्वयम् ॥ ६३ ॥

तस्याराधनतो भूप!पुत्रंदास्यामिशोभनम् । येचात्रमानवाराजन्यात्रांकुर्वन्तिभक्तितः

तेषां मनोरथावाप्तिर्भविष्यति न संशयः ॥ ६४ ॥
राजा रिपुञ्जयो भक्त्या गणाधीशः कृतो मया ॥ ६५ ॥

एष ते कथितो देवि प्रभावः पापनाशनः। राजस्थलेश्वरेशस्य श्रूयतां वडलेश्वरम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये राजस्थलेश्वरमाहात्म्यवर्णनंनाम
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः

वडलेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

पञ्चसप्ततिकं देवं वडलेश्वरसञ्ज्ञकम्। विद्धि पापहरं देवि! दर्शनात्कामदं नृणाम् ॥
धनदस्य सखा देवि! मणिभद्रो बभूवह। ईर्ष्याप्रभावस्तत्पुत्रो वडलोनाम कोपनः
रूपवान्सर्वदा कामी सदा मत्तो बलाधिकः।
कदाचित्स गतो रम्यां नलिनीं धनदस्य च ॥ ३ ॥
रत्यर्थं कामसेवार्थं गुप्तां रहसि निर्मिताम्। ददर्श कुसुमैश्छन्नां वज्रवैडूर्यभूषिताम्
तां वै विद्रुमसंछन्नांमुक्तादामविराजिताम्।
सुरम्यां विपुलच्छायां स्वर्णपङ्कजशोभिताम् ॥ ५ ॥
कुबेरभवनाभ्याशे वल्लभां धनदस्य च। आक्रीडं राजराजस्य कुबेरस्य महात्मनः॥
राक्षसैः किन्नरैश्चैव गुप्तां खड्गधरैः सदा। तां दृष्ट्वा परमप्रीतो बभूव वडलस्तदा
प्रियया सहितो रेमे स्थाने गुप्ते मनोहरे। रेमे रमणकैर्योगैरनङ्गेन वशीकृतः॥
तत्र गुप्ता रणे शूरा राक्षसा रणकोविदाः। रक्षन्ति शतसाहस्रं सर्वायुधपरिच्छदाः
ते तु दृष्ट्वैव वडलं मणिभद्रसुतं प्रिये!। भक्ष्यैः सम्पूरितमुखं दिव्यचन्दनभूषितम्
केतकीगर्भपत्राभैर्दन्तैर्दिव्यतराननम्। युद्धार्थे बद्धनिस्त्रिंशशक्तियुक्तमरिन्दमम्॥
भार्यासहायमुन्मत्तं पर्यङ्के च स्थितं सदा।

रत्यर्थमागतं ज्ञात्वा अन्योन्यमभिचुक्रुशुः ॥ १२ ॥
मा वीरानेनमार्गेण सभार्यो गन्तुमर्हसि। आक्रीडोऽयं कुबेरस्य धनदस्य महात्मनः
देवा देवर्षयो यक्षा गन्धर्वाः किन्नरास्तथा। आमन्त्र्य यक्षप्रवरं विहरन्तिरमन्तिच
नेह शक्यं विनादेशाद्विहर्तुं क्रीडितुं चिरम्। भ्रात्रामात्येन सुहृदा केनापिचसुतेनच
येनकेनचिदन्यायादवमन्य धनेश्वरम्। विहारः क्रियते दर्पात्स विनश्येदसंशयम् ॥
एवं स राक्षसैर्घोरैर्वडलो विनिवारितः। मामैवमिति सक्रोधंभर्त्सयद्भिः समन्ततः
कदर्थीकृत्य तु स तान्राक्षसान्भीमविक्रमः। व्यगाहत महातेजास्ते सर्वेतंन्यवारयन्
गृह्णीत बध्नीत निकृन्ततैनं पिबाम खादाम च वृत्तहीनम्।
क्रुद्धा ब्रुवन्तो ह्यपतन्द्रुतं ते शस्त्राणि चोद्यम्य विवृत्तनेत्राः ॥ १९ ॥
ततः स गुर्वीं यमदण्डकल्पां महागदां काञ्चनपट्टनद्धाम्।
प्रगृह्य तामभ्यपतत्तरस्वी ततोऽब्रवीत्तिष्ठत तिष्ठतेति ॥ २० ॥
ते तस्य वीर्यं च बलं च दृष्ट्वा विद्याबलं बाहुबलं तथैव।
न शक्नुवन्तः सहितुं समेता हताः प्रवीराः सहसा निवृत्ताः ॥ २१ ॥
विदार्यमाणास्तत एव तूर्णमाकाशमास्थाय विमूढसञ्ज्ञाः।
कैलासश्रृङ्गाण्यभिदुद्रुवुस्ते यक्षार्दिता रक्षपालाः प्रभग्नाः ॥ २२ ॥
स शक्रवद्दानवदैत्यसङ्घान्विक्रम्य जित्वा मदनाभितप्तः।
विगाह्य तां पुष्करिणीं समर्थः कामं स चिक्रीडति यक्षपुत्रः ॥ २३ ॥
ततस्तु ते रक्षपालाः समेत्य धनेश्वरं वै वडलेन नुन्नाः।
यक्षस्य धैर्यं सुबलं च सङ्ख्ये यथावदाचख्युरतीव भीताः ॥ २४ ॥
तेषां तु वचनं श्रुत्वा मणिभद्रो महायशाः। शशाप पुत्रं दयितं वडलं प्रभुकारणात्
यस्मात्सा नलिनी रम्या सेविता वडलेन तु।
दयिता धनदस्यापि यथा माता तथैव सा ॥ २६ ॥
तस्मात्पुत्रोमदीयस्तुसर्वभोगविवर्जितः।पङ्ग्वन्धोबधिरोदीनःक्षयरोगमवाप्स्यति
इतिशप्तस्तदाजातोवडलोभोगवर्जितः। पतितोभूतलेचैवतस्मिन्स्थानेगतोऽपिसन्

पीडितः क्षयरोगेण न शशाक विचेष्टितुम् ।
अन्धोऽथ बधिरो जातो गुरुशापहतस्तदा ॥ २९ ॥
चिन्तयामास सहसा शापमत्यद्भुतं महत् । शप्तोऽहं केनसहसा जीवन्योन्यन्तरङ्गतः
कथं शप्तोऽस्मि तातेन मणिभद्रेण वल्लभः । पुत्रो युवा च शूरश्च शत्रुपक्षक्षयंकरः
धन्योऽसौ मणिभद्रोऽपि मत्तातो येन भूतले ।
प्रभुभक्त्या निजः पुत्रः शप्तस्त्यक्तश्च तत्क्षणात् ॥ ३२ ॥
वडलेन पुनः प्रोक्तं धन्योऽहं प्रभुकारणात् ।
उत्सवो निधनं नाम भर्तृपिण्डोपजीविनाम् ॥ ३३ ॥
अन्यायेन यथाकामं प्रारब्धःसञ्चितश्चिरम् ।
तेनाहं शापतां प्राप्तो यास्यामि नरकं ध्रुवम् ॥ ३४ ॥
एवं विलपतस्तस्य वडलस्य वरानने !। आजगामतमुद्देशं मणिभद्रो महाबलः ॥
ददर्श पुत्रं पङ्ग्वन्धं क्षयरोगप्रपीडितम् ॥ ३५ ॥
निःश्वसन्तंसुदुःखार्त्तविलपन्तंपुनःपुनः । प्रत्युवाचसुतंयक्षो मणिभद्रोऽतिदुःखितः
मया कुपित्रा हा वत्स! शप्तस्त्वं प्रभुकारणात् ॥ ३६ ॥
त्वयेयं नलिनी रम्या धनदस्यातिवल्लभा । सेविता कामतस्तेन प्रवरा राक्षता हताः
तस्मात्पुत्रमयाशप्तो न मिथ्यासभविष्यति । प्रभुर्देवःप्रभुःस्वामीप्रभुर्मातापभुःपिता
स्वाम्यर्थे यः प्रियान्प्राणान्परित्यजति सङ्गरे ।
स याति परमं स्थानं ब्रह्मलोकं सनातनम् ॥ ३९ ॥
न मन्त्रसाध्यः शापोऽयं नौषधेनव्रतेन च । नियमेन च दानेन तस्मान्मद्वचनं कुरु ॥
मया श्रुतं शक्रलोके पुराणं स्कन्दकीर्त्तितम् । ब्रुवतो नारदस्यैवदेवानांसन्निधौपुरा
प्रभावोवर्णितस्तेन महाकालवनस्य च । क्षेत्रे ह्यस्मिन्महालिङ्गं स्वर्गद्वारस्यदक्षिणे
विद्यतेव्याधिशमनंरूपसौभाग्यदायकम् । तत्राहंत्वांच नेष्यामिविमानेनाशुगामिना
इत्युक्त्वा मणिभद्रेण समानीतः सुतस्तदा ।
यत्र देवाधिदेवोऽसौ स्वर्गद्वारस्य दक्षिणे ॥ ४४ ॥

स्पर्शनात्तस्य लिङ्गस्य चक्षुष्मान्रूपवान्बली । सुपादःश्रुतिसंयुक्तस्तत्क्षणादभवत्तदा
दृष्ट्वा सुमहदाश्चर्यं मणिभद्रेण पार्वति !। कृतं नाम सुहृष्टेन स्वीयपुत्रस्य नामतः ॥
चक्षुष्मान्वडलो जातो लिङ्गस्याऽस्य प्रभावतः ॥ ४६ ॥
अद्यप्रभृति देवोऽयं वडलेश्वरसञ्ज्ञकः । भविष्यति त्रिलोकेषु विख्यातोनेत्रदायकः
पूजयिष्यन्तियेदेवं वडलेश्वरसञ्ज्ञकम् । लिङ्गंलोकेषु विख्यातंतेप्राप्स्यन्तिमनोरथम्
दृष्टो हरति पापानि स्पृष्टो राज्यं प्रयच्छति ।
अर्चितो भक्तिभावेन मोक्षं दद्यान्न संशयः ॥ ४९ ॥
कार्त्तिके शुक्लपक्षस्य तिथिर्वै द्वादशी भवेत् ।
तस्यां ये पूजयिष्यन्ति वडलेश्वरसञ्ज्ञकम् ॥ ५० ॥
दानं तैः सततं दत्तं ते यान्ति परमं पदम् । प्रयागे च प्रभासे च गङ्गासागरसङ्गमे ॥
तपस्तप्तंभवेत्तैस्तु ते मुक्तानात्र संशयः । गर्भवासे न जायन्तेसर्वसौख्य समन्विताः
गाणपत्याभविष्यन्तिशङ्करस्यसदाप्रियाः । सौभाग्यरूपसम्पन्नाःपुत्रपौत्रैश्चसंयुताः
जायन्ते मानवा लोके वडलेश्वरदर्शनात् ॥ ५३ ॥
गर्भवासेमहाकष्टे यस्य वासो न रोचते । सोऽभ्यर्चयतु भावेन वडलेश्वरमीश्वरम्
न लिङ्गेन विना सिद्धिर्दुर्लभं परमम्पदम् ।
गतिर्न जायते स्वर्गे यावल्लिङ्गं तु नार्चयेत् ॥ ५५ ॥
लिङ्गार्चनविहीनानां सिद्धिश्चापिसुदुर्लभा । ममपुत्रेणसम्प्राप्तमीप्सितंलिङ्गतोयतः
इत्युक्त्वामणिभद्रोऽपि सुतेन सहितोययौ । यत्र देवोधनाध्यक्षःस्थानंस्वंपरमंगतः
एष ते कथितो देवि! प्रभावः पापनाशनः ।
वडलेश्वरदेवस्य श्रूयतामरुणेश्वरम् ॥ ५८ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्ये उमामहेश्वरसम्वादे वडलेश्वरमाहात्म्यवर्णनं
नामपञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः

अरुणेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

षट्सप्ततितमं देवमरुणेश्वरसञ्ज्ञकम् । विद्धि पापहरं देवि! दर्शनात्कामदं नृणाम्
पुरा देवयुगे देवि! प्रजापतिसुते शुभे । आस्तां भगिन्यौ रूपेण समुपेतेऽद्भुतेऽनघे ॥
ते भार्ये कश्यपस्याऽऽस्तां कद्रूश्च विनता तथा ।
प्रादात्ताभ्यां वरं प्रीतः प्रजापतिसमः पतिः ॥ ३ ॥
कश्यपो धर्मपत्नीभ्यां मुदा परमया युतः । वरातिसर्गं श्रुत्वैव कश्यपादुत्तमं तु ते
हर्षादभ्यधिकांप्रीतिं प्रापतुःस्मवरस्त्रियौ । वव्रे कद्रूः सुतान्नागान्सहस्रंतुल्यवर्चसः
द्वौ पुत्रौ विनतावव्रे कद्रूपुत्राधिकौबले । ओजसातेजसाचैव विक्रमेणाधिकौवतौ
तस्यै भर्त्ता वरं प्रादाल्लप्स्यसे पुत्रकोत्तमौ ।
एवमस्त्विति तां चाह कश्यपो विनतां तदा ॥ ७ ॥
यथा च प्रार्थितं लब्ध्वा वरं तुष्टाऽभवत्तदा ।
कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ॥ ८ ॥
कद्रूश्च लब्ध्वा पुत्राणां सहस्रं तुल्यतेजसाम् ।
धार्यौ गर्भौ प्रयत्नेन इत्युक्त्वा स महातपाः ॥ ९ ॥
ते भार्ये वरसंहृष्टे कश्यपो वनमाविशत् । कालेन महता कद्रूर्नागानां सा शतीर्दश ॥
जनयामास चार्वङ्गी द्वे चाण्डे विनता तदा ॥ १० ॥
तयोरण्डानि निदधुः प्रहृष्टाः परिचारिकाः । सोपस्वेदेषु भाण्डेषु पञ्चवर्षशतानिच
ततः पञ्चशते काले कद्रूपुत्रा विनिर्गताः ।
अण्डाभ्यां विनितायास्तु मिथुनं न व्यदृश्यत ॥ १२ ॥
ततः पुत्रार्थिनी देवी व्रीडिता सा तपस्विनी ।

अण्डं बिभेद विनता तत्र पुत्रं ददर्श ह ॥ १३ ॥
पूर्वार्द्धकायसम्पन्नमितरेणाप्रकाशितम् । स पुत्रो रोषसंरब्धःशशापैनामितिश्रुतम्
योऽहमेवं कृतो मातस्त्वया लोभपरीतया । शरीरेणासमग्रेण तस्माद्दासीभविष्यसि
पञ्चवर्षशतान्यस्या यया विस्पर्द्धसेसदा । एष तेचसुतोमातर्दास्याद्वैमोक्षयिष्यति
यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात् ।
न करिष्यस्यनङ्गं वा पुत्रं चाऽतितरस्विनम् ॥ १७ ॥
प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया ।
विशिष्टबलमीप्सन्त्या पञ्चवर्षशतान्यतः ॥ १८ ॥
एवंशप्त्वाततोदेवि! विनतां मातरंस्वकम् । अरुणो विललापाथबाष्पशोकपरिप्लुतः
हाहामया नृशंसेनमाता स्वजननास्वका । शप्ताविनापराधेन कथं यास्यामिसद्गतिम्
माता देहारणिः पुंसां माता दुःखसहा परा ॥ २० ॥
गर्भक्लेशोपरंदुःखंमाता जानातियाद्दृशम् । वात्सल्यंचाधिकं मातुर्दृश्यतेनतुपैतृकम्
गुरूणामेव सर्वेषां माता गुरुतरास्मृता । एकस्यापिसुतस्यैवन दृष्टानिष्कृतिःश्रुतौ
यदि पिण्डप्रदानं तुगयायां कुरुतेसुतः । गते पितरिपश्चत्वं माता पुत्रस्य निर्वृतिः
न च मातृविहीनस्य ममत्वं कुरुते पिता ॥ २३ ॥
विकलोमातृहीनस्तुपुत्रोहि प्रोच्यतेतदा । यदास वृद्धो भवति तदाभवतिदुःखितः
तदा शून्यं जगत्सर्वं यदा माता वियुज्यते ॥ २४ ॥
सोऽहं पापसमाचारो जातो मातृविहिंसकः ।
मरिष्यामि न सन्देहः साधयित्वा हुताशनम् ॥ २५ ॥
जातोऽहं विकलाङ्गस्तु प्राक्कृतेनैव कर्मणा ।
न माता कारणं यस्मात्स्वकीयं कर्म भुज्यते ॥ २६ ॥
एवंविलपतस्तस्य कश्यपस्य सुतस्यच । अरुणस्य विशालाक्षि!नारदः समुपागतः
दृष्ट्वाऽरुणं सुदुःखार्त्तं विलपन्तं पुनः पुनः । प्रत्युवाच प्रसन्नात्मा नारदः प्रहसन्निव
अरुणोऽयमहो रौति कश्यपस्यात्मसम्भवः ।

विनतायाः सुतो ज्येष्ठः सम्भूतस्तपसां निधिः ॥ २६ ॥
उत्पादितोऽयमल्पाहैरर्द्धकायो महाबलः । एनमाश्वासयिष्यामिविनतागर्भसम्भवम्
मोहेन विलपन्तं च श्रेयो मे भविता ध्रुवम् ॥ ३० ॥
इति सञ्चिन्त्य मनसिवाक्यैर्मध्वमृतोपमैः । प्रत्युवाचारुणं तत्र नारदो द्विजसत्तमः
तात कश्यपदायाद विनतागर्भसम्भव । तेजोराशे दुराधर्ष सन्तापं मा कृथा वृथा ॥
भाविनोऽर्था भवन्तीह दुःखस्यचसुखस्यच । यत्त्वयाविनता शप्तारहस्यंदेवनिर्मितम्
यदितेऽस्तिघृणाचित्तेशप्ताऽऽत्मजननीत्वया । तदागच्छममादेशान्महाकालवनंशुभम्
उत्तरे देवदेवस्य यात्रेशस्य च पुण्यदम् । विद्यते त्रिदशैः पूज्यं सर्वदासर्वदंशिवम्
अरुणस्त्वेवमुक्तस्तु नारदेन महात्मना । आजगाम क्षणार्द्धेन महाकालवनं शुभम् ॥
ददर्श तत्र तल्लिङ्गं तेजःकूटोपमं शुभम् । पूजयामास विधिवत्पुष्पैर्भावसमन्वितः
लिङ्गेनोक्तोऽरुणो देवि! सारथ्यं कुरु सर्वदा ।
सूर्यस्य भ्रमतस्तस्य त्वत्तुल्यो नास्ति सारथिः ॥ ३८ ॥
मयादत्तं तुसामर्थ्यं सूर्यस्यपुरतः सदा । उदयस्तेऽरुणप्राग्वै पश्चात्सूर्यउदेष्यति
त्वन्नाम्नात्रिषु लोकेषुख्यातोऽहमरुणेश्वरः । भविष्यामि न संदेहोनृणामर्थप्रदायकः
ये मां पश्यन्ति सततं त्वन्नाम्ना चारुणेश्वरम् ।
ते यास्यन्ति परं स्थानं दाहप्रलयवर्जितम् ॥ ४१ ॥
मोदिष्यन्तिकुलैःसार्द्धं पितृमातृसमुद्भवैः । कल्पकोटिसहस्रं तुयेपश्यन्तिसमाहिताः
नदुःखं जायते तेषांयेपश्यन्ति रवेर्द्दिने । संसारसागरोत्थं वै यावदिन्द्राश्चतुर्दश ॥
यः पश्यति चतुर्दश्यां कृष्णायामरुणेश्वरम् ॥ ४४ ॥
स नेष्यति पितॄन्स्वर्गेनरकस्थान्नसंशयः । सङ्क्रान्तौरविवारेचयः पश्येदरुणेश्वरम्
शुण्डीरस्वामिनो यात्रा कृता तेन न संशयः ॥ ४५ ॥
इत्युक्तस्तेन लिङ्गेन विनतानन्दनस्तदा । आगतः कृतकृत्यात्मायत्र देवोदिवस्पतिः
अस्य लिङ्गस्य माहात्म्यात्कश्यपस्याऽऽत्मसम्भवः ।
अरुणो दृश्यते व्योम्नि सूर्यस्य पुरतः सदा ॥ ४७ ॥

एषते कथितो देवि! प्रभावःपापनाशनः । अरुणेश्वरदेवस्य पुष्पदन्तेश्वरं शृणु ॥४८
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्येऽरुणेश्वरमाहात्म्यवर्णनंनाम
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

———

सप्तसप्ततितमोऽध्यायः

पुष्पदन्तेश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

सप्तसप्ततिकं देवि! पुष्पदन्तेश्वरं शृणु । यस्य दर्शनमात्रेण गर्भवासो न जायते ॥ १
शिनिर्नामद्विजोदेवि! सचापुत्रोऽभवत्पुरा । पुत्रार्थं चिन्तयामास सतपांसिबहूनि ह
वायुभक्षोऽम्बुभक्षश्च निराहारोर्ध्वबाहुकः ।
शाकमूलफलाहारः पर्णाश्येकद्वि पर्णभुक् ॥ ३ ॥
एवमादीनि चान्यानि तपांसि श्रेयसेपरम् । एतेषां तपसां मध्ये तप एकं समाश्रये
परंविघ्नोपशान्त्यर्थंतोषयिष्येऽहमीश्वरम् । एवं सञ्चिन्त्यमनसाऊर्ध्वबाहूर्ध्वपादकः
आभ्यां न स दुरासाद्यो नापराधो भविष्यति ॥ ५ ॥
तथाचकार स मुनिर्वर्षाणां द्वादशैवहि । तपस्यन्तं चतं दृष्ट्वा नियमे परमे स्थितम्
विज्ञप्तोहं त्वया देवि! मन्दरे चारुकन्दरे । करोत्येष तपः क्रूरं पुत्रहेतोर्मुनिर्महान् ॥
तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् । तपसादुष्करेणैव क्षुभितानाकवासिनः
व्यालेन्द्रा व्याकुलीभूता लुलिताश्चाऽचलेश्वराः ।
मुनयो विस्मृतिं प्राप्ताः कम्पेते चापि रोदसी ॥ ६ ॥
अयोनिजः शिनिर्विप्रः पुत्रमिच्छत्ययोनिजम् ।
त्वं योनिर्गुणसङ्घानां त्वं योनिस्तपसामपि ॥ १० ॥

त्वं तपस्त्वंपरंधाम शिखिचन्द्रार्कलोचन !। सर्वेश्वर सुतोऽभीष्टःकिंन विप्रायदीयते सुरासुरगुरो!किंन पुत्रमस्मै प्रयच्छसि। तपसा क्षीणदोषस्य ब्रह्मत्वेभावितात्मनः

शिनेः पुत्रप्रदानं त्वं कुरु मद्वचनाच्छिव !।
तपसा दुष्करेणैव गाढं क्लिष्टो महामुनिः ॥ १३ ॥
तेजांसि ज्योतिषामेव महतां च विधिस्थितः।
अहस्तेजसा स्वेन तमांसीव दिवाकरः ॥ १४ ॥

त्वद्भक्तस्य च देवेश व्यर्थःकस्मात्परिश्रमः। उदितेऽर्कैतमांसीह न भवन्तिकदाचन त्वत्परस्य न देवेश युक्ता दुःखविभीषिका। इत्यहं प्रार्थितो देवि त्वयापर्वतपुत्रिके विप्रार्थमनुकम्पार्थं पुत्रार्थं चविशेषतः। आकारिता मया देवि! गणास्त्वद्गौरवेणतु रुद्राश्च हरभक्ताश्चकूष्माण्डागगनेचराः। रोमरौद्रामहानीलाःशिखावन्तःसकोकिलाः

अन्ये च विविधाकाराः कालास्या हरिपिङ्गलाः।
जटाजूटधराश्चित्रा वीथिनक्षत्रचारिणः ॥ १६ ॥
नीलग्रीवाः कृष्णमुखाः पिङ्गधौतजटासटाः।
ज्वरोडिण्डिर्महाकालोलाङ्गुलिश्च महेश्वरः ॥ २० ॥

घण्टाकर्णौ विशाखश्चपरिशेषागणाश्च ये। वृषारूढाःकामतुल्याःकामरूपबलास्तथा शूलचन्द्रधराः सर्वेसर्वेतुल्यपराक्रमाः। ममादेशात्समायाताःकृताञ्जलिपुटाःस्थिताः

स्तुवन्तो विविधैः स्तोत्रैरूचुरेवं समाहिताः।
किं कर्त्तव्यमिहास्माभिरादेशो दीयतां प्रभो !॥ २३ ॥
गणानां वचनं श्रुत्वा ज्ञात्वा भक्तिं च तादृशीम्।
महातपःप्रभावोऽयं शिनिविप्रस्य कीर्त्तितः ॥ २४ ॥

पुत्रार्थंतप्यतितपःशिनिर्ब्राह्मणसत्तमः। मद्वाक्यात्कोनुविप्रस्य पुत्रत्वंसम्प्रदास्यति

तस्याऽहं सम्प्रदास्यामि सर्वान्कामान्यथेप्सितान्।
अमरं चाजरं पुत्रं मुनिर्वाञ्छति साम्प्रतम् ॥ २६ ॥
मद्वाक्यं क्रियतां सद्यो विप्रः क्लेशाद्विमुच्यताम्।

मद्भक्तस्य न सङ्कल्पो मिथ्याभवितुमर्हति ॥ २७ ॥

मदीयंवचनंश्रुत्वा सर्वेकम्पितकन्धराः। सर्वे चावाङ्मुखाजाताःसर्वेध्यानपरायणाः न कश्चिद्भाषतेकिञ्चिन्न कश्चिद्वीक्षते तदा। अथोक्तं पुष्पदन्तेनरभसान्मानितेन तु मम चित्तमविज्ञाय गणानामनुकम्पया। न यास्यन्तिगणादेवत्वांविहायमहातलम्

इह स्थास्यन्ति सततं त्वत्समीपे न संशयः।
कथं योनिं प्रयास्यन्ति सम्प्राप्य मुदमुत्तमाम् ॥ ३१ ॥
हीनां रजोऽधिकां दीनां तमोबहुलधारिणीम्।
कथं स्वर्गं परित्यज्य यास्यामो नरकं परम् ॥ ३२ ॥

ब्रुवन्नेवं भ्रमेणैव भाव्यर्थेन प्रणोदितः। उक्तोमया विशालाक्षिपुष्पदन्तोगणाग्रणीः पत त्वं मानुषेलोकेयस्मान्मेविप्रियं कृतम। शप्त्वातंपुष्पदन्तं तु वीरकःप्रेरितोमया विप्रस्यपुत्रतांतूर्णंपुत्रगच्छममाज्ञया। ततस्तेसंप्रदास्यामिसर्वान्कामान्यथेप्सितान् इत्युक्तोवीरकोदेवि!गतोविप्रस्यपुत्रताम्। पुष्पदन्तोऽपि करुणंविललापसुदुःखितः

पश्चात्तापेन संयुक्तो निःश्वस्य च पुनः पुनः।
अहो तत्सफलंजन्म यदाज्ञाक्रियते नरैः ॥ ३७ ॥

प्रभूणामेकचित्तेन ते भृत्या दुर्लभाः स्मृताः। तेषामर्थश्चधर्मश्चकुलं चैवचतारितम् प्रसन्नास्त्रिदशास्तेषां प्रभुभक्ताश्चये नराः। सेवाधर्मोहि गहनोयोगिनामपि दुष्करः न ज्ञेयः केन तत्त्वेन दुराराध्यःप्रभुर्भवेन। एकेनाप्यपराधेन प्रकोपं कुरुते प्रभुः ॥४०॥

विनश्यन्त्युपकाराणि तस्मात्सेवा सुदुष्करा।
स्वामी सर्पश्च वह्निश्च तत्प्रभावं व्रजन्ति हि ॥ ४१ ॥

तस्माद्यत्नेन संसेव्या आत्मरक्षणतत्परैः। सोऽहंभूमौ निपतितःप्रभोरादेशभञ्जकः

कांस्तु लोकान्गमिष्यामि कलुषीभ्रूणहा इव।
एवं विलप्य बहुशो मामेव शरणं गतः।
उवाच दीनया वाचा प्रणिपत्य पुनः पुनः ॥ ४३ ॥
दीनोऽस्मि ज्ञानहीनोऽस्मि प्रणतोऽस्मि च शङ्कर !।

कुरु प्रसादं देवेश! अपराधं क्षमस्व मे ॥ ४४ ॥

नहि निर्वहणं यान्ति प्रभूणामाश्रिता रुषः । प्रसीद देवदेवेश! दीनस्य कृपणस्य च अपि कीटपतङ्गत्वं गच्छेयंतव शासनात् । भक्तोऽहं सर्वदा देव! पुत्रत्वेहिप्रतिष्ठितः इति तस्य वचः श्रुत्वा पुष्पदन्तस्यपार्वति !। ममत्वेनतदादेविप्रोक्तमित्थंत्वयावचः

गच्छ पुत्र ममादेशान्महाकालवनं शुभम् ।

लिङ्गमाराधय क्षिप्रं तत्त्वन्नाम्ना भविष्यति ॥ ४८ ॥

कीर्त्तिस्ते भविता पुत्रयावदाभूतसम्प्लवम् । इत्युक्ते तुत्वयादेविमयाप्युक्तंवरानने न मे मिथ्या वचः पुत्र! भविष्यतिकथञ्चन । दर्शनादेवलिङ्गस्यममाभीष्टोभविष्यसि

विमाने पुष्पपादे तु समारूढो भविष्यसि ।

पुष्पैः सम्पूज्यमानस्तु पदं प्राप्स्यसि शाश्वतम् ॥ ५१ ॥

गणैः सार्द्धं मयाचैवमुदितोविचरिष्यसि । ममापि नरतिर्वत्सभविष्यतित्वयाविना अहं तत्रागमिष्यामि महाकालवने शुभे । तुष्टोऽहं सर्वदा वत्सगणानामग्रणीः कृतः

अनया शुद्धया भक्त्या लोकानामुपकारकः ।

भविष्यसि न सन्देहस्तस्मिन्क्षेत्रे गतो ध्रुवम् ॥ ५४ ॥

इत्युक्तो हि मयादेविपुष्पदन्तोगणाग्रणीः । मानीममाज्ञयामौनीमहाकालवनेशुभम् लिङ्गमाराधयामास दुर्वासेशादथोत्तरे । लिङ्गेनोक्तस्तु सहसा तुष्टोऽहं गणसत्तम!

त्वन्नाम्ना ख्यातिमेष्यामि प्रसादस्ते कृतोऽधुना ॥ ५६ ॥

एतस्मिन्नन्तरे देवि! त्वया सार्द्धमहं गतः । शक्राद्यैस्त्रिदशैःसार्द्धंगणैर्नानाविधैस्तथा

हृष्टस्तु पुष्पदन्तोऽपि पुष्पपट्टासने शुभे ।

पुष्पैः प्रकीर्यमाणोऽपि पुनः प्राप्तो ममाऽऽन्तिकम् ॥ ५८ ॥

मया संश्लेषितः स्नेहादुत्सङ्गेऽप्यधिरोपितः ।

स्थानं दत्तं विशालाक्षि! इदमुक्तं मया तदा ५९ ॥

येपश्यन्तिनरालिङ्गंत्वयासंपूजितंभुवि । तेयास्यन्तिपुष्पकेणक्रीडन्तोवैत्रिविष्टपम् गणाध्यक्षा भविष्यन्तिसर्वकामैरलङ्कृताः । ममलोकेगणाध्यक्षायावदिन्द्राश्चतुर्दश

दर्शनात्क्षीयते पापमैहिकं पूर्वकं तथा । ततः प्रसादान्मे सर्वं ज्ञानं सम्यग्भविष्यति यः पूजयेच्चतुर्दश्यामष्टम्यां सोमवासरे । अमरैः सहसंहृष्टो मोदते दिवि सर्वदा ॥ पैतृकैर्मातृकैः सार्द्धं कुलैस्तु सप्तभिर्युतः । नवदेत्केनचित्सार्द्धं नरोयः प्रातरुत्थितः पुष्पदन्तेश्वरंदृष्ट्वा सोऽश्वमेधफलं लभेत् । मुच्यतेपातकाद्यैश्च यःशाठ्ये नापिपश्यति नतस्यसन्ततिच्छेदोयः पश्यति दिनेदिने । नियमेन गणाध्यक्षजायतेब्रह्मणोदिनम्

ऐश्वर्यं सप्तलोकेषु भुक्त्वा भोगान्यथाक्रमम् ।

पृथिव्यामेकराड्भूत्वा ममाङ्गे सम्भविष्यति ॥ ६७ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः । पुष्पदन्तेश्वरेशस्य अविमुक्तेश्वरं शृणु ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसम्वादेपुष्पदन्तेश्वरमाहात्म्य-
वर्णनंनाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः

अविमुक्तेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

अष्टसप्ततिकं विद्धि अविमुक्तेश्वरं प्रिये ।यस्य दर्शनमात्रेण तीर्थयात्राफलं लभेत् ॥ शाकले नगरे देवि! चित्रसेनोमहीपतिः । बभूव भुविविख्यातोरूपवान्मन्मथाधिकः

तस्य चन्द्रप्रभा भार्या प्राणेभ्योऽपि गरीयसी ।

पतिव्रता धर्मशीला रूपयौवनशालिनी ॥ ३ ॥

अपुत्रस्यापि नृपतेः पुत्रीजाता मनोरमा । तस्या नाम तदा चक्रे पितापार्थिवसत्तमः

सर्वलक्षणसम्पन्ना कन्या लावण्यवत्यपि ।

सापि जातिस्मरा देवि! सस्मार च पुरातनम् ॥ ५ ॥

वैराग्याद्ब्रह्मचर्यं च चचारतनुमध्यमा । कदाचिद्यौवनं प्राप्तासाच पृष्टा नृपेण वै ॥
उत्सङ्गे च निजे कृत्वा मूर्ध्निचाघ्रायहर्षितः । पुत्रि प्रदानकालस्ते कस्मैदेयापरायच
नृपाय नृपपुत्राय सम्मताय द्विजाय वा । वृद्धाय बहुभार्यायग्रामीणाय च पुत्रिणे ॥
हर्षेण चावृतो राजा पुनः पप्रच्छ तां सुताम् ॥ ८ ॥
पृष्टा च सा यदा देवी न चोवाचनृपंप्रति । अधोमुखी चसञ्जाता पुनःप्रोक्तानृपेणतु
यदि मद्वचनं पुत्रि! प्रतिभाति न साम्प्रतम् । वरणंस्वेच्छयापुत्रि!कुरुतर्हिस्वयंवरम्
इत्युक्ता सा नृपतिना पित्रा प्रोक्ता पुनः पुनः ।
रुरोद सा वै करुणं श्रुत्वा तां कुत्सितां गतिम् ॥ ११ ॥
जहास चाऽतिहासेन पुनः श्वासांश्चमुञ्चति । प्रहर्षंच पुनःक्षिप्रं प्राप्य बाष्पंचमुञ्चति
तामवस्थांगतां दृष्ट्वापुत्रीमुन्मत्ततांगताम् । किमेतदिति भूपालोग्रसिताकिंग्रहेणवै
भूतेन वा पिशाचेन मत्सुता लक्षणैर्युता ।
इति चिन्तापरो राजा यदा जातो यशस्विनि !॥ १४ ॥
तदाप्रोक्तस्तया पुत्र्यामा तात विमना भव । नाहंग्रस्ता ग्रहेणेह न भूतेन न रक्षसा ॥
न पिशाचेन यक्षेण तव कन्यामहीपते !। जातिस्मराऽहमुत्पन्नाश्रूयतां ममजन्म च॥
प्राग्ज्योतिषे पुरे विप्रोहरस्वामीबभूवह । भार्याऽहंदुर्भगाजातातस्यविप्रस्यपार्थिव
रूपयौवनसम्पन्ना तस्य नाहं प्रियाविभो । सदाविद्वेषसंयुक्तो मयि निष्ठुरजल्पकः
नान्यस्य कस्यचिद्द्वेष्टा मुक्त्वा मां पृथिवीपते !।
पाणिग्रहणकाले तु ग्रहैः पापैर्विलोकिता ॥ १६ ॥
अहमूढा कुलीनेन द्विजेनातिगुणेन च । स चावलोकितो विप्रो ग्रहैःपुण्यैर्नराधिप॥
तेन मे वल्लभो राजन्न चाऽहं तस्यवल्लभा । स सदाचारसंयुक्तो वेदाध्ययनतत्परः ॥
नान्यत्र कुरुते भावं ब्रह्मचर्यव्रतेस्थितः । ततोऽहं क्रोधसंयुक्ता वशीकरणलम्पटा ॥
अपृच्छं प्रमदास्तात यास्त्यक्ताः पतिभिः किल ॥ २२ ॥
ताभिरुक्ता ह्यहं भूप!वश्यो भर्त्ता भविष्यति ।
अस्माकं प्रत्ययो जातस्तस्मात्त्वं कर्तुमर्हसि ॥ २३ ॥

भेषजैर्विविधैश्चूर्णैर्मन्त्रैर्मोहकरैः परैः । तैस्तैस्तु कृतलेपोऽपि भविता दासवत्पतिः
ततोऽहंत्वरिता गत्वातासां वाक्येन भूपते !। चूर्णं मन्त्रंगृहीत्वाच प्राप्ताभर्तृगृहंपुनः
प्रदोषे पयसायुक्तश्चूर्णोभर्त्तुर्नियोजितः । ग्रीवायांचमयामन्त्रोन्यस्तःसर्वाङ्गसन्धिषु
यदा पीतश्च चूर्णस्तु मन्त्रेणातीवगुण्ठितः ।
वशगस्तत्क्षणाज्जातो मन्त्रचूर्णप्रभावतः ॥ २७ ॥
द्वारदेशे स्थितः क्रन्दन्दासोऽस्मि तव शोभने !।
त्राहि मां शरणं प्राप्तं त्वद्वशोऽहं च शोभने !॥ २८ ॥
तत्तस्य रुदितं ज्ञात्वा मन्त्रमाहात्म्यतो नृप !।
स्वस्थीकरणयोगेन तदा स्वस्थः कृतः पतिः ॥ २९ ॥
ततःप्रभृतिकान्तोमे वश्योऽभूद्भवनेस्थितः । पश्चात्मंचगता काले तथानारकयातनाम्
ताम्रभ्राष्ट्रे चदग्धाहंयुगानि दशपञ्चच । सूक्ष्माणि तिलमात्राणिकृत्वाखण्डान्यनेकशः
छेदिता कालसूत्रेण पीडिता घ्राणयन्त्रके ॥ ३१ ॥
क्वाथीभूता तप्ततैलैर्वटे दर्व्याथ लोडिता । पिष्टाचैव शिलापृष्ठे कुट्टिता लोहमुद्गरैः ॥
दलिता दन्तदलने दग्धाहं रौरवेभृशम् । अधोमुखी विनिक्षिप्ता त्वमेध्येपूयशोणिते
यान्यापि युवती तात भर्तुर्वश्यं समाचरेत् । वृथाधर्मा दुराचारा पच्यतेनरकेभृशम्
भर्त्ता नाथो गुरुर्भर्त्ता भर्त्ता वै दैवतं परम । भर्त्तास्वामी सुहृद्भर्त्ताभर्त्ताचपरमंपदम्
तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ।
विमुखे विमुखाः सर्वे तस्मात्सेव्यः सदा पतिः ॥
भस्मीभवति सा नारी यया भर्त्ता न तोषितः ॥ ३६ ॥
यस्य प्रसादात्प्राप्यन्ते भोगाश्च विविधाःसदा ।
तं वश्यं कुरुते या च सा कथं सुखमाप्नुयात् ॥ ३७ ॥
तिर्यग्योनिशतंयातिकृमिपक्षिशतानिच । तस्मात्तत्तत्सदाकार्यं स्त्रीभिर्भर्तृवचःकिल
एवं पुनर्मया भुक्तानरका भृशदारुणाः । तिर्यग्योनिसहस्रं तु कर्मणा कुत्सितेन च ॥
किञ्चित्पातकशुद्ध्यर्थं चण्डालस्य च वेश्मनि ।

जाताऽहमतिरूपेण पीडिता विविधैर्व्रणैः ॥ ४० ॥

सारमेयैर्वृता दीना भक्ष्यमाणा पुनः पुनः ।

दुष्टाऽहं भक्ष्यमाणाऽपि मार्गे रुद्धा वृकैरहम् । तैरहं तुद्यमानापि महाकालवनं गता

दृष्टो मया महादेवो दैवतो मृगमाणया । समीपे देवदेवस्य पिप्पलादेश्वरस्य च ॥

तस्य दर्शनमात्रेण गता शक्रपुरम्प्रति । विमानेन सुदीप्तेन किङ्किणीजालमालिना ॥

दिव्याम्बरधरा दिव्या दिव्यमालाविभूषणा ॥ ४३ ॥

तत्राऽहंपूजिता देवैःस्तुताऽहंचारणैस्तथा । दर्शनात्तस्यलिङ्गस्यजाताऽहंतत्रवेश्मनि

वल्लभा रूपसम्पन्ना शाकलेऽनगरे शुभे ।

स्मृत्वा तु कुत्सितां योनिं विलापश्च कृतो मया ॥ ४५ ॥

स्मृत्वा लिङ्गस्य माहात्म्यं हर्षो जातस्तु तत्क्षणात् ।

तन्मे नैव च वातूलयं गृहीता न ग्रहेण च ॥ ४६ ॥

जाताजातिस्मरातात! ब्रह्मचर्यव्रतेस्थिता । अतोयास्यामि तं देवं दर्शनार्थम्पुनःप्रभो

यथा न भूयो मे जन्म स्याच्च संसारसागरे ॥ ४७ ॥

इति पुत्रीवचः श्रुत्वा चित्रसेनो महीपतिः । सभृत्यमन्त्रिसहितोमहाकालवनंगतः

ददर्श तत्र तल्लिङ्गं पूजयामास भक्तितः । साऽपि दृष्ट्वैव तल्लिङ्गं तस्मिंल्लिङ्गेलयंगता

राजा च पुत्रवाञ्जातोलिङ्गदर्शनतः प्रिये ! बभूवचक्रवर्त्ती स यथा स्वायम्भुवोमनुः

एतस्मिन्नन्तरे देवि! दृष्ट्वा देवे लयं गताम् ।

राजपुत्रीं महादेवि! कृतं नाम मुदान्वितैः ॥ ५१ ॥

अविमुक्तस्य लिङ्गस्यदर्शनादेवतत्क्षणात् । अविमुक्तेश्वरोदेव इतिख्यातोभवत्विति

योऽसौ काश्यां प्रसिद्धोऽस्ति देवो विश्वेश्वरः शिवः ।

स चैवाऽत्र सुविख्यातोऽविमुक्तेश्वरसञ्ज्ञया ॥ ५३ ॥

वाराणसी यथा पुण्या तथाऽवन्ती च मुक्तिदा ।

तस्या दशगुणं पुण्यं श्रूयतेऽत्र विशेषतः ॥ ५४ ॥

तस्माद्विश्वेश्वरो देवः समायातः कुशस्थलीम् ।

यत्रागत्य सुविद्वांसो मानवाः शंसितव्रताः ॥ ५५ ॥

पश्यन्तिपरयाभक्तयाह्यविमुक्तेश्वरंशिवम् । तेषां मुक्तिर्नसन्देहोभविष्यतिसुनिश्चला

अमुक्ता नैव पश्यन्ति मुक्ता पश्यन्ति सर्वदा । ब्रह्मचर्यव्रतैःसम्यगिष्टैः सर्वमखैर्भवेत्

तत्फलं प्राप्यते सम्यगविमुक्तेशदर्शनात् । नैःश्रेयसीगतिःपुण्या दर्शनादेव जायते

यागतिः प्राप्यते साङ्ख्यैर्योगैर्वा या गतिर्भवेत् ।

सा गतिः प्राप्यते सम्यगविमुक्तेशदर्शनात् ॥ ५६ ॥

जन्ममृत्युभयं हित्वा स याति परमां गतिम् ।

यः पूजयति भावेन ह्यविमुक्तेश्वरं शिवम् ॥ ६० ॥

ब्रह्महाऽपि च यो गच्छेदविमुक्तेश्वरं यजेत् ।

तस्य लिङ्गस्य माहात्म्यात्सर्वपापान्निवर्त्तते ॥ ६१ ॥

शाठ्येनापिचयःपश्येदविमुक्तेश्वरंशिवम् । समुञ्झनिजरांमृत्युंजन्मचैतदशाश्वतम्

स्मृतःसम्पूजितो भक्त्या स्तुतो वा विविधैः स्तवैः ।

मुक्तिं ददाति देवेशो ह्यविमुक्तेश्वरः शिवः ॥ ६३ ॥

एष ते कथितो देवि! प्रभावः पापनाशनः ।

अविमुक्तेश्वरेशस्य हनुमत्केश्वरं शृणु ॥ ६४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये उमामहेश्वरसम्वादेऽविमुक्तेश्वरमाहात्म्यवर्णनंनामाऽ-
ष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

———

एकोनाशीतितमोऽध्यायः

हनुमत्केश्वरमाहात्म्यवर्णनम्

श्रीमहादेव उवाच

एकोनाशीतिकं विद्धि हनुमत्केश्वरं प्रिये !। यस्य दर्शनमात्रेण समीहितफलं लभेत्
प्राप्तराज्यस्यरामस्य राक्षसानां वधे कृते । आगता मुनयो देवि! राघवंप्रतिनन्दितुम्
रामेण पूजिताःसर्वे ह्यगस्तिप्रमुखा द्विजाः । प्रहृष्टमनसोविप्रा रामं वचनमब्रुवन् ॥

दिष्ट्या तु निहतो रामः रावणः पुत्रपौत्रवान् ।
दिष्ट्या विजयिनं त्वाऽद्य पश्यामः सह भार्यया ॥ ४ ॥

हनूमता च सहितं वानरेण महात्मना । दिष्ट्या पवनपुत्रेण राक्षसान्तकरेण च ॥
चिरञ्जीवतु दीर्घायुर्वानरो हनुमान्सदा । अञ्जनीगर्भसम्भूतो रुद्रांशो हि धरातले ॥

आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहिताश्चैव दिक्पालाः पान्तु सर्वदा ॥ ७ ॥
श्रुत्वा तेषां तु वचनं मुनीनां भावितात्मनाम् ।
विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत् ॥ ८ ॥
किमर्थं लक्ष्मणं त्यक्त्वा वानरोऽयं प्रशंसितः ।
कीदृशः किम्प्रभावो वा किम्वीर्यः किम्पराक्रमः ॥ ९ ॥

अथोचुः सत्यमेवैतत्कारणं वानरोत्तमे । न त्वस्य सदृशोवीर्ये विद्यते भुवनत्रये ॥
एष देव महाप्राज्ञो योजनानां शतं प्लुतः । धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरंगतः॥
प्रादेशमात्रप्रतिमं कृतं रूपमनेन वै । दृष्टा सम्भाषिता सीता पृष्टा विश्वासिता तथा
सेनाग्रगामन्त्रिपुत्राः किङ्करा रावणात्मजाः । हता हनुमतातत्रताडिता रावणालये

भूयो बन्धविमुक्तेन सम्भाष्य तु दशाननम् ।

लङ्का भस्मीकृता तेन पातकेनेव मेदिनी ॥ १४ ॥

नकालस्यनशक्रस्यन विष्णोर्वैधसोऽपिवा । श्रूयन्तेतानिकर्माणियादृशानिहनूमतः

राम उवाच

एतस्यबाहुवीर्येणलङ्कासीताच लक्ष्मणः । प्राप्तोमम जयश्चैवराज्यंमित्राणिबान्धवाः
सखायं वानरपतिमुक्त्वैनं हरिपुङ्गवम् । प्रवृत्तिमपिकोवेत्तुं जानक्याःशक्तिमान्भवेत्
वाली किमर्थमेतेन सुग्रीवप्रियकाम्यया । तदा वैरे समुत्पन्ने न दग्धस्तृणवत्कथम्
नाहं विदितवान्मन्ये हनुमानात्मनो बलम् । उपेक्षितःक्लिश्यमाने किमर्थं वानराधिपे
एवं ब्रुवाणं रामं तु मुनयो वाक्यमब्रुवन् । सत्यमेतद्रघुश्रेष्ठ यद्ब्रवीषि हनूमतः ॥

न बले विद्यते तुल्यो न गतौ न मतावपि ।
अमोघवाक्यैः शापस्तु दत्तोऽस्य मुनिभिः पुरा ॥ २१ ॥

न ज्ञातं हि बलं येन बलिना वालिमर्दने । बाल्येऽप्यनेन यत्कर्म कृतं नाम महात्मना

तन्न वर्णयितुं शक्यमेतस्य तु बलं महत् ।
यदि श्रोतुं तवेच्छाऽस्ति निशामय वदामहे ॥ २३ ॥
असौ हि जातमात्रोऽपि बालार्क इव मूर्त्तिमान् ।
ग्रहीतुकामो बालार्कंप्लुप्लावाम्बरमध्यतः ॥ २४ ॥

तूर्णमाधावतो राम! शक्रेण विदितात्मना । हनुस्तेनास्य सहसाकुलिशेनैवताडितः
ततो गिरौ पपातैष शक्रवज्राभिताडितः । पततोऽस्य महावेगाद्वामो हनुरभज्यत

अस्मिंस्तु पतिते बाले मृतकल्पेऽशनिक्षतात् ॥ २६ ॥

ततो वायुः समादाय महाकालवनं गतः । लिङ्गमाराधयामास पुत्रार्थं पवनस्तदा ॥
स्पृष्टमात्रस्तु लिङ्गेन समुत्तस्थौप्लवङ्गमः । जलसिक्तंयथासस्यंपुनर्जीवितमाप्तवान्
प्राणवन्तमिमं दृष्ट्वा पवनो हर्षितस्तदा । प्रत्युवाच प्रसन्नात्मा पुत्रमादाय सत्वरम्

स्पर्शनादस्य लिङ्गस्य मम पुत्रः समुत्थितः ।
हनुमत्केश्वरो देवो विख्यातोऽयं भविष्यति ॥ ३० ॥

एतस्मिन्नन्तरे शक्रः समायातः सुरैर्वृतः । नीलोत्पलमयीं मालांसम्प्रगृह्येदमब्रवीत्

मत्करोत्सृष्टवज्रेण यस्मादस्य हनुर्हतः । तदेष कपिशार्दूलो हनुमांस्तु भविष्यति
वरुणोऽस्य वरं प्रादान्नास्यमृत्युर्भविष्यति ।
यमो दण्डादवध्यत्वमारोग्यं धनदो ददौ ॥ ३३ ॥
सूर्येण च प्रभा दत्ता पवनेन गतिर्दुता । लिङ्गेन च वरो दत्तो देवानां सन्निधौ तदा
आयुधानां हिसर्वेषामवध्योऽयं भविष्यति । अजरश्चामरश्चैवभविष्यति न संशयः
अमित्रभयदो ह्येष मित्राणामभयप्रदः । अजेयो भविता युद्धे लिङ्गेनोक्तं पुनःपुनः
शत्रोर्वलोत्साहनायराघवप्रीतये सदा । कियत्कालं बलं स्वीयंनस्मरिष्यतिशापतः
हते तु रावणे भूयो रामस्यानुमते स्थितः ।
विभीषणं प्रार्थयित्वा मामत्र स्थापयिष्यति ॥ ३८ ॥
ततो मां त्रिदशाः सर्वे पूजयिष्यन्ति भाविताः ।
तेनैव नाम्ना विख्याति पुनर्यास्यामि भूतले ॥ ३६ ॥
अथ गन्धवहः पुत्रं प्रगृह्य गृहमानयत् । अञ्जनायै तदाचख्यौवरलब्धि च लिङ्गतः
एवं लिङ्गप्रभावाच्च बलवान्मारुतात्मजः । स जातस्त्रिपुलोकेषुराम! तस्मात्प्रशस्यते
पराक्रमोत्साहमतिप्रतापैः सौशील्यमाधुर्यनयादिकैश्च ।
गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकोऽस्ति लोके ॥ ४२ ॥
ममेव विक्षोभितसागरस्य लोकान्दिधक्षोरिव पावकस्य ।
प्रजा जिहीर्षोरिव चान्तकस्य हनूमतः स्थास्यति कः पुरस्तात् ॥ ४३ ॥
एतद्वै कथितं तुभ्यं यन्मां त्वं परिपृच्छसि ।
हनूमतोऽस्य बालस्य कर्माण्यद्भुतविक्रम!॥ ४४ ॥
दृष्टःसभाजितश्चापिरामगच्छामहेवयम् । एवमुक्त्वागताःसर्वेमुनयोऽवन्तिमण्डलम्
पूजयामासुरीशानं हनुमत्केश्वरं शिवम् ॥ ४५ ॥
समर्चयन्ति ये भक्त्या लिङ्गं त्रिदशपूजितम् । हनुमत्केश्वरं देवंतेकृतार्थाः कलौयुगे
व्रजन्त्येव सुदुष्प्राप्यंब्रह्मसायुज्यमव्ययम् । सम्प्राप्यतुपुनर्जन्म लभन्तेमोक्षमव्ययम्
यः पश्यति नरोलिङ्गं हनुमत्केश्वरंप्रिये । सोऽधिकंफलमाप्नोतिसर्वदुःखविवर्जितः

सर्वलोकेषु तस्यैव गतिर्न प्रतिहन्यते । दिव्यैनैश्वर्ययोगेन युज्यते नात्र संशयः ॥
बालसूर्यप्रतीकाशविमानेन सुवर्चसा । वृतः स्त्रीणां सहस्रैस्तु स्वच्छन्दगमनागमः
विचरत्यविचारेण सर्वलोकान्दिवौकसाम् ।
स्पृहणीयतमः पुंसां सर्ववर्णोत्तमोऽधुना ॥ ५१ ॥
स्वर्गाच्च्युतः प्रजायेत कुले महति रूपवान् । धर्मज्ञो रुद्रभक्तश्चसर्वविद्यार्थपारगः
राजा वा राजतुल्यो वा दर्शनादस्य जायते । स्पर्शनात्परमं पुण्यं यजनात्परमंपदम्
एष ते कथितो देवि! प्रभावः पापनाशनः । हनुमत्केश्वरेशस्य स्वप्नेश्वरमथो शृणु
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे हनुमत्केश्वरमाहात्म्य-
वर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७६ ॥

अशीतितमोऽध्यायः

स्वप्नेश्वरमाहात्म्यवर्णनम्

ईश्वर उवाच

अशीतिकं विजानीहिदेवंस्वप्नेश्वरं प्रिये !। यस्यदर्शनमात्रेणदुःस्वप्नंनश्यतिध्रुवम्
कल्माषपादेति ख्यातो लोके राजा बभूव ह ।
इक्ष्वाकुवंशजो देवि! तेजसा सूर्यवद् भुवि ॥ २ ॥
स कदाचिद्वने राजा वशिष्ठसुतमौरसम् । शक्तिं परमधर्मज्ञं ददर्श विजितेन्द्रियम्॥
मार्गस्थितं तपोनिष्ठमपगच्छेति चाऽब्रवीत् ॥ ३ ॥
अमुञ्चन्तं तु पन्थानं तमृषिं नृपसत्तमः । जघान कशया मोहात्तदा राक्षसवन्मुनिम्॥
कशाप्रहाराभिहतस्ततः स मुनिपुङ्गव !। तं शशाप रुषाविष्टो वाशिष्ठःक्रोधमूर्च्छितः
हंसि राक्षसवद्यस्माद्राजापसद तापसम् । तस्मात्त्वमद्यप्रभृतिपुरुषादो भविष्यति

सततं पिशिताशक्तश्चरिष्यसि महीमिमाम् । सतुशप्तस्तदातेन तत्क्षणाद्वैनृपोत्तमः
जगाम शरणं शक्तिं प्रसादयितुमर्हयत् । यदा न तुष्टो विप्रर्षिः शक्तिःपरमकोपनः

प्रसाद्यमानो भूपेन तदा तेनापि भक्षितः ॥ ८ ॥
शक्तिं तं भक्षयित्वा तु वशिष्ठस्याऽपरान्सुतान् ।
भक्षयामास सहसा सिंहः क्षुद्रमृगानिव ॥ ९ ॥

तदाप्रभृति सञ्जातः पुरुषादो नृपोत्तमः । रात्रौपश्यतिदुःस्वप्नान्पापसङ्घेनमोहितः

दृष्ट्वा भयानकान्स्वप्नान्स राजा पर्यतप्यत् ।
पश्चात्तापेन संयुक्तो विललाप सुदुःखितः ॥ ११ ॥

अथाप्युक्तममात्यैश्चकिंकरोषिमहीपते । कस्मात्तेनिष्प्रभा कान्तिर्विवर्णोहरिणःकृशः

स राजा कथयामास दुःस्वप्नाननुपूर्वशः
स्वप्नेऽहं सागरं शुष्कं चन्द्रं च पतितं भुवि ॥ १३ ॥

उपरुद्धां च जगतीं घनेन तमसावृताम् । आत्मानं चाहमद्राक्षं मलिनं मुक्तमूर्द्धजम्
पतन्तमद्रिशिखरात्कलुषे गोमये ह्रदे । पिबन्नञ्जलिना तैलं हसन्निव मुहुर्मुहुः ॥ १५ ॥
तैलेनाभ्यक्तसर्वाङ्गस्तैलमेवावगाहयन् । पीठे कार्ष्णायसे चैवनिषण्णोऽहमधोमुखः

गायन्ति प्रमदा रक्ता रक्तमाल्यानुलेपनाः ।
कृष्णाम्बरधराश्चान्याः कृष्णमाल्यानुलेपनाः ॥ १७ ॥
ताभिराकृष्यमाणोऽपि नीतोऽहं दक्षिणां दिशम् ।
बद्ध्वा रज्ज्वा सुवर्णस्य लोहस्य रजतस्य च ॥ १८ ॥

पांसुकर्दमयोर्मध्ये मग्नोऽहं लोहयन्त्रितः । कपोतैस्तुद्यमानोऽहंगृध्रैः काकैश्चदारुणैः

शृगालैर्भक्ष्यमाणश्च स्थितो मद्गुरमस्तके ।
ऋक्षवानरयानस्थो गतोऽहं दक्षिणां दिशम् ॥ २० ॥

नदीं निमग्नो निश्चेष्टो जलहीनांमहीसमाम् । दन्तैर्विदारितो रात्रौरासभेनाहमर्द्दितः
ताडितो हृदयेऽत्यर्थं चरणैर्वज्रसन्निभैः । दृष्टिश्च हन्यतेऽत्यर्थं वेतालैर्लोहशङ्कुभिः
करालैः कण्टकैःकृष्णैःपुरुषैरुद्यतायुधैः । स्वप्नेऽहं ताडितोऽत्यर्थमप्रमाणैःशितैःशरैः

एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ।
सङ्ख्यां कर्तुं न शक्येत दुःस्वप्नानपरान्बहून् ॥ २४ ॥
इमां तु दुःस्वप्नगतिं निरीक्ष्य वै ह्यनेकरूपामविचिन्तितां पुरा ।
भयं महन्मे हृदयं न शुद्ध्यति प्रगृह्य बाहू विलपाम्यनाथवत् ॥ २५ ॥
नृपस्य वचनं श्रुत्वा अमात्या भृशदुःखिताः ।
पश्यन्तो दुर्निमित्तांश्च उल्कापातादिकांस्तदा ॥ २६ ॥

सौरिसूर्यकुजाक्रान्तं नगरं दृश्यतेऽधुना । नागंचतुष्पदं विष्टिं किंस्तुघ्नं शकुनितथा
करणानि न शस्यन्ते मुहूर्त्ता दारुणाभवन् । विदित्वानृपभङ्गं तु देशभङ्गं कुलक्षयम्

आश्वासयन्तो राजानमिदं वचनमब्रुवन् ।
अलं शोकेन काकुत्स्थ! सत्यासत्या हि विभ्रमाः ॥ २९ ॥

दृश्यन्तेभाविताःपुंसिस्वप्ने धातुवशेनहि । तथापित्रादिदेवांश्चपूजयब्राह्मणांस्तथा

एभिस्ततो मोक्ष्यसे त्वं मानसादधिविभ्रमात् ।
यस्माद्दैवोपघातानां दैवमेव हि रक्षणम् ॥ ३१ ॥

एवमाश्वासितो भूपो ह्यमात्यैर्धर्मकोविदैः । तत्पापं कथयामास गुरुपुत्रवधादिकम्
वशिष्ठस्य सुतोज्येष्ठःशक्तिर्वैभक्षितोमया । नृशंसेन तथामात्या एकोनंभक्षितंशतम्
तेन पापेनसन्तप्तःकथंस्वस्थोभवामि वै । एकापिब्रह्महत्या या सापिदैवात्सुदुष्करा

मया पुनर्नृशंसेन सा तथा न तु वर्जिता ।
कांस्तु लोकान्गमिष्यामि कृत्वा कर्म सुदारुणम् ॥
राक्षसोऽहमनेनैव शरीरेण कुलान्तकृत् ॥ ३५ ॥
जातः कुले रघूणां वै पापात्मा पापसम्भवः ।
सोऽहमत्र मरिष्यामि साधयित्वा हुताशनम् ॥ ३६ ॥
इति तस्य वचः श्रुत्वा सौदासस्य सुविस्मिताः ।
अमात्या वेदतत्त्वज्ञाः सर्वशास्त्रविशारदाः ॥ ३७ ॥

अहो पापमिदं भूरि कृतं पापेनसर्वथा । प्रायश्चित्तं न जानीमो वशिष्ठेनविनाऽधुना ॥

तस्मादद्यैव गन्तव्यमस्य भूपस्यकारणात् । यत्रतिष्ठतिविप्रर्षिर्वशिष्ठोभगवान्मुनिः

इत्युक्त्वा सहितास्तेन तेऽमात्याभृशदुःखिताः ।

गत्वा यत्राऽऽश्रमे विप्रो वशिष्ठो भगवानृषिः ॥ ४० ॥

अदृश्यन्तीं वधूं दीनां यत्राश्वासयतिप्रभुः । अदृश्यन्ती तुतं दृष्ट्वा क्रूरकर्माणमग्रतः

भयसम्विग्नया वाचा वशिष्ठमिदमब्रवीत् ॥ ४१ ॥

असौ मृत्युरिवोग्रेण दण्डेन बहुगर्वितः । प्रगृहीतेन काष्ठेनराक्षसोऽभ्येतिभीषणः

तन्निवारयितुं शक्तो नान्यो वै भुवि कश्चन । त्वामृतेऽद्य महाभाग सर्ववेदविदाम्वर

त्राहि मां भगवन्पापादस्माद्दारुणदर्शनात् । राक्षसोऽयमिहागत्य नूनमावांसमाहते

वशिष्ठ उवाच

माभैःपुत्रि न भेतव्यंराक्षसात्तेकथञ्चन । नैतद्रक्षोभयं यस्मात्पश्यसित्वमुपस्थितम्

राजा कल्माषपादोऽयममात्यैः सहितो विभुः ॥ ४१ ॥

स एषोऽस्मिन्वनोद्देशे समायातो ममान्तिकम् ।

तमायान्तमथालक्ष्य वशिष्ठो भगवानृषिः ॥

वारयामास तेजस्वी हुङ्कारेण नृपोत्तमम् ॥ ४६ ॥

मन्त्रपूतेनच ततःसमभ्युक्ष्य च वारिणा । मोक्षयामास वै भावाद्राक्षसाद्राजसत्तमम्

प्रतिलभ्य ततःसञ्ज्ञामभिवाद्य कृताञ्जलिः । उवाचनृपतिः काले वशिष्ठमृषिसत्तमम्

सौदासोऽहं महाभाग दासोऽहंतवसुव्रत ! । अस्मिन्कालेयदिष्टंतेब्रूहिकिंकरवाणिते

तस्य तद्वचनं श्रुत्वा नृपस्यद्विजसत्तमः । ज्ञात्वातपोबलेनैव विश्वामित्रस्यचेष्टितम्

राजानं प्रत्युवाचेदं विनयावनतं तथा ॥ ५० ॥

ज्ञातमेव यथाकालं गच्छ राजन्कुशस्थलीम् ।

महाकालसमीपे तु लिङ्गं दुःस्वप्ननाशनम् ॥ ५१ ॥

राजसम्पत्करं दिव्यंपुत्रपौत्रविवर्द्धनम् । ब्रह्महत्यासहस्राणां स्फोटनं पापनाशनम्

तस्य दर्शनमात्रेण विपाप्मा च भविष्यसि ॥ ५२ ॥

दुःस्वप्नजं भयंघोरंविनङ्क्ष्यतिनसंशयः । ग्रहाश्चसानुकूलास्तेभविष्यन्तिनृपोत्तम

इत्युक्तो गुरुणा भूयो वशिष्ठेन महात्मना । जगामत्वरितोदेवि! महाकालवनं शुभम्

ददर्श तत्र तल्लिङ्गं दुष्टदुःस्वप्ननाशनम् ॥ ५४ ॥

नष्टाः सर्वेऽपि दुःस्वप्नाः सुस्वप्नाश्चाभवंस्तदा ।

राजा निष्कल्मषो भूत्वा पुनः प्राप्तोऽनिजं पदम् ॥

अयोध्यायां गतो राज्यं चकार मुदितस्तदा ॥ ५५ ॥

तदाप्रभृति देवोऽयं सुस्वप्नेश्वरसञ्ज्ञकः । बभूव भुवनेख्यातः सर्वदुःस्वप्ननाशनः

अष्टम्यां च चतुर्दश्यां देवं स्वप्नेश्वरं शिवम् ।

दर्शनं ये करिष्यन्ति स्नात्वा शिप्राजले शुभे ॥

आजन्मप्रभवं तेषां दुःस्वप्नं च विनश्यति ॥ ५७ ॥

स एवसर्वदापूज्य इहलोकेपरत्रच । यःपश्यतिनरोभक्त्यादेवंस्वप्नेश्वरं शिवम् ॥ ५८

यंयंकाममभिध्याय मनसाऽभिमतं नरः । तं तं दुर्लभमाप्नोति सुस्वप्नेश्वरदर्शनात्

नियमेन प्रपश्यन्ति देवं स्वप्नेश्वरं सदा । ते प्रयान्तितनुं त्यक्त्वामदीयंभवनंप्रिये

भक्तिहीनः क्रियाहीनो यः पश्यति प्रसङ्गतः ।

सुपुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि ! ॥ ६१ ॥

ये च पुष्पैर्विचित्रैश्चपूजयन्ति च पर्वसु । तेसर्वकामसम्पन्नाः श्रीबलारोग्यसंयुताः ॥

दीर्घायुषः शुभाचारा जायन्ते देहिनोऽमलाः ॥ ६२ ॥

एतेच ब्रह्मविष्णिवन्द्रकुबेरदहनादयः । सुस्वप्नं परमं प्राप्ताः श्रीस्वप्नेश्वरदर्शनात् ॥

एष ते कथितो देवि! प्रभावःपापनाशनः । स्वप्नेश्वरस्य देवस्य शृणुलिङ्गचतुष्टयम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे

उमामहेश्वरसम्वादे स्वप्नेश्वरमाहात्म्यवर्णनंनामाऽशीतितमोऽध्यायः ॥ ८० ॥

———

एकाशीतितमोऽध्यायः

पिङ्गलेश्वरमाहात्म्यवर्णनम्

ईश्ववर उवाच

चतुर्द्वारस्थितंदेवि! श्रृणु लिङ्गचतुष्टयम्। यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत्
अहं पृष्टस्त्वया देविकौतुकाच्च वरानने। अतीव रमणीयं च स्थलं दर्शय मे प्रभो!॥

सेवितं बहुभिः सिद्धैः पुनरावृत्तिकाङ्क्षिभिः।
यद्गुह्यं च पवित्रं च प्रलयेऽप्यविनाशि यत् ॥ ३ ॥

अनन्यसदृशं दिव्यं यत्तीर्थं यत्तपोवनम्। असङ्ख्येयगुणोपेतं भुक्तिमुक्तिकरं शुभम्

सुवर्णश्रृङ्गाः प्रासादा हर्म्याणि विविधानि च।
उद्यानानि विचित्राणि मार्गाश्च विविधाः शुभाः ॥ ५ ॥

समीहितफलावाप्तिर्यत्र लभ्या सुखेन वै। सिद्धचारणगन्धर्वकिन्नरोद्गीतनादितम् ॥
पुण्यलोकोपमस्थानं त्रिविष्टपविभूषणम्। एवमभ्यर्थितो देवि मन्दरे चारुकन्दरे
मया प्रोक्तंप्रसन्नेन स्थानं श्रृणु सनातनम्। महा कालवनं रम्यंस्वर्गात्सुखकरंपरम्
अनौपम्यगुणोपेतं भुक्तिमुक्तिकरंशुभम्। तत्समः कोऽपिधन्योऽन्योनदृष्टोभुवनत्रये

देवगन्धर्वसिद्धैश्च सेव्यं वै मुक्तिकाङ्क्षिभिः।
विनोदार्थं मया सृष्टं त्वत्प्रियार्थं कुतूहलात् ॥ १० ॥

तिलकं सर्वतीर्थानां जम्बूद्वीपे मनोरमे। इच्छाकामफलावाप्तिरनायासेन लभ्यते ॥
जरारोगभयैर्हीनं सर्वव्याधिविवर्जितम्। शक्राग्नियमरक्षोम्बुवायुसोमेशसेवितम् ॥

स्वर्गे प्रमुदिता देवास्तेऽपि काङ्क्षन्ति सर्वदा ॥ १२ ॥

असङ्ख्येयफलं त्वत्रअक्षया च गतिः सदा। यैर्नसंसेवितंस्थानंवञ्चितास्तेनराभुवि
क्षेत्रस्य च गुणान्वक्तुं देवदानवमानवैः। न शक्यते प्रयत्नाच्चस्वयंयत्र स्थितोह्यहम्
यत्किञ्चिदशुभं कर्म कृतं मानुषकर्मणा। महाकालवनं प्राप्य तत्सर्वंभस्मसाद्भवेत् ॥

न सा गतिः कुरुक्षेत्रे गङ्गाद्वारे त्रिपुष्करे।
या गतिर्विहिता पुंसां महाकालवने सदा ॥ १६ ॥

तिर्यग्योनिगतागत्वामहाकालवनेस्थिताः। तत्रैवनिधनं प्राप्तास्तेयान्तिपरमांगतिम्
मेरुमन्दरमात्रोऽपिराशिःपापस्यकर्मणः। महाकालवनं प्राप्यसर्वोऽपि व्रजतिक्षयम्
श्मशानमिति चाख्यातं महाकालवनं प्रिये। तत्रब्रह्मादयो देवा नारायणपुरोगमाः ॥

योगिनश्च तथा साङ्ख्याः सिद्धाश्च सनकादयः।
उपासते च मां भक्त्या मद्भक्त्या मत्परायणाः ॥ २० ॥

या गतिर्या तपसां या गतिर्यज्ञयाजिनाम्। महाकालवने क्षेत्रे सागतिर्विहितामया
संहरामि च तत्रस्थस्त्रैलोक्यंसचराचरम्। अतोदेवि! समाख्यातंमहाकालवनंशुभम्
एवंबहुविधाञ्छ्रुत्वागुणान्बहुविधांस्तथा। देवि!त्वं विस्मिताजातागमनायमनोदध

क्षेत्रस्याऽऽलोकने चित्तं जातमुत्कण्ठितं तव।
त्वया सार्द्धं समागत्य महाकालवने शुभे ॥ २४ ॥

पश्य देवि! विचित्राख्यं यन्मया कथितं तव।
अमरेशपुरस्पर्द्धि वर्द्धितानन्दसुन्दरम्।
वर्णितं यन्मया देवि! भुक्तिमुक्तिकरं परम ॥ २५ ॥

त्वया प्रोक्तं विशालाक्षि!दृष्टाक्षेत्रमनुत्तमम। अस्यस्थानस्यरक्षार्थंभक्तंगणचतुष्टयम्

नियुज्य तां महादेव! सन्तोषाय मम प्रभो!॥ २६ ॥

द्वाराणितत्र चत्वारिक्रियन्तां परमेश्वर!। चत्वारःकलशाश्चैवहैमाःकार्यादृढाःशुभाः
पूर्वादिक्रमयोगेन चतुर्वर्गोनियोज्यताम्। धर्मश्चार्थश्च कामश्च मोक्षश्चैव महेश्वर!॥
त्वदीयं वचनं श्रुत्वा मया देवि प्रयत्नतः। अस्य क्षेत्रस्य रक्षार्थं स्मृतंगणचतुष्टयम्

चत्वार ईश्वरास्तेऽपि स्थापितास्तदनन्तरम्।
पिङ्गलेशो धनाध्यक्षस्तथा कायावरोहणः ॥ ३० ॥

बिल्वेश्वरो गणश्रेष्ठो दुर्दर्शो गणनायकः। एते मया नियुक्ता वै समर्थाः क्षेत्ररक्षणे
पूर्वादिक्रमयोगेन त्वत्प्रियार्थं वरानने!। नियुक्तास्त्वन्मतेनैवपूर्वस्यां दिशिपिङ्गलः

दक्षिणस्यां दिशि तथा प्रिये! कायावरोहणः ।
बिल्वेश्वरः प्रतीच्यां तु दुर्दर्शश्चोत्तरे तथा ॥ ३३ ॥

मानवा ये म्रियन्तेऽत्र क्षेत्रमध्येगणोत्तमाः । तेषां रक्षापराकार्याभवद्भिर्ममशासनात् कथां शृणु प्रयत्नेनपिङ्गलेश्वरसम्भवाम् । यस्याः श्रवणमात्रेण कृतकृत्योनरोभवेत्

पिङ्गला कन्यका देवि! कान्यकुब्जे बभूव ह ।
सुशीला च सुवेषा च सौन्दर्येणाऽतिनिर्मिता ॥ ३६ ॥

पितातस्या महाप्राज्ञःसर्वशास्त्रार्थतत्त्ववित् । ज्ञानध्यानरतश्चैवस्वाध्यायपरिनिष्ठितः

पिङ्गलोनाम विप्रेन्द्रो भार्या तस्य पतिव्रता ।
पिङ्गाक्षी विश्रुता लोके सा च पञ्चत्वमागता ॥ ३८ ॥
ततस्तेन स दुःखेन गृहस्थाश्रमनिःस्पृहः ।
तपोवनं जगामाथ गृहीत्वा तनयां स्वकाम् ॥ ३९ ॥

ऋषिभिः सेवितं पुण्यं शाकमूलफलाशनैः । सतत्रमुनिभिः सार्द्धंध्यानयोगपरायणः निवासंकृतवान्देवि! पिङ्गलायाश्चरक्षणम् । पालयामासधर्मात्मापुत्रिकांहृदयोपमाम् तामेव सततं साध्वीं मन्यमानोमहातपाः । नपाणिं ग्राहयामासमातृहीनेतिचिन्तयन्

विरक्तोऽपि महाभाग संसारात्सर्वधर्मवित् ।
पुत्रिकां प्रेक्षयन्सम्यक्सन्न्यासं नाकरोद्वशी ॥ ४३ ॥

अथ संरक्षयन्बालां मातृहीनांतपस्विनीम् । संयुक्तःकालधर्मेणस विप्रः स्वर्जगामह ततःसापिङ्गलादीनाहीनापित्रासुदुःखिता । विललापाऽऽतुरादेवि!पतिताशोकसागरे

पिङ्गलोवाच

अयमे च पितादैवात्कालधर्ममुपेयिवान् । मांत्यक्त्वा गतवानेकोदयालुर्निःस्पृहोयथा ससमः सर्वभूतेषु ममात्यन्तं हिते रतः । मामेकांसम्परित्यज्यपरलोकमितो गतः ॥ साऽहं परमदुःखार्त्ता पितृशोकेन विह्वला । शरीरं धारयामीदं कृपणं व्यर्थजीवितम्

ब्रह्मज्ञोऽपि हि तातो मे शान्तो दान्तो जितेन्द्रियः ।
मामेव पालयामास मातृहीनेति चिन्तयन् ॥ ४९ ॥

येन संरक्षिता बाल्ये येनाऽस्मिपरिवर्धिता । तेनपित्रावियुक्ताऽहंन जीविष्येकदाचन नद्यां वा निपतिष्यामिसमिद्धेवाहुताशने । पर्वताद्वापतिष्यामि पितृहीनानिराश्रया इति शोकातुराबालाविलपन्ती पुनःपुनः । बोध्यमानामहाभागैः सदारैर्ऋषिसत्तमैः

कन्यकाभीरुदन्तीभिर्वयस्याभिः समन्ततः ।
आलिङ्ग्यालिङ्ग्य बहुशः पीड्यमाना सुदुःखिता ॥
आगत्य करुणाविष्टो धर्मः परहिते रतः ॥ ५३ ॥

स्थविरोब्राह्मणोभूत्वाप्रोवाचेदं वचस्तदा । अलंबालेविशालाक्षि!रोदनैरतिदारुणैः

न भूयः प्राप्यते तातस्तस्मान्नार्हसि शोचितुम् ॥ ५४ ॥

अनित्यंयौवनं रूपंजीवितंद्रव्यसञ्चयः । प्रियैःसहचसम्वासस्तत्र शोचन्तिपण्डिताः

त्वया वै तत्कृतं कर्म पूर्वजन्मनि शोभने ।
येन पित्रा वियोगः स्यादरण्ये मुनिसेविते ॥ ५६ ॥

त्वां विहाय गतःक्वापिपश्य बाले विधेर्बलम् । इदंकृतमिदं कार्यमिदमन्यत्कृताकृतम् एवमीहासमासक्तं मृत्युः प्रकुरुते वशे । तस्माद्दुःखं समुत्सृज्य श्रोतुमर्हसिशोभने!

पितृभ्यां च वियोगश्च।येनाऽभूत्तव कर्मणा ।
पुरा त्वं सुन्दरीनाम वेश्यारूपेण सुन्दरी ॥ ५९ ॥
नृत्यगेयादिनिपुणा वीणावेणुविचक्षणा ।
आदिश्च पण्यनारीणां भूषणाच्छादनादिभिः ॥ ६० ॥

तां दृष्ट्वा रूपसम्पन्नांसुवेषां सुविभूषिताम् । ब्राह्मणोगुणवान्कश्चिद्बभूवमदनातुरः तं विदित्वा तथाभूतं ब्राह्मणं मदनातुरम् । समाश्वतस्त्वस्तेन त्वं रमिताकामिनाततः सोऽथ पापरतिर्मूढो ब्राह्मणोविषयात्मकः । हतः शूद्रेणकेनापि कामिनातववेश्मनि

विहाय भार्यामप्रौढां शुभां द्वादशवार्षिकीम् ।
प्रयातो नरकं घोरं शूद्रासम्पर्कदूषितः ॥ ६४ ॥
ततस्तस्य पिता विद्वान्माताऽतीव च दुःखिता ।
आर्त्ता पुत्रवियोगेन शापो दत्तो भयावहः ॥ ६५ ॥

मातोवाच

औषधादिप्रयुक्तंच वशीकर्त्तुं ममात्मजम्। यदस्माकंवियोगाय वञ्चितोदुष्टचारिणि
यस्माच्च मम पुत्रेण सा वियोगमकारयत्। तेनजन्मान्तरे दीनापतिहीनाभवत्वसौ

पितोवाच

बाल्ये वयसि वर्त्तन्ती मातृहीना सुदुःखिता।
बहिष्कृता विवाहेन पितृहीना भविष्यसि ॥ ६८ ॥

धर्म उवाच

तस्मात्पूर्वकृतेनैव कर्मणा वरवर्णिनि !। इदं दुःखमनुप्राप्ता कन्यका भवती सती ॥

पिङ्गलोवाच

त्वया जन्मान्तरे वृत्तं मम प्रोक्तं द्विजोत्तम !।
तस्माद् ब्रूहि भवन्प्रश्नं (भवत्प्रश्नं) पृच्छन्त्या निश्चयं स्वकम् ॥ ७० ॥
इत्थं सुघोरपापाऽहं पापाचारा तथाऽधमा। कथं तु ब्राह्मणेनाऽहमुत्पन्ना ब्रह्मवादिना
दशसूनासमश्चक्री दशचक्रिसमो ध्वजः । दशध्वजसमावेश्या दशवेश्यासमो नृपः
एवं वदन्ति धर्मज्ञा ब्राह्मणाः संशितव्रताः।
तस्माद् द्विजोत्तमादस्मात्कथं जन्माऽभवन्मम ॥ ७३ ॥

ब्राह्मण उवाच

पापाचारपराऽपि त्वं ब्राह्मणानां कुलेशुभे। उत्पन्ना तत्र वक्ष्यामिकारणंशृणुपिङ्गले
ब्राह्मणो विषयासक्तः कश्चिद्बद्धो नृपाज्ञया। चौर्यंकर्मकृतं तेन वेश्यालब्धेनसुन्दरि
मुच्यतां च त्वयाऽप्युक्तं न चौरोनैव पातकम्। यद्यनेनकृतंचौर्यंतन्मयैव कृतं भवेत्
ददामिवित्तमधिकं मुच्यतां द्विजसत्तमः। इत्युक्त्वा गृहमानीय तेनैव सहिता पुनः
गृहं च कल्पितं शुभ्रं पुष्पधूपादिवासितम्। रमितश्चत्वयाविप्रो यथासुखमनुत्तमम्
तस्य पुण्यस्य माहात्म्याद्गता स्वर्गमनुत्तमम्।
समुत्पन्ना कुले पुत्री ब्राह्मणस्य विशेषतः ॥ ७९ ॥
शापाच्चैव वियोगं त्वं प्राप्ता पुत्र्यधुना परम् ॥ ८० ॥

पिङ्गलोवाच

पूर्वजन्मनि वेश्याहं जाता दुष्कृतकारिणी । परद्रव्यपरा दुष्टा शौचाचारविवर्जिता
इदानीं दुःखिता जाता पितृमातृवियोगतः ॥ ८१ ॥
पाणिग्रहणधर्मेण वर्जिता शापतः प्रभो !। प्रसादं कुरु मे विप्र कोभवान्कथयस्व मे
कथंजन्म न मेभूयात्कथं मुक्तिर्भवेन्मम। भवबन्धविनिर्मुक्ताकथं यास्यामिसद्गतिम्

विप्र उवाच

धर्मोऽहं द्विजरूपेणत्वांजिज्ञासुरिहागतः। ममोपदेशात्तन्वङ्गिलिङ्गस्यैकस्यदर्शनात्
क्षेत्रस्य च प्रसादात्त्वं परां मुक्तिमवाप्स्यसि ॥ ८४ ॥

पिङ्गलोवाच

कस्मिन्क्षेत्रे परा मुक्तिः कस्य लिङ्गस्य दर्शनात्।
लभ्यते सहसा धर्म! एतदिच्छामि वेदितुम् ॥ ८५ ॥

धर्म उवाच

अस्ति गुप्ततमं क्षेत्रं महाकालवनं शुभम्। सर्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्वदा ॥
तस्मिन्क्षेत्रवरे पुण्ये स्थाने योजनविस्तृते।
लिङ्गं मोक्षप्रदं पुत्रि! पूर्वस्यां दिशि संस्थितम् ॥
तस्य दर्शनमात्रेण मुक्तिमाप्स्यसि पिङ्गले !॥ ८७ ॥
तस्य तद्वचनं श्रुत्वा धर्मस्य च यशस्विनि !। जगामपिङ्गलातूर्णं यत्रतल्लिङ्गमुत्तमम्
ददर्श परया भक्त्या पस्पर्श च पुनः पुनः ॥ ८८ ॥
दर्शनात्तस्यलिङ्गस्य तस्मिँल्लिङ्गेलयङ्गता। अत्रचावसरेदेवाः प्रोचुस्तत्रैवसंस्थिताः
अन्यजन्मनि पापिष्ठा मुक्ता त्वं पिङ्गलेक्षणा ॥ ९० ॥
अतोलोकेषुविख्यातः पिङ्गलेश्वरसञ्ज्ञकः। भविष्यति न सन्देहो महापातकनाशनः
दिशि पश्यन्ति ये गत्वा पूर्वस्यां पिङ्गलेश्वरम्।
तेषां शतक्रतुस्तुष्टः पूजां सम्यग्विधास्यति ॥ ९२ ॥
देवा वश्याभविष्यन्तिस्वर्गस्तेषां न संशयः। भविष्यतिचवशगानगरी चामरावती

धर्मोधनेनसहितः कुले तेषां न नश्यति । लोकोधर्मेण चरतां वशगः सम्भविष्यति
पितॄणामक्षया तृप्तिर्भविष्यति न संशयः ॥ ६४ ॥
अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् । तत्सर्वं भविता सम्यक्पिङ्गलेश्वरदर्शनात् ॥
यानि लिङ्गानि क्षेत्रेऽस्मिन्गोप्यानि प्रकटानि च ।
पूजितानि भवन्तीह पिङ्गलेश्वरदर्शनात ॥ ६६ ॥
एष ते कथितो देवि प्रभावः पापनाशनः । पिङ्गलेश्वरदेवस्य शृणु कायावरोहणम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्ये पिङ्गलेश्वरमाहात्म्यवर्णनं
नामैकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः

कायावरोहणेश्वरमाहात्म्यवर्णनम्

महादेव उवाच

कायावरोहणस्यापि उत्पत्तिं शृणुपार्वति !। यस्याःश्रवणमात्रेण ननरःकायवान्भवेत्
ब्रह्मणः सृष्टिकामस्यमनोर्वैवस्वतेऽन्तरे । दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणात्सप्रजापतिः
वामादजायताङ्गुष्ठाद्भार्यातस्य महात्मनः । तस्यांपञ्चाशतंकन्याः स एवाजनयत्प्रभुः
ताःसर्वाश्चानवद्याङ्गीः कन्याः कमललोचनाः ।
पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ ४ ॥
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
दिव्येन विधिना देवि! सप्तविंशतिमिन्दवे ॥ ५ ॥
रोहिणी वल्लभा जाता तस्य चन्द्रस्य सर्वदा ।
षड्विंशतिकृते चन्द्रः शप्तो दक्षेण पार्वति ॥ ६ ॥

चन्द्रेणापि तथाशप्तो दक्षः प्राचेतसःकृतः । अयजत्सोऽश्वमेधेनभूत्वाप्राचेतसात्मजः
नामन्त्रितोऽहं मोहेन दक्षेण पर्वतात्मजे । तत्र देवनिकायानां यज्ञभागानशेषतः ॥ ८
हव्यवाहस्तदा युक्तो वहन्मन्त्रैः समीरितः ।
त्वया दृष्टो विशालाक्षि! निरालम्बेऽम्बरे स्थितः ॥ ९ ॥
स्मरन्त्या पूर्ववैरं तु विज्ञप्तोऽहं त्वया प्रिये । त्वंदेवःसर्वदेवानां गतिश्च शरणं तथा
त्वं यज्ञस्त्वं वषट्कारो होताऽध्वर्युस्त्वमेव च ।
त्वया विना कथं यज्ञो वर्त्तते सर्वदेवप !॥ ११ ॥
देवानां भागधेयानिवहत्यग्निरयं भयात् । सगर्वश्चाऽवलिप्तश्च दक्षः प्राचेतसः किल
अनुस्मरन्पूर्ववैरं नैव दास्यत्यशासितः । कायहीनश्च कर्त्तव्यो दक्षो वह्निस्तथैव च
ये च यज्ञे समानीता देवा दक्षस्य शङ्कर । ते सर्वे कायरहिताः कार्यास्त्रिपुरसूदन
एवमुक्ते त्वयादेवि! मयाऽप्युक्तं वरानने !। पूर्वजन्मनि दक्षोऽयं पितातवशुचिस्मिते
वह्निश्चादेशकारी च देवाः क्रीडनकाः प्रिये !।
मदीयं वचनं श्रुत्वा कृतः क्रोधस्त्वया प्रिये !॥ १६ ॥
ललाटे भ्रुकुटीं कृत्वा प्रोच्छ्वसन्त्या पुनःपुनः ।
क्रोधात्करेण नासाग्रं मर्दितं बहुशस्तदा ॥ १७ ॥
तस्मिन्सम्मर्द्यमाने तु नासाग्रे पर्वतात्मजे !।
जाता स्त्री भ्रुकुटीवक्त्रा चतुर्दंष्ट्रा त्रिलोचना ॥ १८ ॥
बद्धगोधाङ्गुलित्रा च कवचाबद्धमेखला। सखड्गासधनुष्का च सतूणा सपताकिनी
सहस्रास्या शतभुजा सहस्रचरणोदरी । प्रतिकूलैः पदैर्देवि कम्पयन्ती तथा भुवम्
कृतंनामत्वया देवि! तां दृष्ट्वा च तमोमयीम् । भद्रकालीचमायाच सर्वलोकनमस्कृते
मयासृष्टस्तु पुरुषस्तादृशो लोमहर्षणः । स चाऽपि प्राञ्जलिर्भूत्वामामुवाचपुनःपुनः
आज्ञापय सुरेशान! किं करोमि जगत्प्रभो !॥ २२ ॥
ततो देवि! मयाऽऽज्ञप्तो भावं ज्ञात्वा त्वदीयकम् ।
कृत्वा नाम मनोज्ञन्तु वीरभद्र इति स्मृतः ॥ २३ ॥

वीरभद्र समादेशाद्भद्रकाल्या महाऽनया । प्राचेतसात्मजं दक्षं सगर्वं सहदैवतम् ॥२४
विध्वंसयगणाध्यक्ष सयज्ञं सपरिग्रहम् । दत्तं मया महत्सैन्यमसङ्ख्येयगुणस्यच

त्वयाऽपिभद्रकाल्यास्तु दत्तं सैन्यं भयावहम् ।
कपालकर्त्रिकाहस्तं मातृणां गणमक्षयम् ॥ २६ ॥

ततस्तौ तेन सैन्येनमहतातिसमावृतौ । जग्मतुस्तत्रयत्राऽऽस्तेदक्षःप्राचेतसोयजन्
देवैः परिवृतो देवि! सदस्यैर्ब्राह्मणैः सह । ततोदेवाःसुरुद्धास्ते तेनसैन्येन पार्वति!

विश्रब्धा मन्त्रपूतं तु पिबन्तः सोममध्वरे ॥ २८ ॥

त्रिनेत्रेण त्रिशूलेन त्रिदशाधिप ईश्वरः । त्रासितः सहसा शक्रोगणेनाध्वरमध्यगः
यमाख्येन गणेनैव यमकल्पप्रभेण च । सोमपाने प्रसक्तश्च यमश्चाकर्षितोऽध्वरे ॥
पाशेन वरुणो बद्धः पाशेन गणपेन तु । पश्चिमाशाधिपो वीरः प्राणेन परमेश्वरि !॥
ताडितोऽनिल एवाथ उत्तरे नरवाहनः । उत्तराशाधिपो देवि निधानैःसहितोऽध्वरे

वीरभद्रनियुक्तास्ते चक्रुर्युद्धं सुदारुणम् ॥ ३२ ॥
अथ युद्धं चकारोच्चैर्भद्रकाली भयावहा ।
विकराली महाकाली कालिका कलशोदरी ॥ ३३ ॥
प्रज्वालज्वलनाकारा शुष्कमांसातिभैरवा ।
एताश्चान्याश्च शतशो नरमालाविभूषणाः ॥ ३४ ॥
कपालकर्त्रिकाहस्ता जघ्नुर्देवगणांस्तथा ।
इति मातृगणं क्रुद्धं मर्दयन्तं सुरांस्तदा ॥
दृष्ट्वाऽभ्युपगता देवास्तुषिता युद्धलालसाः ॥ ३५ ॥
केचिच्च चिक्षिपुः शक्ती केचित्प्रासांस्तथापरे ।
केचिच्च तोमरैस्तीक्ष्णैः केचित्खड्गैश्च पट्टिशैः ॥ ३६ ॥

अर्दितो मातृसङ्घैस्तु पीडिताः प्रमथा यदा । भद्रकाली तदाक्रुद्धागदया शरवृष्टिभिः
खड्गादिभिः षडर्कांशुःपीडयामास संयुगे । भगस्यनेत्रेपूष्णस्तुदशनाःसूदितामुखात्
करान्दिनकरस्यैव चरणौ भास्करस्य च । मुशलेनहता येऽष्टौवसवो रणकोविदाः

वमन्तो रुधिरंतेऽपिनष्टा जर्जरमस्तकाः । विदेहाश्च कृता युद्धे तुषिता रणगर्विताः
बद्धः प्राचेतसो दक्षः पाशेन सुदृढेन च । शेषाश्च त्रिदशा भीता ब्रह्माणं शरणं गताः
वृत्तान्तः कथितः सर्वाविस्तरेणयथातथा । आद्याये तुषितादेवा विदेहाश्चैवतेकृताः
नष्टाश्च वसवो देवाः पीडिता भास्करा रणे । नज्ञायतेसहस्राक्षो न यमो नधनेश्वरः

वरुणो यादसां नाथः क्व गतः परमेश्वरः ॥ ४३ ॥

भद्रकाल्या हतं सर्वं वीरभद्रगणेन च । भग्नश्च यज्ञयूपो वै विध्वस्तं कलशं तदा ॥
प्रदीपिता महाशालाभग्नं वै यज्ञतोरणम् । तेषांतु वचनं श्रुत्वा ब्रह्मा लोकपितामहः

आजगाम कृपाविष्टो यत्राऽहं मन्दरे स्थितः ॥ ४५ ॥

स्तुतिंकृत्वा मदीयां तुवाक्यमुक्तमिदंतदा । आद्याये तुषिता देवाविदेहाश्चैवतेकृताः
भद्रकाल्या महादेव! वसवो जर्जरीकृताः । पीडिताभास्करा युद्धेशेषानष्टादिशोगताः
कायावरोहणं देव तुषितानां कथं भवेत् । ब्रह्मणोवचनं श्रुत्वा मया प्रोक्तं वरानने !॥

महाकालवने क्षेत्रे गच्छन्तु तुषितास्त्वमी ।
लकुटीशो गतो यत्र कायावरोहणाद्गृहम् ॥ ४६ ॥

ब्राह्मणाश्च ममादेशाच्चतुःशिष्यैःसमन्विताः । द्वापरेसमतिक्रान्ते प्राप्ते कलियुगेतथा

तत्र कायमनुप्राप्ता मम शिष्या ममोपमाः ।
अवसन्त क्षितौ धन्या रक्षणार्थं द्विजन्मनाम् ॥ ५१ ॥
क्षेत्रस्य दक्षिणे तस्य विद्यते लिङ्गमुत्तमम् ।
सर्वसम्पत्करं दिव्यं सिद्धानां कायदायकम् ॥ ५२ ॥
प्रसादात्तस्य लिङ्गस्य कायान्प्राप्स्यन्त्यमी सुराः ।
मदीयं वचनं श्रुत्वा गतास्ते तुषिताः प्रिये !॥ ५३ ॥

मुदिता ब्रह्मणा सार्द्धं यत्र तल्लिङ्गमुत्तमम् । प्रसादात्तस्य लिङ्गस्यप्राप्तंकायमनुत्तमम्
पुनस्ते तादृशाजातास्तुषिता यादृशाऽभवन् । अतोदेवैः कृतं नाम कायावरोहणेश्वरः

समीहितप्रदो नित्यं ख्यातो देवो भविष्यति ॥ ५५ ॥
ये गत्वा दक्षिणामाशां देवं कायावरोहणम् ।

पश्यन्ति परया भक्त्या यमस्तेषां पिता भवेत् ॥ ५६ ॥
जन्मकोटिसहस्रैस्तु यत्पापं समुपार्जितम् । तत्सर्वं नाशमायातिदर्शनादेव नान्यथा
स्वकर्मणागतायेचनरके पितरो गणाः । दर्शनात्तस्य लिङ्गस्य तेषां मुक्तिर्भविष्यति
येपश्यन्ति प्रसङ्गेन देवं कायावरोहणम् । न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
स्पर्शनात्तस्य लिङ्गस्य पापिनोऽपि हि ये नराः ।
ते यास्यन्ति परं स्थानं सर्वपापविवर्जितम् ॥ ६० ॥
शाठ्येनपूजितो देवःकायावरोहणेश्वरः । ददातिराज्यं भोगांश्चस्वर्गलोकंसनातनम्
द्वादश्यां ये प्रपश्यन्ति स्नात्वा कायावरोहणम् ।
ते भित्त्वा ब्रह्मसदनं यास्यन्ति परमां गतिम् ॥ ६२ ॥
एष तेकथितोदेवि! प्रभावः पापनाशनः । कायावरोहणेशस्य बिल्वेश्वरमथो शृणु ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसम्वादे कायावरोहणेश्वरमाहात्म्य-
वर्णनंनाम द्व्यशातितमोऽध्यायः ॥ ८२ ॥

त्र्यशीतितमोऽध्यायः

बिल्वेश्वरमाहात्म्यवर्णनम्

श्रीहर उवाच

बिल्वेश्वरस्यमाहात्म्यंशृणु सुन्दरि!सादरम् । यस्यश्रवणमात्रेण मुच्यतेसवपातकैः
आदिकल्पे महादेवि! लोकानामनुकम्पया ।
कल्पवृक्षास्ततो जाता ब्रह्मणो ध्यायतः पुरा ॥ २ ॥
तेषां मध्ये बिल्ववृक्षः श्रीवृक्ष इतिगीयते । अधस्तात्तस्य वृक्षस्य पुरुषःकाञ्चनप्रभः
उपविष्टस्तदादृष्टोब्रह्मणा लोककर्तृणा । फलानितस्यपत्राणि विविधानिनिरन्तरम्

भक्षयत्यतिसन्दृष्टो हृद्यानि च मृदूनि च । बद्धगोधाङ्गुलित्रश्चशरीधन्वी तथैव च ॥
खड्गी किरीटमाली च कुण्डली कवची तथा ।
महोरस्को महोत्साहः सिंहसंहननो युवा ॥ ६ ॥
ब्रह्मणा चकृतं नामबिल्व इत्यभिविश्रुतम् । तमिन्द्रोवरयामास राजा त्वं भूतलेभव
त्रिविष्टपस्य भूमिस्थः सखाभूतो मम प्रियः ।
ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम् ॥ ८ ॥
यस्याः प्रभावतःशस्त्ररणे न प्रभविष्यति । सोऽब्रवीद्यदि मे वज्रमायुधंत्वंप्रयच्छसि
तस्यां पृथिव्यां राजाहं नान्यथा रोचते मम ।
ततोऽहं पालयिष्यामि सत्येनेमां वसुन्धराम् ॥ १० ॥

इन्द्र उवाच

एवं भवतु भद्रं ते भव राजा प्रजाहितः । स्मरणादेव वज्रस्तेकरेयास्यति नान्यथा
स एवमुक्तस्तेजस्वी बिल्वो राजा बभूवह । कपिलोनाम धर्मात्मा वेदवेदाङ्गपारगः
सखा बभूव बिल्वस्य तस्यविप्रर्षिसत्तमः । स तेन सह संगम्य सुखासीनोवरानने!
चक्रे कथा विचित्रार्थाः प्रीयमाणःपुनःपुनः । तथा कथान्तरे वादः परस्परमभूत्तयोः
दानं प्रधानं तीर्थं तु बिल्वेनोक्तं पुनःपुनः । ब्रह्म श्रेष्ठं तपः श्रेष्ठमित्युक्तं कपिलेन तु

बिल्व उवाच

दानाद्राज्यं सुखं भोगाऐश्वर्यंस्वर्गमक्षयम् । प्राप्यते द्विजशार्दूल!कथं ब्रह्म प्रशंससि

कपिल उवाच

वेदाद्यज्ञाः प्रवर्त्तन्ते वेदादिष्टिश्च कामिका । प्रवर्त्तन्तेक्रिया वेदाद्वेदमूलमिदं जगत्

बिल्व उवाच

संसारे पार्थिवाः श्रेष्ठाः समर्थालोकपालने । लोकपालोपमालोकेकथंब्रह्म प्रशंससि

कपिल उवाच

मुख्या वै ब्राह्मणाः प्रोक्ताः शापानुग्रहकारकाः ।
पितरः पार्थिवानां तु किं त्वं बिल्व न मन्यसे ॥ १६ ॥

एवं कौतूहले जाते कपिलो द्विजसत्तमः । बिल्वेन ताडितो मूर्ध्निवज्रेणानतपर्वणा

वज्रेण स द्विधा छिन्नः कपिलो ब्रह्मविद्यया ।
सन्धार्य स्वशरीरं तु ममाऽन्तिकमुपागतः ॥ २१
स्तुतोऽहं विविधैः स्तोत्रैः सम्यगाराधितो ह्यहम् ।
मया दत्तमव्ययत्वं कुलिशाद् ब्राह्मणस्य तु ॥ २२ ॥

द्विजः समागतोबिल्वं पुनःसख्यमभूत्तयोः । पुनस्तु तादृशोवादःसञ्जातःपर्वतात्मजे वामपादेन चाऽप्येनं बिल्वो विप्रमताडयत् । पुनश्च वज्रमादायजघानैनं तदा दृढम् न मृतिन्व्यथांतस्यतद्वज्रमकरोत्पुनः । अवध्यत्वमथोज्ञात्वाबिल्वस्तस्यमहात्मनः नारायणमथासाद्यप्रार्थयामासचेप्सितम् । वरदोऽस्मीतितुष्टेनविष्णुनासचमोदितः

प्रोवाच प्रणतो विष्णुमिदं देवि! महामनाः ॥ २६ ॥

बिल्व उवाच

कपिलोनाम विप्रर्षिरवध्योऽक्षय एव च । सखा मम हृषीकेश स च मामाहनित्यशः

बिभेम्यहं न देवस्य राक्षसस्याऽसुरस्य च ॥ २७ ॥
पिशाचस्याऽपि यक्षस्य न चैवान्यस्य कस्यचित् ।
बिभेमीति यथा ब्रूयां तथा त्वं कर्त्तुमर्हसि ॥ २८ ॥

एवमुक्तस्तु बिल्वेनसदेवः पुरुषोत्तमः । एवं भविष्यतीत्युक्त्वाकपिलस्याश्रमंगतः स प्रविश्याश्रमं देवं कपिलेन प्रपूजितः । कपिलं प्रत्युवाचेदं सामपूर्वं जनार्द्दनः ॥ भगवन्ब्राह्मणश्रेष्ठ! वेदवेदाङ्गपारग !। वरमेकं वृणोम्यद्य विप्रेन्द्र ! दातुमर्हसि ॥ ३१ प्रसादितोऽहं बिल्वेन नृपेन्द्रेण पुनः पुनः । वरदोऽस्मीति चाप्युक्तो वरंवव्रेमहामुने त्वया प्रोक्तं बिभेमीति ब्रूहितस्मादनुग्रहात् । अभीतस्त्वं तथाप्ययमदर्थंतुवदप्रभो कपिलस्त्वेवमुक्तो वै विष्णुना मधुरं वचः । उवाच न बिभेमीतिभूयोभूयोजनार्दन

नाहं वक्ष्ये बिभेमीति तेनोक्तं नोच्यते मया ।
एतच्छ्रुत्वा वचस्तस्य कपिलस्य जनार्द्दनः ।
उवाच चक्रमुद्यम्य भयं विप्रस्य दर्शयन् ॥ ३५ ॥

न चेद्वक्ष्यसि भीतोऽहं चक्रं ते प्रहरामि वै ॥ ३६ ॥

कपिल उवाच

किं वृथा प्रियचक्रस्य विष्णो! क्लेशमिहेच्छसि ।
नाहं चक्रस्य ते गम्यः प्रसादात्त्र्यम्बकस्य हि ॥ ३७ ॥

ततः स मुष्टिमादाय कुशानां कपिलस्तदा । वासुदेवं समासाद्य तिष्ठतिष्ठेत्यभाषत अद्य गर्वं च दर्पं च बलंयच्चतवाऽद्भुतम् । तत्सर्वं नाशयिष्यामि तिष्ठेदानींजनार्द्दन ततो युद्धं समभवत्तुमुलं लोमहर्षणम् । निमेषान्तरमात्रं तु कृष्णस्य कपिलस्य च दिव्यास्त्राणांकुशानांचयुद्धंसमभवद्दृढम् । निरालम्बेऽम्बरेदेविदेवानांभयमाविशत् एतस्मिन्नन्तरे ब्रह्मा सुरैः परिवृतस्तदा । आजगामातिसन्तप्तः कृष्णं वचनमब्रवीत् भगवन्भूतभव्येश! भवबन्धभयापह !। हृषीकेश हृषीकेश सृष्टिसंहारकारक !॥ ४३ ॥ समाराध्यजगन्नाथशक्राद्यास्त्रिदिवौकसः ।वसन्तिमुदिताःसर्वेसर्वकामसमन्विताः आब्रह्मस्तम्बपर्यंतं त्रैलोक्यं सचराचरम् । उत्पादितंधृतंव्याप्तं विष्णुनाप्रभविष्णुना तेनैकेन विशुद्धेन सर्वगेन महात्मना । इति स्म मुनयः सर्वे उदिता मुनिसत्तमाः ॥

वदन्ति कारणं चाऽस्य त्रैलोक्यस्य जनार्द्दनः ।
देवदानवदैत्यैश्च मुनिचारणपन्नगैः ॥ ४७ ॥

वरार्थिभिश्चप्रवरैः पूज्यसे गरुडध्वज !। किं भवानेवगोविन्द वृथायुध्यसिसद्विजैः

कपिलस्य च विप्रस्य हरालब्धवरस्य च ।
किं न वेत्सि यथा ह्येष प्रसादात्पारमेश्वरात ॥ ४९ ॥

अवध्यत्वमनुप्राप्तो ह्यजेयत्वं संयुगे । न चैवं त्वद्विधा देवब्राह्मणेषुविकुर्वते ॥ ५० ॥ ब्रह्म च ब्रह्मणो मूलं त्वयैवप्राक्प्रतिश्रुतम् । तस्मादाशुनिवर्त्तस्वमत्वैनंब्राह्मणंविभो

इत्थं निशम्य देवेशो वाक्यं ब्रह्ममुखाच्च्युतम् ।
योगेन तद्बलं ज्ञात्वा कपिलस्य तु शङ्करम् ॥ ५२ ॥

जगाम परमं लोकं पूज्यमानस्त्रिविष्टपैः । गते जनार्दने बिल्वो विललाप पुनः पुनः ॥

युद्धं सुदारुणं श्रुत्वा कृष्णस्य कपिलस्य च ।

कथं जेष्यामि कपिलं कथं मे निर्वृतिर्भवेत् ।
कस्याहं शरणं यामि को मे त्राता भविष्यति ॥ ५४ ॥
न जितः कपिलो युद्धे विष्णुना प्रभविष्णुना ।
मया संस्पर्द्धते नित्यं कथं जेयो भविष्यति ॥ ५५ ॥

अजेया ब्राह्मणा युद्धे शापानुग्रहकारकाः । भस्म कुर्युर्जगत्सर्वं सदेवासुरमानुषम् ब्राह्मं हि परमं तेजो देवैरपि दुरासदम । एवं विलपतस्तस्य वासवः समुपागतः ॥ विलपन्तं कृशं बिल्वं वज्रहस्तमवेक्ष्य सः । ममत्वाकृष्टहृदयः प्रत्युवाच पुरन्दरः ॥ अलं शोकेन भूपाल! शृणु मे वचनं परम् । यदाहंपीडितो युद्धे शम्बरेण दुरात्मना

बलिष्ठेन सगर्वेण तदा पृष्टो मया गुरुः ॥ ५६ ॥

बृहस्पतिर्महातेजास्तेनोक्तं तु तदा नृप !। गच्छ शक्र ममादेशान्महाकालवनं शुभम्

यत्र सन्ति सुदिव्यानि लिङ्गानि विविधानिच ।
भुक्तिमुक्तिकराण्येव वाञ्छितार्थप्रदानि च ॥ ६१ ॥
तेषां मध्ये लिङ्गमेकमाराधय शचीपते !।

यस्य दर्शनमात्रेण रणे धृष्टो भविष्यसि । तस्यतद्वचनाद्बिल्वसम्यगाराधना कृता मया लिङ्गस्यहर्षेण जितोवै शम्बरस्तदा । प्रसिद्धिं तु गतोदेव सचेन्द्रेश्वरसञ्ज्ञकः

तस्मात्त्वं पश्चिमामाशां गत्वा क्षेत्रस्य तस्य वै ।
समाराधय यत्नेन लिङ्गं वरुणपूजितम् ॥ ६४ ॥
तल्लिङ्गं त्रिषु लोकेषु त्वन्नाम्ना ख्यातिमेष्यति ।
कपिलस्त्वत्सखा विप्रो जितोऽस्मीति वदिष्यति ॥
तस्य लिङ्गस्य माहात्म्यान्मित्रभावं गमिष्यति ॥ ६५ ॥

इत्युक्त्वा तु गतेशक्रे देवलोकयशस्विनि । पूजयामासभावेनपुष्पैर्द्रव्यैःसुगन्धिभिः जगाम बिल्वोभूपालो महाकालवनं शुभम् । पश्चिमे भागे त्रिङ्गं त्रिदशपूजितम् ॥

मुक्ताफलैश्च रत्नैश्च वासोभिर्भूषणैस्तथा ।
एतस्मिन्नन्तरे चैव कपिलोऽपि समागतः ॥ ६८ ॥

ददर्श बिल्वं भूपालं पूजयन्तं पुनः पुनः । शरीरे तस्य बिल्वस्य मदीयं रूपमुत्तमम्

दृष्ट्वा मत्वा महादेवं जितोऽस्मीति द्विजोऽब्रवीत् ॥ ६६ ॥

प्रार्थयामित्वयासख्यमनन्तं शिवसन्निधौ । एवमुक्तस्तदा बिल्वः कपिलेनमहात्मना प्रसन्नःप्राञ्जलिर्भूत्वा कपिलं द्विजसत्तमम् । एवं भवतु भद्रं ते कृतार्थोऽहंमहात्मना सख्यं तदेव भवतु शश्वद्वदसि मन्यसे । एवमन्योन्यमुक्त्वातौकृत्वासख्यमनुत्तमम्

चिक्रीडतुश्चिरंकालं परं हर्षमुपागतौ ।
तस्य लिङ्गस्य माहात्म्याद्भूयो राज्यं चकार सः ॥ ७३ ॥
स हि मित्रेण भूपालो बिल्वो देवि! मुदान्वितः ।
तदा प्रभृति विख्यातो देवो बिल्वेश्वरः क्षितौ ॥
बिल्वेनाराधितो लोके वाञ्छितार्थफलप्रदः ॥ ७४ ॥

येपश्यन्तिविशालाक्षिदेवंबिल्वेश्वरंपरम् । तेकृतार्था भविष्यन्तिमहापातकवर्जिताः येऽनुमोदन्ति देवस्य दर्शनं पर्वतात्मजे !। तेऽपि पापविनिर्मुक्ताःप्रयान्तिमम मन्दिरे समतीतं भविष्यञ्च कुलानामयुतं नरः । मम लोकं नयत्याशु तस्य लिङ्गस्यदर्शनात्

प्रयान्ति पितरोहृष्टा मम लोके ह्यतन्द्रिताः ।
विमुक्ताः पातकैर्घोरैः कृत्वा लिङ्गस्य दर्शनम् ॥ ७८ ॥

कृत्वापि पातकंघोरं ब्रह्महत्यादिकं नरः । तत्पापंविलयं याति श्रीबिल्वेश्वरदर्शनात्

या तिथिः श्रूयते देवि! कृष्णपक्षे त्रयोदशी ।
सा प्रोक्ता वल्लभा तस्य सर्वपातकनाशिनी ॥ ८० ॥

येऽर्चयन्ति नरास्तस्यां देवं बिल्वेश्वरं प्रिये !। न तेषां पुनरावृत्तिर्घोरसंसारगह्वरे कर्मणामनसावाचायत्पापंसमुपार्जितम् । तत्क्षालयतिदेवोसौतिथौतस्यांसमर्चितः एत ते कथितो देवि प्रभावो पापनाशनः । बिल्वेश्वरस्य देवस्य श्रूयतामुत्तरेश्वरम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्ये बिल्वेश्वरमाहात्म्यवर्णनं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

चतुरशीतितमोऽध्यायः

उत्तरेश्वरमाहात्यवर्णनम्

श्रीमहादेव उवाच

उत्तरेश्वरमाहात्म्यमशेषपापनाशनम् । जन्ममृत्युजराव्याधिस्फोटनं शृणु पार्वति!
अयोध्यायामतिख्यातकुलोत्पन्नश्चपार्थिवः । सुधीःपरीक्षिन्नामाचमृगयामगमत्सच
मृगमनुससाराऽथ मृगो दूरमपासरत् ॥ ३ ॥
तदाऽध्वनि जातश्रमः क्षुत्तृष्णाभिभूतः कस्मिंश्चिद्वनोद्देशेनीलवनमपश्यच्चाविवेश ।
तस्य वनखण्डस्य दक्षिणभागे सरो दृष्ट्वा साश्व एव व्यगाहत ॥ ५ ॥
अथाऽश्वस्थः सन्मृणालमश्वस्याऽग्रतो निक्षिप्य पुष्करिणीं समुपाविशत्
शयितस्ततः शयानो गीतमश्रृणोत् ॥ ७ ॥
स श्रुत्वा चिन्तयन्नेह मनुष्यगतिं प्रपश्यामि ॥ ८ ॥
कस्य खल्वयं गीतशब्द इत्यवलोकयामास ॥ ९ ॥
अथापश्यत्कन्यां परमरूपदर्शनीयां पुष्पाणि
विचिन्वन्तीं साथ राजा समीपे पर्यक्रामत् ॥ १० ॥
तामब्रवीद्राजा कस्याऽसि त्वं कन्या परमरूपदर्शनीया पुष्पाणि विचिन्वन्ती ॥ ११
साथ राजसमीपे गत्वेति प्रोवाच कन्यास्मीति ॥ १२ ॥

राजोवाच

अर्थी तवाऽस्मीति ॥ १३ ॥

अथोवाच कन्या

समयेनाहं त्वया शक्योपालब्धुं नान्यथेति ॥ १४ ॥
तां राजा स मपृच्छत्कस्ते समय इति ॥ १५ ॥
ततः कन्या तमुवाच नोदकं दर्शयितव्यमिति ॥ १६ ॥

राजा बाढमित्युक्त्वा तां समागम्य तया सहाऽऽस्ते ॥ १७ ॥
तत्रैवासन्ने राजनि सेना त्वागच्छत् तया सहोपविष्टं राजानं परिवार्य चातिष्ठत् ॥
सभाजितश्च राजा तथैव शिबिकया प्रायात् । अथ झटिति तया सह
तं नगरमनुप्राप्य रहसि तया सह रममाणः सन्नान्यं किञ्चिदपश्यदथ प्रधानोऽमा-
त्यस्तस्याभ्याशचरास्ताः स्त्रियोऽभ्यपृच्छत् ॥ १९ ॥
किमत्र प्रयोजनं विद्यते इत्यब्रुवंस्ताः स्त्रियोऽपूर्वमेव पश्यामस्तदुदकं
नात्राश्रियत इति ॥ २० ॥
अथाऽमात्यश्च निरुदकं कारयित्वा दारुवृक्षं वृद्धपुष्पफलं शरद्युपलभ्य
राजानामब्रवीत् । वनमिदमनुदकं साध्वत्र रम्यतामिति ॥ २१ ॥
स तस्य वचनात्तयैव सह देव्या वनं प्राविशत् ॥ २२ ॥
सकलत्रस्तस्मिन्वने रम्ये तयैव सह रेमे ॥ २३ ॥
प्रविश्य च राजा सह प्रियया सुधाधवलसलिलपूर्णां वापीमपश्यत् ॥ २४
वापीं दर्दुरैः पूर्णां दृष्ट्वैव च तां तस्या एव तीरे तया देव्याऽतिष्ठत् ॥२५
अथ तां देवीं राजाब्रवीत् । शान्ततरं वापीसलिलमिति ॥ २६ ॥
सा च तद्वचः श्रुत्वा तीर्थवापी न्यमज्जन्न पुनरुदमज्जत् । तां मृगयमाणो
राजा नापश्यत् ॥ २७ ॥
वापीं दर्दुरैः पूर्णां दृष्ट्वा आज्ञापयामास भृत्यान्सर्वदर्दुरवधः क्रियतामिति ॥२८
यो ममार्थी स तैर्दर्दुरैरुपायनैर्मामनुतिष्ठेत् ॥ २९ ॥
अथ कश्चिन्महान्दर्दुरो दर्दुरवधे क्रियमाणे सर्वासु दिक्ष्वभ्यगात् ॥ ३०
उपेत्यचैनमुवाचेदं ज्ञात्वा क्रोधवशङ्गतम् ।
प्रसादंकुरुनार्हसि दर्दुराणामनपराधिनां वधं कर्तुमिति ॥ ३१ ॥

श्लोकश्चाऽत्र भवति

मा दर्दुरान्प्रभिन्द्यास्त्वं कोपं सन्धारयाऽच्युत ।
प्रक्षीयते महाधर्मो जनानां परिजानताम ॥ ३२ ॥

तमेवं वादिनमिष्टजनवियोगे शोकपरीतात्मानं स राजा प्रोवाच ।

न हि काममप्येतान्निष्कामेन निवर्हणीया इति ॥ ३३ ॥

एतैर्दुरात्मभिर्मे स्त्री भक्षिता सर्वथैव त्विमे वध्या दर्दुराः ।

नार्हसि विद्वन्नुपरोद्धुमिति ॥ ३४ ॥

सतद्वाक्यमुपश्रुत्य व्यथितेन्द्रियमनाः । प्रोवाच प्रसीद राजन्नहमायुर्नाम भूपालः ॥

प्राप्ता सा मम दुहिता । सा कन्या नागलोकं गता ।

अत्राऽऽस्ते नागचूडो नागराजः । स्मृता आगमिष्यति ॥ ३६ ॥

तामब्रवीद्राजा तां स्मृत्वाऽऽनीय मे दीयतामिति ॥ ३७ ॥

अथैनां स्मृत्वा राज्ञे अदात् । अब्रवीच्च ॥ ३८ ॥

मयावहसितो गालवो महान्मुनिः तपसा कर्शिताङ्गः ।

क्षमेश्वरो दर्दुरबाल्यात्प्रकोपितः तेनाहं शप्तः ,

यन्मामनादृत्य दर्दुरबाल्यादवहसितस्तस्माद्दर्दुरो भविष्यसि ॥ ३९ ॥

प्रसादितस्तु विप्रः प्रत्युवाच ॥ ४० ॥

अवितथोऽयं मम शापस्तस्मादन्यजन्मनि दर्दुरराजो भूत्वा त्वं हि,

दुहितरमिक्ष्वाकुकुलोत्पन्नाय सर्वगुणान्विताय दत्त्वा यदा,

यास्यसि महाकालवने तस्योत्तरदिग्भागे, तदा लिङ्गस्य दर्शनेन मुक्तिमवाप्स्यसि

दुहिता कियत्पातालं यास्यति स्मृता चाऽऽगमिष्यति ।

स्वस्ति तेऽस्तु साधयिष्यामि कार्याणि, इत्युक्त्वा दर्दुरो महाकालवनमगच्छत्

तस्योत्तरे लिङ्गं ददर्श तस्य दर्शनादनेकमाणिक्यरचितं,

सिद्धगन्धर्वसेवितं विमानवरमारुह्य शक्रलोकं गतः ॥ ४३ ॥

तस्य माहात्म्यमवलोक्य देवाचार्यो बृहस्पतिर्वाक्यं जगाद ॥ ४४ ॥

अहो लिङ्गस्यमाहात्म्यमहो लिङ्गस्य वैभवम् ।

सम्प्राप्तोवासवं लोकं शापभ्रष्टो हि दर्दुरः ॥ ४५ ॥

आयुराख्यो हि भूपालो मुक्तो दर्दुरतां गतः ॥ ४६ ॥

इति तद्वचनं श्रुत्वा देवाचार्यस्य पार्वति !। देवास्ते हृष्टमनसोनाम चक्रुः समाहिताः

यस्माद्दर्दुरभूपालो मुक्तो दर्दुरयोनितः ।

दर्शनात्तस्य लिङ्गस्य तस्मात्ख्यातो भविष्यति ॥ ४८ ॥

उत्तरेश्वरदेवश्च शापपापप्रणोदकः । इत्युक्त्वा त्रिदशैः सर्वैः पूजितो ह्युत्तरेश्वरः ॥

भुक्तिमुक्तिप्रदो देवि!महापातकनाशनः । क्षेत्रस्य रक्षणार्थाय नियुक्तो योमया गणः

दर्दुरो हि दुराधर्षः स चापीश्वरतां गतः ॥ ५० ॥

उत्तराशामथो गत्वा यःपश्येदुत्तरेश्वरम् । ससर्वैश्वर्यसंयुक्तोयाति लोकमथोत्तरम्

सुभगः सर्वदा दान्त सुरूपः पुत्रवानिति । नीरोगःपुण्यशीलश्च जायते सप्तजन्म च

या वृद्धिस्तु कुबेरस्य शक्रस्य चयमस्यच । वरुणस्यचया वृद्धिःसावृद्धिरुत्तरोत्तरा

जायते नात्र सन्देह उत्तरेश्वरदर्शनात् ॥ ५३ ॥

कृष्णप चतुर्दश्यां ये पश्यन्ति यशस्विनि !। उत्तरेश्वरसञ्ज्ञं तुतेकृतार्थाःकलौयुगे

किं दानैः किं तपोभिश्चकिं यज्ञैर्बहुदक्षिणैः । दर्शनाल्लभते राज्य स्वर्गं मोक्षंक्रमेणतु

आजन्म च कृतं पापं स्वल्पं वा यदिवाबहु । तत्सर्वंनाशमायाति उत्तरेश्वरदर्शनात्

इत्येवं चतुराशीतिः सङ्ख्याता ईश्वरास्तव । कथिता येत्वया पृष्टामहाकालवनेमया

य एतेषां देवि! यात्रां प्रतिलोमानुलोमतः ।

करिष्यन्ति नरा भक्त्या ते यास्यन्ति परं पदम् ॥ ५८ ॥

यश्चाऽपि पूजयेत्तत्र लिङ्गंभक्त्यातुमानवः । स कुलं तारयत्येवपैतृकं मातृकं शतम्॥

एषते कथितो देवि!प्रभावःपापनाशनः । चतुराशीतिलिङ्गानांकिंभूयःश्रोतुमिच्छसि

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे

चतुरशातिलिङ्गमाहात्म्य उमामहेश्वरसम्वाद उत्तरेश्वरलिङ्गमाहात्म्य-

वर्णनपूर्वकचतुरशीतिलिङ्गमाहात्म्यवर्णनंनाम

चतुरशीतितमोऽध्यायः ॥ ८४ ॥

शुभम्भूयात्

—○*○—